ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥३०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतै वेंदात्मकैर्मन्त्रैः कृत्याव्याधिविनाशनैः ।
मयैवंकृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥३१॥

ततः कृतरक्षमातुरमागारं प्रवेश्य आचारिकमादिशेत् ॥ ३२ ॥ ततस्तृतीयेऽहनि विमुच्य एवं बध्नीयाद्व्रणपट्टेन, न चैनंत्वरमाणः अपरेद्युर्मोक्षयेत् ॥ ३३ ॥

द्वितीयदिवसपरिमोक्षणात् विग्रथितो व्रणश्चिराद्रुपसंरोहति, तीव्ररुजश्चभवति, अतऊर्द्धं दोषकालबलादीनवेक्ष्य, कषायालेपनबन्धाहाराचारान् विदध्यात् नचैनं त्वरमाणः सान्तर्दोषं रोपयेत्, स हि अल्पेनाप्यपचारेणाभ्यन्तरमुत्संगं कृत्वा भूयोऽपि विकरोति ॥ ३४ ॥

तस्मादन्तर्बहिश्चैव संशुद्धं रोपयेद्व्रणम् ।
रूढेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् ॥
हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत् ।
त्रयहाद्व्यहाच्छरद्ग्रीष्मवर्षास्वपि च बुद्धिमान् ॥
अतिपातिषु रोगेषु नेच्छेद्विधिमिमं भिषक् ।
प्रदीप्तागारवच्छीघ्रं तत्र कुर्यात्प्रतिक्रियाम् ॥
या वेदना शस्त्रनिपातजाता तीव्रा शरीरं प्रधुनोति जन्तोः ।
घृतेन सा शान्तिमुपैति सिक्ता कोष्णेन यष्टीमधुकान्वितेन ॥७

इति शल्यतन्त्रसमुच्चये द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः ।

अथातो यन्त्राध्यायं व्याख्यास्यामः ।

यन्त्रशतमेकोत्तरं, अत्रहस्तमेव प्रधानतमं यन्त्राणामवगच्छ, किंकारणं ? यस्माद् हस्ताद्तेयन्त्राणामप्रवृत्तिरेव तदधीनत्वात् यन्त्रकर्मणाम् ॥ १ ॥

तत्रमनःशरीराबाधकराणि शल्यानि, तेषामाहरणोपायो यन्त्राणि ॥२॥

तानिषड्प्रकाराणि—तद्यथा, स्वस्तिकयन्त्राणि, सन्दंशयन्त्राणि, तालयन्त्राणि, नाड़ीयन्त्राणि, शलाकायन्त्राणि, उपयन्त्राणि चेति ॥३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1. Anguli yantra.



Vasti yantra.

2. Arsho yantra.

3. Ashmaryaharna yantra.

4. Basti yantra.



5. Bhringamukha yantra.



6. Darvyakritishalaka.

7. Garbhashanku yantra.

8. Jalodar yantra.



9. Kakamukha yantra.

10. Kankamukha yantra.

11. Muchuti yantra.



12. Nádi yantra.



13. Rikshamukha yantra.



14. Sadansha yantra.

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्रचतुर्विंशतिः स्वस्तिकयन्त्राणि, द्वे सन्दंशयन्त्रे, द्व एव तालयन्त्रे, विंशतिनाड्यः, अष्टाविंशतिः शलाकायन्त्राणि, पञ्चविंशतिरुपयन्त्राणीति ॥ ४ ॥

तानि प्रायशो लौहानि भवन्ति तदभावे तत्प्रतिरूपकाणि वा, तत्र नानाप्रकाराणाम् व्यालानां मृगपक्षिणां मुखै र्मुखानि यन्त्राणाम् प्रायशः सदृशानि तस्मात् तत्सारूप्यादागमात्, उपदेशात्, अन्ययन्त्रदर्शनात् युक्तितश्च कारयेत् ॥ ५ ॥

समाहितानि यन्त्राणि खरश्लक्ष्णमुखानिच ।
सुदृढ़ाणि सुरूपाणि सुग्रहाणि च कारयेत् ॥६॥

॥ स्वस्तिकयन्त्रम् ॥

तत्र स्वस्तिकयन्त्राणि अष्टादशांगुलप्रमाणानि सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमार्जारश्वृगालमृगै र्वारुककाककंककुररचाषभासशशघात्युलूकचिल्लश्येनगृध्रक्रौंचभृङ्गराजाञ्जलिकर्णावभञ्जननन्दीमुखमुखानि, मसूराकृतिभिः कीलैरवबद्धानि मूलेऽकुंशवदावृतवारंगाणि, अस्थिविदष्टशल्योद्धरणार्थमुपदिश्यंते, ॥ ७ ॥

॥ सन्दंशयन्त्रम् ॥

सनिग्रहो अनिग्रहश्च सन्दंशौ षोड़शाङ्गुलौ भवतः त्वङ्मांसशिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते ॥ ८ ॥

अथाङ्गहृदये सुश्रुततःसन्दंशभेदेमुचुण्डीयन्त्रं पृथगेवपठ्यतेतद्यथा

मुचुण्डी सूक्ष्मदन्तर्जुर्मूलेरुचकभूषणा ।
गम्भीरव्रणमांसानामर्मणः शेषितस्य च ॥८॥

॥ तालयन्त्रम् ॥

तालयन्त्रे द्वादशाङ्गुले मत्स्यतालुवदेकतालुद्वितालुके कर्णनासानाड़ीशल्यानामाहरणार्थम् ॥ ९ ॥

॥ नाड़ीयन्त्रम् ॥

नाड़ीयन्त्राणि, अनेकप्रकाराणि अनेकप्रयोजनानि, एकतोमुखानि, उभयतोमुखानि, तानि स्रोतोगतशल्योद्धरणार्थम्, रोगदर्शनार्थम्, आचूषणार्थं, क्रियासौकर्य्यार्थं चेति । तानिस्रोतोद्वारपरिणाहानि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथायोगपरिणाहदीर्घाणिच, भगन्दरार्शोऽर्बुदव्रणवस्त्युत्तरवस्तिमूत्र-वृद्धिदकोदरधूमनिरुद्धप्रकशसन्निरुद्धगुदयन्त्राणि अत्रैववक्ष्यामः ॥१०॥

पञ्चमुखी नाड़ी

दशांगुलाद्धनाहान्तः कण्ठशल्यावलोकनी ।
नाड़ीपञ्चमुखच्छिद्रा चतुष्कर्णस्य संग्रहे ॥ ११ ॥

त्रिमुखी नाड़ी

बारंगस्य द्विकर्णस्य त्रिछिद्रा तत्प्रमाणतः ।
बारंगकर्णसंस्थानानाहदैर्घ्यानुरोधतः ॥ १२ ॥
नाड़ीरेवंविधाश्चान्या द्रष्टुं शल्यानि कारयेत् ।

शल्यनिर्घातिनी नाड़ी

पद्मकर्णिकया मूर्ध्नि सदृशी द्वादशांगुला ॥ १३ ॥
चतुर्थसुषिरा नाड़ी शल्यनिर्घातिनी मता ।

अर्शोयन्त्रम् ।

अर्शसां गोस्तनाकारं यन्त्रकं चतुरंगुलम् ॥ १४ ॥
नाहे पञ्चांगुलं पुंसां प्रमदानां षडंगुलम् ।
द्विच्छिद्रं दर्शने व्याधेरेकछिन्द्रन्तु कर्मणि ॥ १५ ॥
मध्येऽस्य त्र्यंगुलं छिद्रमंगुष्टोदरविस्तृतम् ।
अर्धांगुलोच्छ्रितोद्वृत्तकर्णिकन्तु तदूर्ध्वतः ॥१६॥ वा०सू० २५अ०

अश्ववैद्यकेतु तुरंगस्यार्शोदर्शनार्थमर्शोयन्त्रमपि दृश्यते, तद्यथा

यन्त्रं षडंगुलं विद्याच्छिद्रं पञ्चांगुलं भिषक् ।
अधोऽर्धांगुलविस्तीर्णं दैर्घ्येणाप्यंगुलत्रयम् ॥
उभयोः पार्श्वयोस्तस्य कुर्याच्छिद्रद्वयं बुधः ।
अर्शस्तेन तु बाह्यस्य द्विच्छिद्रेण विलोकयेत् ॥
एकछिद्रेण वै कर्म कुर्याच्छेदादिपूर्वकम् ।
पातितस्य सुबद्धस्य तुरंगस्य विचक्षणः ॥ इति ॥ अश्ववैद्यके

शमीयन्त्रम्

शम्याख्यं तादृगच्छिद्रं यन्त्रमर्शःप्रपीड़नम् ।
सर्वथापनयेदोष्ठं छिद्रादूर्ध्वं भगन्दरे ॥ १७ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छिद्रादूर्ध्वं हरेदोष्ठमशोयन्त्रस्य यन्त्रवित् ।
ततोभगन्दरे दद्यादेतदर्धेन्दुसन्निभम् ॥
घ्राणार्बुदार्शसामेकच्छिद्रा नाड्यंगुलद्वया ।
प्रदेशिनीपरीणाहा स्याद्भगन्दरयन्त्रवत् ॥ १८ ॥ तं०

अंगुलीत्राणकयन्त्रम् ।

अंगुलीत्राणकं दान्तं बार्हं वा चतुरंगुलम् ।
द्विच्छिद्रं गोस्तनाकारं तद्वक्त्रविवृतौ सुखम् ॥ १९ ॥

॥ योन्यर्बुदयन्त्रम् ॥

योनिव्रणेक्षणं मध्ये सुषिरं षोड़शांगुलम् ।
मुद्रावद्धं चतुर्भित्तमम्भोजमुकुलाननम् ॥ २० ॥
चतुःशलाकमाक्रान्तं मूले तद्विकसेन्मुखे ।

अस्य यन्त्रस्य कल्पनायां चत्वारि खण्डानि तथा कार्याणि यथा मुद्रिकया बद्धानि मिलितानि च पद्ममुकुलाकारमुखा, अन्तःसुषिरा षडंगुलपरिणाहवती नाड़ी स्यात् , ततस्तन्मध्ये प्रत्येकं खण्डसंलग्नं चतस्रः शलाका आमुखात् सन्निवेश्य शलाकानां मध्यभागे तथा बध्नीयात् यथा शलाकामूलपीड़नेन यन्त्रस्य मुखं विकसेत् ।

यन्त्रे नाडीव्रणाभ्यंगक्षालनाय षडंगुले ॥
बस्तियन्त्राकृती मूले मुखेंगुष्ठकलायखे ।
अग्रतोऽकर्णिके मूले निबद्धमृदुचर्मणी ॥ २२ ॥

॥ व्रणबस्ति ॥

व्रणबस्तेस्तुनेत्रंस्यात् श्लक्ष्णमष्टांगुलोन्मितम्
मुद्गच्छिद्रं गृद्ध्रपक्षनलिकापरिणाहि च ॥ २२ ॥ शार्ङ्गधरे ।
द्विद्वारा नलिका पिच्छनलिका वेदकोदरे ।
शलाकाख्यानि यन्त्राणि नानाकर्माकृतीनि च ॥ २३ ॥

शलाकायन्त्रम्

यथायोगप्रमाणानि तेषामेषणकर्मणि ।
उभे गण्डूपदमुखे स्रोतोभ्यः शल्यहारिणी ॥ २४ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मसूरदलवक्त्रे द्वे स्यातामष्टनवांगुले ।
शंकवः षट् उभौतेषां षोड़श द्वादशांगुलौ ॥ २५ ॥

व्यूहनेऽहिफणावक्त्रौ द्वौ दशद्वादशांगुलौ ।
चालने शरपुंखास्यौ आहार्ये बड़िशाकृती ॥ २६ ॥

नतोऽग्रे शंकुना तुल्यः गर्भशंकुरिति स्मृतः ।
अष्टांगुलायतस्तेन मूढ़गर्भं हरेत् स्त्रियाः ॥ २७ ॥

अश्मर्याहरणे सर्पफणावद्वक्त्रमग्रतः ।
शरपुंखमुखं दन्तपातनं चतुरंगुलम् ॥ २८ ॥

कार्पासविहितोष्णीषाः शलाकाः षट् प्रमार्जने ।
पायावासन्नदूरार्थे द्वे दशद्वादशांगुले ॥ २९ ॥

द्वे षट्सप्तांगुले घ्राणे कर्णेऽष्टनवांगुले ।
कर्णेशोधन मश्वत्थपत्रप्रान्तस्रुवाननम् ॥ ३० ॥

शलाका जाम्बवोष्ठानां क्षारेऽग्नौ च पृथक् त्रयम् ।
युञ्ज्यात् स्थूलाणुदीर्घाणां शलाकामन्त्रवर्त्मनि ॥ ३१ ॥

मध्योर्ध्ववृत्तदण्डाञ्च मूले चार्धेन्दुसन्निभाम् ।
कोलास्थिदलतुल्यास्या नासार्शोऽर्बुददाहकृत् ॥ ३२ ॥

अष्टांगुला निम्नमुखास्तिस्रः क्षारौषधक्रमे ।
कनीनीमध्यमानामी नखमानसमै र्मुखैः ॥ ३३ ॥

वा. सू. २५ अ.

॥ धूमयन्त्रं ॥

धूमनेत्रन्तु कनिष्ठिकापरिणाहि अग्रे कलायमात्रस्रोतो मूले चागुष्ठपरिणाहम् धूमवर्तीप्रवेशयोग्यं स्रोतः, अंगुलानि अष्टा चत्वारिंशत् प्रायोगिके द्वात्रिंशत्स्नेहने चतुर्विंशतिः वैरेचने षोड़शाङ्गुलं कासघ्ने वामनीये, एतेऽपिकोलास्थिमात्रछिद्रे भवतः, व्रणनेत्रमष्टाङ्गुलं व्रण-धूपनार्थं कलायपरिमण्डलं कुलत्थवाहिस्रोतः ॥ ३४ ॥

शरावसम्पुटच्छिद्रे नाड़ीं न्यस्य दशांगुलाम् ।
अष्टांगुलां वावक्त्रेण कासवान् धूममापिवेत् ॥ वा. सू.

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ वस्तियन्त्रम् ॥

साम्वत्सरिकाष्टद्विरष्टवर्षाणां षड्दशांगुलप्रमाणानि, कनिष्टिकानामिकामध्यमांगुलीपरिणाहानि अग्रे चाध्यर्धांगुल द्व्यगुलार्द्ध तृतीयांगुलसन्निविष्टकर्णिकानि कंकश्येनवर्हि-पक्षनाड़ीतुल्यप्रवेशानि मुद्गमाषकलायमात्रस्रोतांसि विदध्यान्नेत्राणि, पञ्चविंशतेरूर्ध्वं द्वादशांगुलं मूलेगुष्ठोदरपरिणाहम् अग्रे कनिष्ठोदरपरीणाहम् अंगुलसन्निविष्टकर्णिकम् गृध्रपक्षनाड़ीतुल्यप्रवेशं कोलास्थिमात्रछिद्रम् क्लिन्नकलायमात्रछिद्रम् इत्येके। सर्वाणि मूले वस्तिनिबन्धनार्थं द्विकर्णिकानि, आसप्ततेरिदम्मानम् सप्ततेरूर्ध्वमप्येतदेव ॥ ३५ ॥

॥ वस्तिदोषाः ॥

ह्रस्वं दीर्घं तनु स्थूलं जीर्णं शिथिलबंधनम् ।
पार्श्वछिद्रं तथावक्रम् अष्टौ नेत्राणि वर्जयेत् ॥ ३६ ॥
अप्राप्त्यतिगतिक्षोभकर्षणक्षणनस्रवाः ।
गुदपीड़ा गति र्जिह्मा तेषां दोषा यथाक्रमम् ॥ ३७ ॥
मांसलच्छिद्रविषमस्थूलजालकबातलाः ।
छिन्नः क्लिन्नश्च तानष्टौ वस्तीन् कर्मसु वर्जयेत् ॥ ३८ ॥
गतिवैषम्यविस्रत्वस्रावयदौर्ग्राह्यनिस्रवाः ।
फेनिलच्युतधार्यत्वं वस्तेः स्याद्वस्तिदोषतः ॥ ३९ ॥

चरकसंहितायाम्

चतुर्दशांगुलं नेत्रमातुरांगुलसम्मितम् ।
मालतीपुष्पवृन्ताग्रं छिद्रं सर्षपनिर्गमम् ॥ ४० ॥
मेढ्रायामसमं केचिदिच्छन्ति खलु तद्विदः ।
स्नेहप्रमाणं परमं प्रकुञ्चश्चात्र कीर्तितः ॥ ४१ ॥
पञ्चविंशादधोमात्रां विदध्याद् बुद्धिकल्पिताम् ।
निविष्टकर्णिकं मध्ये नारीणां चतुरंगुले ॥ ४२ ॥
मूत्रस्रोतः परीणाहं मुद्गवाहि दशांगुलम् ।
तासामपत्यमार्गे तु निदध्या च्चतुरंगुलम् ॥ ४३ ॥
द्व्यगुलं मूत्रमार्गे तु कन्यानां त्वेकमंगुलम् ।
विधेयं चांगुलं तासां विधिवद्वक्ष्यते मया ॥ ४४ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुष्पनेत्रञ्च हैमं स्यात् सूक्ष्ममुत्तरवस्तिकम् ।
जातिपुष्पस्य वृन्तेन समं गोपुच्छसन्निभम् ॥ ४५ ॥
रौप्यं वा सर्पपच्छिद्रं द्विकर्णं द्वादशांगुलम् ॥

चरके

शृङ्गलक्षणम् ।

त्र्यंगुलास्यं भवेच्छृङ्गं चूषणेऽष्टादशांगुलम् ।
अग्रे सिद्धार्थकच्छिद्रं सुनद्धं चूचुकाकृति ॥४६॥ वा. सू. २५ अ.

तन्त्रान्तरे शृङ्गलक्षणम् ।

विषाणं श्वेतगोरिन्दुचक्रं सप्तांगुलायतम् ॥
क्षिप्तान्तः पिचुपेशीकं योज्यंवातयुतेऽसृजि ॥ ४७ ॥
उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्तितम् ।
तस्माद्वातोपसृष्टे तु हितं तदवसेचने ॥ ४८ ॥
स्याद् द्वादशाङ्गुलोऽलाबु नाहे त्वष्टादशांगुलः ।
चतुस्त्र्यंगुलवृत्तास्यो दीर्घोऽन्तः श्लेष्मरक्तहृत् ॥ ४९ ॥
अष्टांगुलपरिणाहा चतुरंगुलनालसम्मिता सुमुखी ।
कृष्णमृदालिप्ततनुः श्रेष्ठा रक्तावसेचनेऽलाबुः ॥ ५०
अलाबु कटुकं रुक्षं तीक्ष्णञ्च परिकीर्तितम्
तस्मात् श्लेष्मोपसृष्टे तु हितं तदवसेचने ॥ ५१ ॥
तद्वद् घटी हिता गुल्मबिलयोन्नमने च सा ।

अनुयन्त्राण्ययस्कान्तरज्जुवस्त्राश्ममुद्गराः ।
ब्रध्नान्त्रजिह्वावालाश्च शाखानखमुखद्विजाः ५२ ॥
कालः पाकः करः पादो भयं हर्षश्च तत्क्रिया ।
उपायवित्प्रबिभजेदालोच्य निपुणं धिया ॥ ५३ ॥
निर्घातनोन्मथनपूरणमार्गशुद्धि-
संव्यूहनाहरणबंधनपीड़नानि ॥
आचूषणोन्नमननामनचालभंग ।
व्यावर्तनर्जुकरणानि च यन्त्रकर्म ॥ ५४ ॥

निवर्तते साध्ववगाहते च ग्राह्यं गृहीत्वोद्धरते च यस्मात् ।
यन्त्रेष्वतः कंकमुखं प्रधानं स्थानेषु सर्वेष्वधिकारि चैव ॥ ५५ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1. Ardhadhara shastra.



2. Atimukha shastra.



3. Ara shastra.

4. Badisha shastra.



5. Dantashanku shastra.



7. Karapatra shastra.





6. Eshani shastra.









8. Antarmukha kartarika.

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्रातिस्थूलमसारमग्राहि विषमग्राहि वक्रं शिथिलमत्युन्नतं मृदुकीलं मृदुमुखं मृदुपाशमतिदीर्घमतिह्रस्वं चेति द्वादश यन्त्रदोषाः।५६।

एतै र्दोषै र्विनिर्मुक्तं यन्त्रमष्टादशांगुलम् ।
प्रशस्तं भिषजा ज्ञेयम् तद्धि कर्मसु योजयेत् ॥ ५७ ॥
दृश्यंसिंहमुखाद्यैस्तु गूढ़ंकंकमुखादिभिः ।
निर्हरेत्तु शनैः शल्यं शस्त्रयुक्तिव्यपेक्षया ॥ ५८ ॥

इति शल्यतंत्रसमुच्चयेतृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः

अथातः शस्त्राध्यायं व्याख्यास्यामः ॥

विंशतिः शस्त्राणि, तद्यथा मण्डलाग्र-करपत्र-वृद्धिपत्र-नखशस्त्रमुद्रिकोत्पलपत्रार्धधार-सूची-कुशपत्राटीमुख-शरारीमुखान्तर्मुख-त्रिकूर्चक-कुठारिका-व्रीहिमुखारा-वेतसपत्र-वड़िश-दन्तशंकवश्चेति ॥ १ ॥

॥ मण्डलाग्रलक्षणम् ॥ तन्त्रान्तरतः ॥

यदग्रे मण्डलं वृत्तं क्षुरसंस्थानमेव च ।
मण्डलाग्रं विजानीयात् प्रमाणन्तु षडंगुलम् ॥ २ ॥
मण्डलाग्रं फले तेषाम् तर्जन्यन्तर्नखाकृति ।
लेखने छेदने योज्यं पोथकीशुण्डिकादिषु ॥ ३ ॥

॥ करपत्रलक्षणम् ॥

छेदेऽस्थ्नांकरपत्रन्तु खरधारं दशांगुलम् ।
विस्तारे द्व्यंगुलं सूक्ष्मदन्तं सुत्सरुबंधनम् ॥ ४ ॥

तत्र मण्डलाग्रकरपत्रे स्यातां छेदने लेखने च ॥ ५ ॥

॥ ऋज्वग्रवृद्धिपत्रलक्षणम् ॥

वृद्धिपत्रं क्षुराकारं छेदभेदनपाटने ।
ऋज्वग्रमुन्नते शोफे ॥ ६ ॥

॥ नताग्रवृद्धिपत्रलक्षणम् ॥

अतोऽन्यथा वृद्धिपत्रं गम्भीरे शोफे नताग्रम् ॥ ७ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ नखशस्त्रम् ॥

वक्रर्जुधारं द्विमुखं नखशस्त्रं नवांगुलम् ।
सूक्ष्मशल्योद्धृतिच्छेदभेदप्रच्छन्नलेखने ॥ ८ ,

॥ मुद्रिकाशस्त्रम् ॥

कुर्यादंगुलिशस्त्रकम् ॥
मुद्रिकानिर्गतमुखं फले त्वर्धांगुलायतम् ।
योगतो वृद्धिपत्रेण मण्डलाग्रेण वा समम् ॥ ९ ॥
तत्प्रदेशिन्यग्रपर्वप्रमाणार्पणमुद्रिकम् ।
सूत्रवद्ध गलस्रोतो रोगच्छेदनभेदने ॥ १० । वा. सू. अ. २६

॥ उत्पलपत्रार्धधारलक्षणम् ॥

दीर्घह्रस्ववक्त्रे यथाशयम् ॥
उत्पलाध्यर्द्धधाराख्ये छेदने भेदने तथा ॥ ११ ॥

वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्रार्धधाराणि छेदने भेदने च

॥ सूचीलक्षणम् ॥

वृत्ता गूढहढ़ाः पाशे तिस्रः सूच्योऽत्र सीवने ।
मांसलानां प्रदेशानां त्र्यस्रा त्र्यंगुलमायता ॥ १२ ॥
अल्पमांसास्थिसंधिस्थव्रणानां द्व्यंगुलायता ।
व्रीहिवक्त्रा धनुर्वक्त्रा पक्वामाशयमर्मसु ॥ १३ ॥
सा सार्धद्व्यंगुला

॥ सूचीकूर्चलक्षणम् ॥

सर्ववृत्ताभिश्चतुरंगुलीभि र्वृत्तैकपीठस्थाभिः सप्तभि रश्मिभिश्च सूचीभि र्वद्धं कूर्चाभिधेयं शस्त्रम् ॥ १४ ॥

कुशपत्रलक्षणम् ।

व्यङ्गुलं रुचकं विद्यादंगुलं फलमुच्यते ।
वृत्तंस्यादंगुलं तस्य कुशपत्रस्य लक्षणम् ॥ १५ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

9. Kritharika shastra.



10. Kushapatra shastra.

11. Mandalâgra shastra.



12. Mudrikâ shastra.

13. Nakha shastra.



14. Sharârimukha shastra.



16. Trikurchaka shastra.





17. Utpalapatra shastra.





18. Vetaspatra shastra.

15. Suchi shastra.

19. Vrihimukha shastra.

20. Vridhipatra shastra.

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आटीमुखलक्षणम् ।

वृन्तं सप्तांगुलं विद्यात् तस्याग्रे फलमिष्यते ।
आटीमुखप्रकारं हि फलमंगुष्ठमायतम् ॥ १६ ॥ तं.
कुशाटावदने स्राव्ये द्व्यङ्गुलं स्यात्तयोः फलम् ॥ वा.

शरारीमुखशस्त्रलक्षणम् ।

यद्यपि शरारीमुखी या सा कर्तरीति कथ्यते इतिसुश्रुते, तथापि वाग्भटे शरार्यास्यं कर्तरीति शस्त्रद्वयं पृथगेव पठ्यते ।

शरारीव मुखं यस्य वृन्तं सप्तांगुलायतम् ।
फलं व्रीहिमुखैस्तुल्यं येाज्यं तत् स्रावणेऽपि च ॥ १७ ॥

अन्तर्मुखशस्त्रलक्षणम् ।

वृन्तं सप्तांगुलं विद्यात् तस्याग्रे फलमुच्यते ।
अष्टांगुळं प्रमाणेन जिह्मधारेण चाप्लुतम् ॥
शस्त्रमन्तर्मुखं नाम चन्द्रार्धमिव चोद्गतम् ॥ १८ ॥

तद्वदन्तर्मुखं तस्य फलमध्यर्द्धमंगुलम् ।
अर्द्धचन्द्राननं चैतत् ॥ १९ ॥

त्रिकूर्चकशस्त्रलक्षणम् ।

अंगुलानि तथाष्टौ च शस्त्रं कार्यं त्रिकूर्चकम् ।
फलैरन्तर्मुखाकारैरंगुलै रन्वितं त्रिभिः ॥ २० ॥
एकैकस्य फलस्यैषामन्तरं व्रीहिसम्मितम् ।
वृन्तं पञ्चांगुलायामं कार्यं रुचकभूषितम् ॥ २१ ॥ तं.

सूचीकुशपत्राटीमुखशरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे ॥

कुठारिकाशस्त्रम् ।

कुठारिकायाः वृन्तं स्यात् सार्द्धसप्तांगुलायतम् ।
फलमर्धागुलायामं गोदन्तसदृशंसमम् ॥ २२ ॥ तं.
पृथुः कुठारी गोदन्तसदृशार्धांगुलानना ।
तयोर्ध्वदण्डया विध्येदुपर्यस्थ्नां स्थितां सिराम् ॥ २३ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्रीहिमुखशस्त्रम् ।

शस्त्रं व्रीहिमुखं कार्यमंगुलानि षड़ायतम् ॥
द्व्यङ्गुलं तस्य वृन्तं स्यात् तत्फलं चतुरंगुलम् ॥ २४ ॥ तं.
तन्मुखं व्रीहिविस्तारं तनु संगूढ़कंटकम् ।
व्रीहिवक्त्रं प्रयोज्यञ्च तच्छिरोदरयोर्व्यधे ॥ २५ ॥

॥ आराशस्त्रम् ॥

आराद्व्यष्टांगुलायामा कर्तव्या तु विशांपते ? ।
तिलप्रमाणन्तु फलं तस्याः कार्यं समाहितम् ॥ २६ ॥
दूर्वांकुरपरीणाहं चतुरंगुलमायतम् ।
अंगुलानि तु चत्वारि वृन्तं कार्यं विजानता ॥ २७ ॥ तं.
आरार्द्धागुलवृत्तास्या तत्प्रवेशा तथोर्ध्वतः ।
चतुरस्रा तया विध्येत् शोफं पक्वामसंशये ॥ २८ ॥
कर्णपालीञ्च वहलां

॥ वेतसपत्रलक्षणम् ॥

तीक्ष्णमंगुलविस्तारं चतुरंगुलमायतम् ।
अंगुलानि तु चत्वारि वृन्तं कार्यं विजानता ॥ २९ ॥

कुठारिकाव्रीहिमुखारावेतसपत्रकाणि व्यधने सूची च ॥ ३० ॥

वड़िशशस्त्रम् ।

वड़िशे चापि कर्त्तव्ये प्रमाणेन षडंगुले ।
स्वानतं तु तयोरेकमेकं नात्यानतं भवेत् ॥ ३१ ॥
अर्धपञ्चांगुलं वृन्तं शेषं कार्यं मुखंतयोः ।
अर्द्धचन्द्राकृति वक्त्रं कार्यं नात्याननस्यतु ॥ ३२ ॥
स्वानतं नामयेत्तत्र वड़िशञ्च भिषग्वरः ।
ग्रहणे शुण्डिकार्मादेर्वड़िशं सुनताननम् ॥ ३३ ॥

दन्तशंकुशस्त्रम् ।

वृन्ताग्रेचान्तरं स्यात् यावदर्धाङ्गुलं मतम् ।
एवं हि क्रियते ह्येष दन्तशंकु विजानता ॥ ३४ ॥
शंकुवच्च मुखं तस्य कार्यमर्धांगुलायतम् ।
चतुरस्रसमं तस्य तीक्ष्णधारं समाहितम् ॥ ३५ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वृन्ताग्रं तस्य कर्त्तव्यं शस्त्रं व्रीहिमुखाकृति ।
कपालिकां शर्कराञ्च दन्तस्थां तेन शोधयेत् ॥ ३६ ॥

दन्तलेखनशस्त्रम् ।

एकधारं चतुष्कोणं प्रवद्धाकृति चैकतः ।
दन्तलेखनकं तेन शोधयेद्दन्तशर्कराम् ॥ ३७ ॥

वड़िशो दन्तशंकुश्चानताग्रे तीक्ष्णकंटकप्रथमयवपत्रमुखे वड़िशो दन्तशंकुश्चाहरणे ॥ ३८ ॥

एषणीशस्त्रम् ।

गतेरन्वेषणे श्लक्ष्णा गण्डूपदमुखैषिणी ।
भेदनार्थेऽपरा सूचीमुखामूलनिविष्टखा ।
एषणी गण्डूपदाकारमुखी एषणेआनुलोम्ये ॥३९॥
सुश्रुततोऽङ्गहृदये शस्त्राणामाधिक्यं वर्तते तद्यथा, ॥

सर्पास्यशस्त्रम् ।

सर्पास्यं घ्राणकर्णार्शश्छेदनेऽर्धांगुलं फले ॥ ४० ॥
ताम्री शलाका द्विमुखी मुखे कुरवकाकृति ।
लिंगनाशं तया विध्येत् ॥ ४१ ॥

कर्तरी शस्त्रम्

स्नायुसूत्रकचच्छेदे कर्तरी कर्तरीनिभा ।

खजशस्त्रम्

अर्धांगुलै र्मुखै र्वृत्तै रष्टाभिः कंटकैः खजः
पाणिभ्यां मथ्यमानेन घ्राणात्तेन हरेदसृक् ॥ ४२ ॥

यूथिकाशस्त्रम्

व्यधने कर्णपालीनां यूथिका मुकुलानना ।

कर्णवेधिनो शस्त्रम् ।

वहलायाश्चशस्यते ।
सूचीत्रिभागसुषिरा त्र्यंगुला कर्णवेधिनी ॥४३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनुशस्त्राणि ।

त्वक्सार-स्फटिक-काच-कुरुविन्द-जलौकाग्नि-क्षार-नख-गोजी शेफालिका-शाकपत्र-करीरवालांगुलयः ॥ ४४ ॥

जलौकः क्षारदहनकाचोपलनखादयः ।
अलौहान्यनुशस्त्राणि तान्येवं च विकल्पयेत् ॥ ४५ ॥
शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत् ।
त्वक्सारादिचतुर्वर्गं छेद्ये भेद्ये च बुद्धिमान् ॥ ४६ ॥
आहार्यछेद्यभेद्येषु नखं शक्येषु योजयेत् ।
ये स्यु र्मुखगता रोगा नेत्रवर्त्मगताश्च ये ॥ ४७ ॥
गोजीशेफालिकाशाकपत्रै र्विस्रावयेत्तु तान्
एष्येष्वेषण्यलाभे तु बालांगुल्यंकुरा हिताः ॥ ४८ ॥

तेषामथ यथायोगग्रहणसमासोपायः कर्मसु वक्ष्यते ॥ ४९ ॥

तत्र वृद्धिपत्रं वृन्तफलसाधारणे भागे गृह्णीयात् भेदनान्येवं सर्वाणि ॥ ५० ॥

वृद्धिपत्रं मण्डलाग्रं च किंचिदुत्तानेन पाणिना लेखने बहुशोऽवचार्यम्, वृन्ताग्रे विस्रावणानि ॥ ५१ ॥

विशेषेण बालवृद्धसुकुमारभीरुनारीणां राज्ञां राजपुत्राणां च त्रिकूर्चकेन विस्रावयेत् ॥ ५२ ॥

तलप्रच्छादितवृन्तमंगुष्ठप्रदेशिनीभ्यां व्रीहिमुखम् ॥

कुठारिकां वामहस्तन्यस्तां त्वितरहस्तमध्यमांगुल्यांगुष्ठविधृत्या चाभिहन्यात्. आराकरपद्मैषण्यो मूले, शेषाणि तु यथायोगं गृह्णीयात् ॥ ५२ ॥

छेदभेदनलेख्यार्थं शस्त्रं वृन्तफलान्तरे ।
तर्जनीमध्यमाङ्गुष्ठै र्गृह्णीयात्सुसमाहितः ॥ ५३ ॥
विस्रावणानि वृन्ताग्रे तर्जन्यंगुष्ठकेन च ।
तलप्रच्छन्नवृन्ताग्रं ग्राह्यं व्रीहिमुखं मुखे ।
मूलेष्वाहरणार्थं तु क्रियासौकर्यतोऽपरम् । ५४ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2

शस्त्रदोषाः ।

कुण्ठखण्डतनुस्थूलह्रस्वदीर्घत्ववक्रताः ।
शस्त्राणां खरधारत्वमष्टौ दोषाः प्रकीर्तिताः ॥ ५५ ॥
करपत्रात्तु चान्यत्र ह्यस्थिच्छेदनकार्यतः ।
खरधारं विना तत्र तत्कार्यं न भविष्यति ॥ ५६ ॥
सुग्रहाणि सुलोहानि सुधाराण्यपि चैव हि ।
अकरालानि सुध्मातसुतीक्ष्णावर्त्तितेऽयसि ॥ ५७ ॥
समाहित मुखाग्राणि नीलाम्भोजच्छवीनि च ।
नामानुगतरूपाणि सदा संन्निहितानि च ॥ ५८ ॥
स्वोन्मानार्धचतुर्थांशफलान्येकैकशोऽपि च
प्रायो द्वित्राणि युञ्जीत तानि स्थानविशेषतः ॥ ५९ ॥

शस्त्रधारावर्णनम्

मासूरी भेदनानां हि लेखनेष्वर्धमासुरी ।
विस्रावणानां धारा तु कैशिकी परिकीर्तिता ॥
कैशिकी व्यधनानां च छेदनस्यार्द्धकैशिकी ॥ ६० ॥

तेषांत्रिविधा पायना, क्षारोदकतैलेषु, तत्र क्षारपायितं शरशल्यास्थिछेदनेषु, तैलपायितं सिराव्यधनस्नायुछेदनेषु, उदकपायितं मांसछेदनभेदनपाटनेषु ॥ ६१ ॥

फलस्य पायनं वक्ष्ये वनौषधिविलेपनैः ।
येन दुर्भेद्यवर्माणि भेदयेत् तरुपर्णवत् ॥ ६२ ॥

तंत्रान्तरे

पिप्पली सैंधवंकुष्ठं गोमूत्रेणतु पेषयेत् ।
अतिशीतमनाविद्ध पीतं नष्टं तथौषधम् ॥ ६४ ॥
अनेन लेपयेच्छस्त्रं लिप्तं चाग्नौ प्रतापयेत् ।
ततो निर्वापितं तैले लौहं तत्र विशिष्यते ॥ ६४ ॥
पञ्चभिर्लवणैः पिष्टं मधुशुक्तिससर्षपैः ।
एभिः प्रलेपयेच्छस्त्रं लिप्तं चाग्नौ प्रतापयेत् ॥ ६५ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शिखिग्रीवानुवर्णाभं तप्तं पीतं तथौषधम् ।
ततस्तु विमलं तोयं पावयेच्छस्त्रमुत्तमम् ॥ ६६ ॥
आर्कं पयो हुडु विषाणमसी समेतं,
पारावतस्य शकृता च युतं प्रलेपः ।
शस्त्रस्य तैलमथितस्य ततोऽस्य तैक्ष्ण्यं,
पश्चात् शितस्य न शिलासु भवेद् विघातः ॥ ६७ ॥
क्षारे कदल्या मथितेन युक्ते,
दिनोषिते पायितमायसं तु ।
सम्यक् शितं चाश्मनिनैति भंगं
न चान्यलोहेष्वपि तस्य कौण्ठ्यम् ॥ ६८ ॥

तेषां निशानार्थश्लक्ष्णशिलामाषवर्णा धारासंस्थापनार्थं शाल्मलाफलकमिति ॥ ६९ ॥

यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम् ।
सुगृहीतं प्रमाणेन तदा कर्मसु योजयेत् ॥ ७० ॥

शस्त्रकोषः ।

स्यान्नवांगुलविस्तारः सुघनो द्वादशांगुलः ।
क्षौमपत्रोर्णकौशेयदुकूलमृदुचर्मजः ॥ ७१ ॥
विन्यस्तपाशः सुस्यूतः सान्तरोर्णास्थशस्त्रकः ।
शलाकापिहितास्यश्च शस्त्रकोशः सुसम्मतः ॥ ७२ ॥
शस्त्राण्येतानि मतिमान् शुद्धशैक्यायसानि तु ।
कार्येत्करणप्राप्तं कर्मारं कर्मकोविदम् ॥ ७३ ॥

इति शल्यतन्त्रसमुच्चये चतुर्थोऽध्यायः

॥ अथ पञ्चमोऽध्यायः

अथातः क्षारपाकविधिमध्यायं व्याख्यास्यामः ।

शस्त्रानुशस्त्रेभ्यः क्षारः प्रधानतमश्छेद्यभेद्यलेख्यकरणात् त्रिदोषघ्नत्वाद् विशेषक्रियावचारणाच्च ॥ १ ॥

तत्र क्षरणात् क्षणाद्वा क्षारः नानौषधिसमवायात्त्रिदोषघ्नः शुक्लत्वात्सौम्यः ॥ २ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य सौम्यस्यापि सतो दहनपचनदारणादिशक्तिरविरुद्धा, आग्नेयौषधि गणभूयिष्ठत्वात्। कटुक उष्ण स्तीक्ष्णः पाचनो विलयनः शोधनो रोपणः स्तम्भनो लेखनः कृम्यामकफकुष्ठविषमेदसां चोपहन्ता पुंस्त्वस्य चाति सेवितः ॥ ३ ॥

स द्विविधः प्रतिसारणीयः पानीयश्च, तत्र प्रतिसारणीयः कुष्ठकिटिभदद्रुमण्डलकिलासभगन्दरार्बुददुष्टव्रणनाड़ीचर्मकीलतिलकालकन्यच्छव्यंगमशकवाह्यविद्रधिकृमिविषार्शस्सूपयुज्यते, सप्तसु च मुखरोगेषु उपजिह्वाधिजिह्वोपकुशदन्तवैदर्भेषु तिसृषु च रोहिणीषु एतेषु चैवानुशस्त्रप्रणिधानमुक्तम् ॥ ४ ॥

पानीयस्तु गरगुल्मोदराग्निसंगाजीर्णारोचकानाहशर्कराश्मर्य्याभ्यन्तरविद्रधिकृमिविषार्शस्सूपयुज्यते ॥ ५ ॥

अहितस्तु रक्तपित्तज्वरितपित्तप्रकृतिबालवृद्धदुर्बलभ्रममदमूर्च्छातिमिरपरीतेभ्यः, अन्येभ्यश्चैवं विधेभ्यः ॥ ६ ॥

तं चेतरदारवद्दग्ध्वा परिस्रावयेत्, अथ प्रतिसारणीयस्त्रिविधः मृदुः, मध्यः, तीक्ष्णश्च ॥ ७ ॥

तं चिकीर्षुः शरदि गिरिसानुजं शुचिरुपोष्य प्रशस्तदेशजातमनुपहतं मध्यमवयसं महान्तमसितमुष्ककमधिवास्य मन्त्रवद्बलिकर्मोपहरेत्, ततोऽपरेद्युरुत्पाट्याभिमन्त्र्यानेन मन्त्रेण ॥ ८ ॥

अग्निवीर्य ! महावीर्य ! मा ते वीर्यं प्रणश्यतु ।
इहैव तिष्ठ कल्याण ! मम कार्यं करिष्यसि ॥ ९ ॥
मम कार्ये कृते पश्चात्स्वर्गलोकं गमिष्यसि ।

श्वेतपुष्परक्तपुष्पसहस्रं जुहुयात्, खण्डशः प्रकल्प्य अवपाट्य निर्वाते देशे निचितिं कृत्वा तिलनालैरादीपयेत्, अथोपशान्ते चाग्नौ तद्भस्म पृथग्गृह्णीयात् भस्मशर्कराश्च ॥ १० ॥

अथ अनेनैव विधानेन कुटजपलाशाश्वकर्णपारिभद्रकविभीतकारग्वधतिल्वकार्कस्नुह्यपामार्गपाटलानक्तमालवृषकदलीचित्रकपूतीकेन्द्रवृक्षास्फोताश्वमारसप्तच्छदाग्निमंथगुञ्जाश्चतस्रश्च कोशातकीः समूलफलपत्रशाखाः दहेत् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः क्षारद्रोणमुदकद्रोणैः षड्भिरालोड्य सूत्रैर्वा यथोक्तैरेकविंशतिकृत्वः परिस्राव्य महति कटाहे शनैर्दर्व्या विपचेत् अवघट्टयन् ॥ १२ ॥

स यदा भवति रक्तः तीक्ष्णः पिच्छिलश्च, तमादाय महति वस्त्रे परिस्राव्येतरं विभज्य च पुनः रजनावधिश्रयेत् ; तत एव च क्षारोदकात्कुडवं अध्यर्धं वापनयेत् ३ ॥

ततः कटशर्करा भस्मशर्करा क्षीरपाकशंखनाभिरग्निवर्णाः कृत्वा आयसे पात्रे तस्मिन्नेव क्षारोदके निषिच्य पिष्ट्वा तेनैव द्विद्रोणेऽपूपलसम्मितं शंखनाभ्यादीनाम् प्रमाणं प्रतिवाप्य सततमप्रमत्तश्चैनम् अवघट्टयन्विपचेत् ॥ १ ॥

स यथा नातिसान्द्रो नातिद्रवश्च भवति तथा प्रयतेत, अथैनमागतपाकमवतार्य सुगुप्तमायसकुम्भे संवृतमुखे निदध्यादेष मध्यमः, एष एवा प्रतिवापः पक्वः सम्व्यूहिमो मृदुः ॥ १५ ॥

प्रतीवापे यथालाभं दन्तीद्रवन्तीचित्रकलाङ्गलकीपूतीकप्रवालतालपत्रोविङ्सुवर्चिकाकनकक्षीरीहिङ्गुवचाविषाः समाःश्लक्ष्णाः शुक्तिप्रमाणाः प्रतिवाप्याः स एव प्रतिवापपक्वः पाकयस्तीक्ष्णः । १६

तेषां यथाव्याधिबलमुपयोगः, क्षीणबले तु क्षारोदकमावपेत् बलकरणार्थम् ॥ १७ ॥

नैवातितीक्ष्णो न मृदुः शुक्लश्लक्ष्णोऽथपिच्छिलः ।
अविष्यन्दी शिवः शीघ्रः क्षारो ह्यष्टगुणः स्मृतः ॥ १८ ॥
अतिमार्दव शैत्योष्ण तैक्ष्ण्य पैच्छिल्य सर्पिता ।
सान्द्रताऽपक्वताहीनद्रव्यता दोष उच्यते ॥ १९ ॥

तत्र क्षारसाध्यव्याध्यार्तमुपवेश्य निर्वातातपदेशे असम्बाधे अग्र्योपहरणीयेन विधानेनोपलम्भृतसामग्रीकं ततोऽस्यतमवकाशं अवघृष्य उल्लिख्य प्रच्छयित्वा शलाकया क्षारं पातयित्वा वाक्शतमात्रमुपेक्षेत ॥ २० ॥

संरम्भात् गात्रमापीड्यन्नाचूषयन् सर्वतोऽनुसरन् उन्मूलयति मूलतः दोषान् कृत्वाच कर्मगतवेदनः स्वयमेवोपशाम्यति ॥२१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथातो क्षारप्रयोगान्व्याख्यास्यामः।

वर्त्मरोगेतु निर्भुज्य वर्त्मनिपिचुना मधूच्छिष्टेन वा कृष्णभागं प्रच्छाद्य पद्मपत्रतनुः क्षारलेपः, घ्राणजेषु त्वर्शोर्बुदेषु आदित्याभिमुखस्य उन्नमय्य नासिकाम् उपेक्ष्याश्च पञ्चाशन्मात्राः, तद्वत् श्रोत्रजेषु, गुदार्शस्सु पाणिना यन्त्रद्वारं पिधाय धारयेन्मात्राशतमेव ॥ २॥

ततः प्रमार्जनेन प्रमृज्य क्षारं सम्यग्दग्धमवेक्ष्य निर्वापयेत् मिथुनेन, शुक्लतुषोदकमस्तुक्षीरादिभिश्च, ततः परं शीतमधुरैः प्रदेहैः प्रदिह्यादिति ॥ २३ ॥

अभिष्यन्दीनि भोज्यानि क्लेदनाय च भोज्यानि, स्थिरमूलत्वात् यदिचेत् क्षारदग्धं न विशीर्य्यते, ततो धान्याम्लवीजमधुयष्टिकायुतैस्तिलैरालेपयेत्, "सुवर्णक्षीरीयुतैर्वा, ॥ २४ ॥

बिल्वद्विदंगसारवह्नि वा मालतीवृषांकोलनिम्बास्फोतपटोलीकरवीरकपत्रक्वाथेन व्रणप्रक्षालनम् ॥ २५ ॥

एषामेव कल्ककाथेन सिद्धं सर्पिर्वा रोपणं तैलं वा, नागपुष्पमञ्जिष्ठाचन्दनतिलपर्णिकासु च, यथाव्याधिदोषञ्च व्रणमुपक्रमेत् तिलाः सयष्टिमधुका रोपणेष्वस्य पूजिताः ॥ २६ ॥ अ० सं०

तत्र पक्वजाम्बवसंकाशं, ईषदवसन्नं, यथास्वविकारोपशान्तौ च रूक्ष्यायोगो भवति तद्विपर्ययेणायोगः ॥ २७ ॥ अ० सं०

नेत्रेऽतियोगाद् वर्त्मनिर्भेदेनेन्द्रियभ्रंशः स्यात् घ्राणे नासावंशतरुणास्थिदरणं संकोचो गंधाज्ञानम्। तद्वच्छ्रोत्रेष्वपि यथास्वं व्यापत् ॥२८॥ अ० सं०

गुदे विण्मूत्ररोधोऽतिसारः पुंस्त्वोपघातो गुददविदरणाच्च मृत्यु र्वा सर्वदा शोफस्तोदवेदनास्रावाः शकृन्मूत्रवातधारणाशक्ति र्वा ॥२९॥ अ० सं०

तमतिप्रवृत्तमाशु पूर्वोक्तैरेव निर्वापणैः पुनःपुनर्निर्वापयेत्, अतश्च दाह्यमतिप्रमाणं न सकृदेव दहेत् ॥ ३० ॥ अ० सं०

तत्राम्लवर्गः शमनः सर्पिर्मधुकसंयुतः।
तिलकल्कः समधुको घृताक्तो व्रणरोपणः ॥ ३१ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भक्षन्तिचात्र।

रसेनाम्लेन तीक्ष्णेन वीर्येणोष्णेन च योजितः।
आग्नेयेनाग्निना तुल्यः कथं क्षारः प्रशाम्यति ॥ ३२ ॥
एवं चेन्मन्यसे वत्स! प्रोच्यमानं निबोध मे।
अम्लवर्ज्यान्रसान् क्षारे सर्वानेव विभावयेत् ॥ ३३ ॥
कटुकस्तत्र भूयिष्ठो लवणोऽनुरसस्तथा।
अम्लेन सह संयुक्तः स तीक्ष्णलवणो रसः ॥ ३४ ॥
माधुर्य्यं भजतेत्यर्थं तीक्ष्णभावं विमुञ्चति।
माधुर्याच्छममाप्नोति बर्हिनिरद्भिरिवाप्लुतः ॥ ३५ ॥

अपराऽपि चिकित्साऽष्टाङ्गसंग्रहेऽभिहिता प्रसंगादत्रानुविधीयते ॥ ३६ ॥

ज्वरातिसारस्तृण्मोहो मूर्च्छा हृद्वेपनादिभिः।
कक्षां दहत्यग्नि रिव शरीरं क्षारविभ्रमः ॥ ३७ ॥
पाययेतातियोगे तु तं शीघ्रं सघृतं दधि।
सगुडं वा दधिसरं तैलं वा ससितोपलम् ॥ ३८ ॥
धात्रीफलकपित्थाम्लदाडिमस्वरसे घृतम्।
द्विगुणे साधितं पानसैकैः क्षारातिरुग्धरम् ॥ ३९ ॥
दाडिमामलकाम्रातकपित्थकरमर्दकान्।
आम्राच्च मातुलुंगाच्च रसं मृद्वग्निना पचेत् ॥ ४० ॥
ततोतिवृत्तक्षाराय दद्यान्मात्रां यथाबलम्।
क्षारो निवर्तते तेन प्रसादं त्वक् च गच्छति ॥ ४१ ॥ अ०सं०

अथ नैते क्षारकृत्याः, तद्यथा दुर्बल-बाल-स्थविर-भीरुसर्वाङ्गशूलोदरि-रक्तपित्ति-गर्भिणी-ऋतुमती-प्रवृद्धज्वरि-प्रमेहारः क्षत-क्षीण-तृष्णा मूर्च्छोपद्रुतक्लीवापवृत्तोद्वृत्तफलयोनयः ॥ ४२ ॥

तथा मर्मसिरा-स्नायु-संधि-तरुणास्थि-सेवनी-गलना भिनखान्तःशेफःस्रोतस्सु अल्पमांसेषु प्रदेशेषु अदग्धोश्च न दद्यादन्यत्र वर्त्मरोगात् ॥ ४३ ॥

तत्र क्षारसाध्येष्वपि व्याधिषु शूनगात्रमस्थिशूलिन मन्नद्धे पिणं हृदयसंधिपीड़ोपद्रुतं क्षारो न साधयति ॥ ४४ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषाग्निशस्त्राशनिमृत्युकल्पः क्षारो भवत्यल्पमतिप्रयुक्तः ।
सधीमता सम्यगनुप्रयुक्तो रोगान्निहन्यादचिरेण घोरान् ॥४५॥

इति शल्यतन्त्रसमुच्चये पञ्चमोऽध्यायः ॥५॥

अथ षष्ठोऽध्यायः ।

अथाऽतोऽग्निकर्मविधिमध्यायं व्याख्यास्यामः ।

क्षाराद्ग्नि र्गुरुतरः प्रतिपादितः, तद्दग्धानां रोगाणां पुनरुत्थान-विशेषाभावात् भेषज-शस्त्र-क्षारैरसाध्यानां तदुपक्रम्यत्वात् ॥ १ ॥

अथेमे दहनसम्भाराः तद्यथा पिप्पल्यजाशकृद्गोदन्तशरशलाकाजाम्बवौष्ठेतरलोहाः क्षौद्रगुडस्नेहाश्च ॥ २ ॥

तत्र पिप्पल्यजाशकृद्गोदन्तशरशलाकास्त्वग्गतानाम्, जाम्बवोष्ठेतरलोहा मांसगतानाम्, क्षौद्रगुडस्नेहाश्च सिरास्नायुसंध्यस्थिगतानाम् ॥ ३ ॥

तत्राग्निकर्म सर्वर्तुषु कुर्यात् अन्यत्रशरद्ग्रीष्माभ्याम्, तत्रापि-आत्ययिके-ग्निकर्म साध्ये व्याधौ तत्प्रत्यनीकं विधिंकृत्वा ॥ ४ ॥

सर्वव्याधिषु ऋतुषु च पिच्छिलमन्नं भुञ्जतः कर्म कुर्वीत, मूढ-गर्भोदराशोऽश्मरीभगन्दरमुखरोगेष्वभुञ्जतश्च ॥ ५ ॥

तत्रद्विविधमग्निकर्माहुरित्येके त्वग्दग्धं, मांसदग्धञ्च इह तु सिरा-स्नायुसंध्यस्थिष्वपि न प्रतिषिद्धोऽग्निः किन्तु सर्पविषे सिरास्नायु संध्यस्थिमर्मसु प्रतिषिद्धम् ॥ ६ ॥ यदुक्तं काश्यपीये

न शिरास्नायुसंध्यस्थिमर्मस्वपि कथंचन ।
दंशस्योत्कर्तनं कार्यं दाहो वा भिषजाग्निना ॥ ७ ॥

त्वङ्मांससिरास्नायुस्थिते अत्युग्ररुजे वायावुच्छ्रितकठिनसुप्त-मांसे व्रणे ग्रन्थ्यर्शोऽर्बुदभगन्दरापचीचर्मकीलतिलकालकान्त्रवृद्धिश्लीपदसंधिशिराछेदनादिषु नाड़ीशोणितातिप्रवृत्तिषुचाग्निकर्म कुर्यात् ॥८॥

तत्र रोगाधिष्ठानभेदादग्निकर्म चतुर्द्धा भिद्यते तद्यथा वलयविन्दु-लेखाप्रतिसारणानि दहनविशेषाः ॥ ९ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रोगस्य संस्थानमवेक्ष्य सम्यक् नरस्य मर्माणि बलाबलञ्च ।
व्याधिं तथर्तुञ्च समीक्ष्य सम्यक् ततो व्यवस्येद्भिषगग्निकर्म ॥१०॥

तत्र सम्यग्दग्धे मधुसर्पिर्भ्यामभ्यंगः ॥

अथेमानग्निना परिहरेत्, पित्तप्रकृतिमन्तःशोणितम् भिन्नकोष्ठमनुद्धतशल्यम् दुर्बलं बालं वृद्धं भीरुमनेकव्रणपीड़ितमस्वेद्यांश्चेति ॥ ११ ॥

अत ऊर्ध्वमितरथा दग्धलक्षणं वक्ष्यामः, स्निग्धं रुक्षं वाऽश्रित्य द्रव्यमग्निर्दहति, अग्निसंतप्तो हि स्नेहः सूक्ष्मशिरानुसारित्वात् त्वगादीननुप्रविश्याशु दहति तस्मात्स्नेह दग्धेऽधिका रुजो भवन्ति ॥ १२ ॥

अथ दाहार्तमातुरं कृत स्वस्त्ययनमुपहृतसर्वोपकरणं प्राक् शिरः सम्विधूमावलम्बितं कृत्वा वैद्यो निर्धूमकृतहस्तिस्थरदीप्तखदिरवदराद्यांगारैः अयोघटनप्रकारेण भस्त्रानिलाध्मातैर्व्यजनेनोर्ध्वनिर्गच्छज्ज्वालयापादितापाद्यमानभासुराग्निवर्णैर्जाम्बवोष्ठादिभिः व्याधिप्रदेशवशाद् वलयार्द्धचन्द्रस्वस्तिकाद्यापदबिन्दुलेखाप्रतिसारणविकल्पेन मुहुर्मुहुर्हितोपहिताभिर्वाग्भिराश्वासयन्नातुरंदहेदासम्यग् दाहलिङ्गोत्पतेः ॥ १५ ॥

उच्छूनशुषिरप्रलूनदन्तनाड़ीजन्तुदुष्टव्रणेषु तु स्नेहमधूच्छिष्टमधुशुक्तैः पूरयित्वा दहेत् सम्यग्दग्धे च मिथुनंदद्याच्छीतस्निग्धाँश्च प्रदेहान् ॥ १६ । अ० सं०

सम्यग्दग्धलिङ्गं पुनः सशब्दं दहनं दुर्गन्धित्वं त्वक्संकोचश्च त्वग्दग्धे, कपोतवर्णताल्पश्वयथुवेदनाशुष्कसंकुचितव्रणता च मांसदग्धे ॥ १७ ॥

कृष्णोन्नतव्रणतास्थितेचरक्तं लसीका (शोणितस्य तन्वच्छजलभागः सर्वधात्वाशयपोषणा) स्रुतिः सिरादग्धे ॥ १८ ॥

कृष्णारुणकर्कशस्थिरव्रणता स्नाय्वादि दग्धे च ॥ १९ ॥

दुर्दग्धातिदग्धयो र्लक्षणं वक्ष्यामः इमौ अष्टाङ्गहृदयेप्रमाददग्धेऽभिहितौ ॥ २० ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रमाददग्धंत्रिविधं भवति तुत्थं दुर्दग्धमतिदग्धञ्च; यद्विवर्णं म्लुप्यतेऽतिमात्रन्तत्म्लुष्टं (तुत्थं), यत्रोतिष्ठन्तिस्फोटास्तीव्रा दाहरागोपारुग्युक्ताः चिराच्चोपशाम्यन्ति तद्दुर्दग्धमतिदग्धे तूग्ररुजता धूमायनं मांसावलम्बनं शिरादिव्यापदो गम्भीरव्रणता ज्वरदाहतृण्मूर्च्छाहृदयशोणितातिप्रवृत्तिस्तन्निमित्ताश्चोपद्रवाःकृच्छ्रेण रोहणं, रूढे च विवर्णता इति ॥ २१ ॥

स्नेहदाहस्तु कष्टतरो भवति, स हि स्नेहस्य सूक्ष्मशिरामार्गानुसारित्वाद् दूरमनुप्रविशति ॥ २२ ॥

भवन्ति चात्र ।

तुत्थस्याग्निप्रतपनं कार्यमुष्णंन्तथौषधम् ।
स्त्याने रक्ते हिमेनोष्मा निष्क्रामति यतो बहिः ॥ २३ ॥
वेदना वर्द्धते तेन रुधिरञ्च विदह्यते ।
उष्णान्निष्क्रामयत् कुर्यादुष्माणंमन्दता रुजः ॥ २४ ॥
शीतामुष्णाञ्च दुर्दग्धे क्रियां कुर्यात् भिषक् पुनः ।
घृतालेपनसेकांस्तु शीतानेवास्य कारयेत् ॥ २५ ॥
सम्यग्दग्धे तुगाक्षीरीशल्लचन्दनगैरिकैः ।
सामृतैः सर्पिषा सुनिग्धैरालेपं कारयेद्भिषक् ॥ २६ ॥
शान्तोष्मणि परं कुर्यात् पित्तविद्रधिनाशनम् ।
अतिदग्धे विशीर्णानि मांसान्युद्धृत्यशीतलाम् ॥ २७ ॥
क्रियां कुर्याद् भिषक् पश्चाच्छालितण्डुलकणडनैः ।
तिन्दूकीत्वक्कषायै वा पिष्टैः साज्यै विलेपयेत् ॥ २८ ॥
गुडूच्याश्छादयेत्पत्रैरथवापोदिकैर्व्रणम् ।
भेषजं चास्य कुर्वीत सर्वं पित्तविसर्पवत् ॥
स्नेहदग्धे भृशतरं रुक्षां तत्र तु योजयेत् ।
शस्त्रक्षाराग्नयो यस्मान्मृत्योः परममायुधम् ॥
अप्रमत्तो भिषक् तस्मात् तान् सम्यगवचारयेत् ॥ ३० ॥

इति शल्यतन्त्रसमुच्चये ऽग्निकर्मविधिर्नाम षष्ठोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

93 वां अध्याय

अथ सप्तमोऽध्यायः

अथातो जलौकावचारणीयमध्यायं व्याख्यास्यामः ॥ १ ॥

नृपाढ्य-बाल-दुर्बल-नारी-सुकुमारभीरु-स्थविराणामनुग्रहार्थं परम-सुकुमारोऽयं शोणितावसेचनोपायोऽभिहितो जलौकसः ॥ २ ॥

तत्रवातपित्तकफदुष्टशोणितं शृङ्गजलौकालाबुभिरवसेचयेत्, यथा-क्रमम्, अथवा सर्वाणि सर्वैर्वा ॥ ३ ॥

अलाबुशृङ्गयन्त्राध्यायेऽभिहिते ।

शीताधिवासा मधुरा जलौका वारिसम्भवा ।
तस्मात्पित्तोपसृष्टे तु हिता सा चावसेचने ॥ ४ ॥

तत्र प्रच्छिते तनुवस्तिपटलावनद्धेन शृङ्गेण शोणितमवसेचयेदा-धूषणात्, सान्तर्दीपया अलाब्वा ॥ ५ ॥

अथ जलायुका वक्ष्यन्ते । जलमायुरासामितिजलायुका जलमा-सामोक इति जलौकसः, ता द्विविधाः स्त्रियःपुमांसश्च तासु सुकुमारा-स्तनुत्वचोऽल्पशिरस्का बृहदधरकायाश्च स्त्रियः, विपरीताःपुमांसः ।६॥

अ० सं० ।

तत्र बहुदोषेषु चिरोत्थेष्वामयेषु पुमांसो योजयितव्या विपरीतेषु स्त्रियः । ताः पुनर्द्वादश, अनेनभेदेन ॥ ७ ॥ अ० सं०

तासां सविषाःषट् तावत्यएव निर्विषाः । तद्यथा सविषाः कृष्णा, कर्बुरा, अलगर्दा, इन्द्रायुधा, सामुद्रिका, गोचन्दना चेति ॥ ८॥

तासु अञ्जनचूर्णवर्णापृथुशिरा, कृष्णा, वर्मीमत्स्यवदायताङ्गिन्नोन्न-तकुक्षिःकर्बुरा रोमशामहापार्श्वाकृष्णमुखी अलगर्दा, इन्द्रायुधवदूर्ध्व-राजिभिश्चित्रितेन्द्रायुधा, ईषदसितपीतिकाविचित्रपुष्पाकृतिचित्रा सामुद्रिका, गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दना-चेति ॥ ९ ॥

ताभिर्दष्टे पुरुषे दंशेश्वयथुरतिमात्रंकण्डूः मूर्च्छा ज्वरो दाहश्छ-र्दिर्भेदः सदनमिति लिङ्गानि ॥ १० ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र महागदः पानालेपननस्यकर्मादिषूपयोज्यः इन्द्रायुधादष्टम साध्यम्; इत्येताः सविषाः सचिकित्सिता व्याख्याताः ॥ ११ ॥

अथ निर्विषा वक्ष्यन्ते कपिला, पिंगला, शंकुमुखी, मूषिका पुण्डरीकमुखी, सावरिका चेति ॥ १२ ॥

तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्ध मुद्गवर्णा कपिला, किञ्चिद्रक्ता वृत्तकाया पिंगाशुगा च पिङ्गला, यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शंकुमुखी, मूषिका कृति वर्णाऽनिष्टगन्धा च मूषिका, मुद्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी, स्निग्धा पद्मपत्रवर्णाऽष्टादशांगुला सावरिका, सा च पश्वर्थे ॥ १३ ॥

तासां यत्नपांड्यसह्य पौतनादीनि क्षेत्राणि, तेषु महाशरीरा बलवयः शीघ्रपायिन्यो महाशना निर्विषाश्च विशेषेण भवंति ॥ १४ ॥ तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषशैवालकोथजाता कलुषेष्वम्भःसु सविषाः ॥ १५ ॥ पद्मोत्पल-नलिन-कुमुद-सौगन्धि-कुवलय-शैवाल कोथजाता विमलेष्वम्भः सु निर्विषाः ॥१६॥ भवतिचात्र

क्षेत्रेषु विचरन्त्येताः सलिलाढ्यसुगंधिषु
न च संकीर्णचारिण्यो न च पंकेशयाः सुखाः ॥१७॥

तासां प्रग्रहणमाद्रचर्मणाऽन्यैर्वा प्रयोगैर्गृह्णीयात्, अथैनां नवे महति घटे सरस्तडागोदकपंकमावाप्यनिदध्यात् भक्ष्यार्थं चासा मुपहरेच्छैवालं वल्लूरमोदकाँश्च कन्दाँश्चूर्णीकृत्य ॥१८॥

शुश्रूषार्थं तृणमोदकानि च पत्राणि च दद्यात् त्र्यहाच्चान्यज्जलं भक्ष्यञ्च दद्यात् सप्तरात्रात्सप्तरात्राच्च घटमन्यं संक्रामयेत् ॥१९॥

॥ भवतिचात्र ॥

स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः ॥
अग्राहिण्यो ऽल्पपायिन्यः सविषाश्च न पूजिताः ॥२०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ जलौकोवसेकसाध्यव्याधिव्याधितमुपवेश्य संवेश्य वा विरुद्य चास्य तमवकाशं मृद्गोमयचूर्णैर्यत्नरुजः स्यात् ॥२०॥

गृहीताश्च ताः सर्षप-रजनी-कल्कोदक-प्रदिग्धगात्रीः सलिल-सरकमध्ये मुहुर्तस्थिता विगतक्लमा ज्ञात्वा तासु रोगं ग्राहयेत् ॥२२॥

सूक्ष्मशुक्लार्द्रपिचुप्लोतावच्छन्नां कृत्वा मुखमपावृणुयात् ॥२३॥

अगृह्णन्त्यश्चेत्क्षीरबिंदुं शोणितबिंदुं वा दद्यात्, शस्त्रपदानि वा कुर्वीत, यद्येवमपि न गृह्णीयात् तदान्यां ग्राहयेत् ॥२४॥

यदा च निविशतेऽश्वखुरवदाननं कृत्वाऽन्नम्य च स्कंधं तदा जानीयाद् गृह्णातीति, गृहणन्तींचार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च ॥२५॥

दंशे तोदकण्डूप्रादुर्भावे जानीयात्, शुद्धमियमादत्त इति शुद्धमादानामपनयेत्, अथशोणितगंधेन न मुञ्चेन्मुखमस्याः सैंधवचूर्णेनावकिरेत् ॥२६॥

अथ पतितां तण्डुलकणडनप्रदिग्धगात्रीं वामहस्तांगुष्ठांगुलिभ्यां गृहीतपुच्छां दक्षिणहस्तांगुष्ठांगुलिभ्यां शनैः शनैरनुलोममनुमार्जयेत्, आमुखाद् वामयेत् तावत् यावत् सम्यग् वान्तलिङ्गानीति ॥२७॥

सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामासति चरेत् यासीदति न चेष्टते, सा दुर्वान्ता तां पुनः सम्यग्वामयेद् दुर्वान्ताया व्याधिरसाध्य इन्द्रमदोनामभवति, अथ सुवान्तां पूर्ववत् संनिदध्यात् ॥२८॥

शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान् मधुनाऽवघट्टयेत्, शीताभिरद्भिश्च परिषेचयेत्, वध्नीत वा कषाय-मधुर-स्निग्धैः प्रदेहैश्च प्रदिह्यात् ॥२९॥

गृह्णन्त्यश्च जलायुकाः पूर्वं शुद्धशोणितं कथं न गृह्णन्ति । दृष्टान्तं चात्राभिहितं वाग्भटेन, यथा—

आदत्ते प्रथमं हंसः क्षीरं क्षीरोदकादिव ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपसंहारमाह ।

क्षेत्राणि ग्रहणं जातिः पोषणं सावचारणम् ॥
जलौकसां च यो वेत्ति तत्साध्यान् स जयेद्गदान् ॥३१॥

इति शल्यतन्त्रसमुच्चये सप्तमोऽध्यायः ।

अथाष्टमोऽध्यायः

अथातो योग्यासूत्रीयमध्यायं व्याख्यास्यामः ।

अधिगतसर्वशास्त्रार्थमपि शिष्यं योग्यां कारयेत् स्नेहादिषुछेद्यादिषु च कर्मपथमुपदिशेत्सुबहुश्रुतोऽप्यकृतयोग्यः कर्मस्वयोग्यो भवति ॥१॥

तत्र पुष्पफलालाबूकालिन्दकत्रपुसैर्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्शयेत्, उत्कर्तनपरिकर्तनानि वोपदिशेत् ॥ २ ॥

इतिवस्ति-प्रसेवकप्रभृतिषूदकपंकपूर्णेषु भेद्ययोग्याम् ॥ ३ ॥

सरोम्णि चर्मणि आतते लेख्यस्य ॥ ४ ॥

मृत्पशुसिरासूत्पलनालेषु च वेध्यस्य ॥ ५ ॥

घुणोपहतकाष्ठवेणुनलनालीशुष्कालाबुमुखेषु एष्यस्य ॥ ६ ॥

पनस-विम्बी-विल्वफल-मज्ज-मृतपशु-दन्तेषु आहार्यस्य ॥ ७ ॥

मधूच्छिष्टोपलिप्ते शाल्मलिफलके विस्राव्यस्य ॥ ८ ॥

सूक्ष्मघनवस्त्रान्तयो मृदुचर्मान्तयोश्च सीव्यस्य ॥ ९ ॥

पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धनयोग्याम् ॥ १० ॥

मृदुषुमांसखण्डेषु अग्निसारयोग्याम् मृदुचर्ममांसपेशीपूत्पलनालेषुचकर्णसंधिबंधनयोग्याम् ॥ ११ ॥

उदकपूर्णघटपार्श्वस्रोतस्यलाबुमुखादिषु नेत्रप्रणिधान-व्रणवस्तिपीड़न-योग्यामिति ॥ १२ ॥

एवमादिषु मेधावी योग्यार्थेषु यथाविधिः ॥
द्रव्येषु योग्यां कुर्वाणो न प्रमुह्यतिकर्मसु ॥ १३ ॥
तस्मात् कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्मसु ॥
यत्र यस्येह साधर्म्यं तत्र योग्यां समाचरेत् ॥ १४ ॥

इति शल्यतन्त्रसमुच्चयेऽष्टमोऽध्यायः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथनवमोऽध्यायः ।

अथातो विशिखानुप्रवेशनीयमध्यायं व्याख्यास्यामः ॥१॥

अधिगततन्त्रोणोपासिततन्त्रार्थेन दृष्टकर्मणाकृतयोग्येन शास्त्रार्थं विगदता राज्ञाज्ञातेन नीचनखरोम्णा शुचिना शुक्लवस्त्रपरिहितेन छत्रवता दण्डहस्तेन सोपानत्केनानुद्धतवेशेन सुमनसा कल्याणाभिव्याहारेण अकुहकेन बंधुभूतेन भूतानां सुसहायवता वैद्येन विशिखाऽनुप्रवेष्टव्या ॥ २ ॥

ततो दूतनिमित्तशकुनमंगलानुलोम्येनातुरगृहमभिगम्यातुरमभिपश्येत् स्पृशेत् पृच्छेच्च ॥ ३ ॥

त्रिभिरेतै र्विज्ञानोपायै रोगाः प्रायशो वेदितव्या इत्येके ॥ तत्तु न सम्यक् षड्विधो हि रोगाणां विज्ञानोपायः । तद्यथा पञ्चभिः श्रोत्रादिभिः प्रश्नेन चेति ॥ ४ ॥

तत्रश्रोत्रेन्द्रियविज्ञेया व्रणस्रावविज्ञानीयादिषु रोगेषुवक्ष्यन्ते सफेनं रक्तमीरयन्ननिलः सशब्दोनिर्गच्छति एवमादयः ॥ ५ ॥

स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदुकठिनत्वादयः स्पर्शविशेषा ज्वरशोफादिषु ॥ ६ ॥

चक्षुरिन्द्रियविज्ञेया शरीरोपचयापचयायुर्लक्षणवलवर्णविकारादयः ॥ ७ ॥

रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः ॥ ८ ॥

घ्राणेन्द्रियविज्ञेया अरिष्टलिंगादिषु व्रणानामव्रणानाञ्च गंधविशेषाः ॥ ९ ॥

प्रश्नेन च विजानीयाद्देशं कालं जातिं सात्म्यमातंकसमुत्पत्तिं वेदनासमुच्छ्रायं वलमन्तरग्निं वातमूत्रपुरीषरजसां प्रवृत्त्यप्रवृत्तिकालप्रकर्षादींश्च विशेषान् ॥ १० ॥

आत्मसदृशेषु विज्ञानाभ्युपायेषु तत्स्थानीयै र्जानीयात् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतिचात्र ।

मिथ्यादृष्टाविकारा हि दुराख्यातास्तथैव च ।
तथा दुष्परिमृष्टाश्च मोहयेयुश्चिकित्सकम् ॥ ११ ॥

एवमभिसमीक्ष्य साध्यान्साधयेत्, याप्यान् यापयेत्, असाध्यान्नोपक्रमेत्, परिसंवत्सरोत्थितांश्च विकारान् प्रायशो वर्जयेत् ॥ २ ॥

तत्र साध्या अपि व्याधयः प्रायेणैषां दुश्चिकित्स्यतमाभवन्ति ॥१३॥

तद्यथा श्रोत्रिय नृपति-बाल-वृद्ध-स्त्री-भीरू-राजसेवक-कितव-दुर्बल वद्यविदग्ध-व्याधितोपक-दरिद्र-कृपण-क्रोधवतामनात्मवतामनाथानाञ्च, एवं निरूप्य चिकित्सांकुर्वन् धर्मार्थकामयशांसि प्राप्नोति ॥ १४ ॥

भवतिचात्र—

भिः सहास्यां सम्वासं परिहासञ्च वर्जयेत् ।
दत्तञ्च ताभ्यो नादेयमन्नादन्यद् भिषग्वरैः ॥ १५ ॥

इति शल्यतन्त्रसमुच्चये नवमोऽध्यायः ।

॥ अथ दशमोऽध्यायः ॥

अथातः शोणितवर्णनीयमध्यायं व्याख्यास्यामः ॥

तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्यस्या-ष्टविध वीर्यस्यानेकगुणस्याहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः सरस इत्युच्यते ॥ १ ॥

स द्विविधः- आग्नेयः सौम्यश्चतस्मिन् सर्वशरीरावयवानुसारिणि रसे जिज्ञासा किमयं सौम्यस्तैजस इति, अत्रोच्यते स खलु द्रवानुसारि स्नेहन जीवन-तर्पण-धारणादिभिः सौम्यइत्यवगम्यते तथाचतन्त्रान्तरे ॥ २ ॥

द्विविधो हि रसः प्रोक्तः सौम्यश्चाग्नेय एव च ॥
आहारस्य च वैविध्यात् रसो द्विविध उच्यते ॥ ३ ॥
दुग्धादीनान्तु सौम्यानां यो रसः सौम्यसंज्ञितः ॥
सोऽन्नेभ्यः सूक्ष्मैः स्रोतोभिः प्राप्नोति तु रसप्रपाम् ॥४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृष्ठवंशपुरस्थांच इति वैद्यै निरूपितम् ॥
नीयते तु ततोऽसौ हि वामया रसकुल्यया ॥ ५ ॥
ततस्तु स सिरां याति तन्नाम गलमूलिका ॥
सिरामार्गेण हृदयं गम्यते चेति निश्चितम् ॥ ६ ॥
अथापरो रसो यो हि त्वाग्नेय परिकथ्यते ॥
परितस्त्वामपक्वानां सिराभिः प्रसृतैश्च ह ॥ ७ ॥
आकृष्यमाणस्तद्धातू रक्तयोगमुपेत्य च ॥
सिरया प्रतिहारिण्या ततो यकृति नीयते ॥ ८ ॥ इति
रंजितास्तेजसा त्वापः शरीरस्थेन देहिनाम् ॥
अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥ ९ ॥

तस्य च रक्तस्य हृदयं स्थानम् स हृदयाच्चतुर्विंशति धमनीरनुप्रविश्यकृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चादृष्टहेतुकेन कर्मणा ॥ १० ॥

तस्य शरीरमनुसरतोऽनुमानाद् गतिरुपलक्षितव्याच्चयवृद्धिवैकृतैः ॥ ११ ॥

रसादेव स्त्रिया रक्तं रजः संज्ञं प्रवर्तते ।
तद्वर्षाद् द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् ॥१२॥

आर्तवं शोणितन्त्वाग्नेयं, अग्नेः सोमीयत्वाद् गर्भस्य पाञ्चभौतिक श्चापरे जीवरक्तमाहुराचार्याः ॥ १३ ॥

विस्रता द्रवता रागः स्पन्दनं लघुता तथा ॥
भूम्यादीनां गुणा ह्येते दृश्यन्ते चात्र शोणिते ॥१४॥
रसाद्रक्तं ततोमांसं मांसान्मेदः प्रजायते ॥
मेदसोऽस्थि ततो मज्जा मज्जः शुक्रं तु जायते ॥१५॥

तत्रैषां धातुनामन्नपानरसःप्रीणयिता ॥ १६ ॥

तथा च गणनाथः—

लसीका नाम रक्तस्य चोपधातुः प्रकीर्तितः ।
तन्वच्छजलभागा च रसायन्यां तु वर्तिनी ॥
पोषणीसर्वधातूनामाशयानां यथाक्रमम् ।
तस्या रसे शोणिते वा त्वन्तर्भावो हि वर्तते ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रसजं पुरुषं विद्यात् रसं रक्षेत्प्रयत्नतः ॥

अन्नात्पानाच्चमतिमानाचाराच्चाप्यतन्द्रितः ॥१७॥

तत्र रसगतौ धातु रहरहर्गच्छतीतिरसः स खलुत्रीणि कलासहस्राणि पञ्चदश च कला एकैकस्मिन् धातावतिष्ठते एवं मासेन नव दशैकोत्तरेण रसः शुक्रं भवति स्त्रीणाञ्चार्तवम् ॥१८॥

भवतिचात्र

अष्टादश सहस्राणि संख्या ह्यस्मिन्समुच्चये ॥

कलानां नवतिः प्रोक्ता स्वतन्त्रपरतन्त्रतः ॥१९॥

स शब्दार्चिर्जल सन्तानवदनुधावत्येवं सकलं शरीरम्, वाजीकरणस्त्वौषधयः स्वबलगुणोत्कर्षात् शुक्रं शीघ्रं विरेचयन्ति ॥ २० ॥

एतेषां धातुनां क्षयवृद्धी शोणितनिमित्ते तस्मात् तदधिकृत्यवक्ष्यामः २१

तत्र फेनिलमरुणं कृष्णं परुषं तनु शीघ्रगमस्कन्दि चवातेन दुष्टं ॥२२॥

नीलं पीतं हरितं श्यावं विस्रमनिष्टं पिपीलिकामक्षिकाणाम स्कन्दि च पित्तदुष्टम् ।२३॥

गैरिकोदकप्रतीकाशं स्निग्धं वहलं पिच्छिलं शीतं चिरस्राधि मांसपेशीप्रभं श्लेष्मदुष्टम् ॥२४॥

सर्वलक्षणसंयुक्तं काञ्जिकाभं विशेषतो दुर्गन्धि च सन्निपातदुष्टम् ॥२५॥

पित्तवद्रक्तेनातिकृष्णञ्च, द्विदोषलिङ्गं संसृष्टम्, इन्द्रगोपप्रतीकाशमसंहतञ्च प्रकृतिस्थं जानीयादविवर्णम् ॥२६॥

अथाविस्राव्याः सर्वाङ्गशोफः क्षीणस्य च अम्लभोजननिमित्तः पाण्डुरोग्यर्शसोदरिशोषिगर्भिणीनाञ्च श्वयथवः ॥२७॥

तत्र शस्त्रविस्रावणं द्विविधम्—प्रच्छानं शिराव्यधनञ्च ॥२८॥

तत्र ऋजु, असंकीर्णं, सूक्ष्मं समं, अनवगाढं, अनुत्तानं, आशुचशस्त्रं पातयेत्, मर्म-सिरा-स्नायु-संधीनां चानुपघाति ॥२९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र दुर्दिने दुर्विद्धे शीतवातयोरस्विन्नेऽभुक्तवतः स्कन्नत्वाच्छोणितं न स्रवति अल्पं वा स्रवति ॥२९॥

भवतिचात्र ।

मदमूर्च्छाश्रमार्तानां वातविण्मूत्रसंगिनाम् ।
निद्राभिभूतभीतानां नृणां नासृक् प्रवर्तते ॥३०॥

तद्दुष्टं शोणितमनिर्हियमाणं करोत्युरागदाहपाकवेदना जनयेत् ॥३१॥ अत्युष्णातिस्विन्नातिविद्धेष्वङ्गेषु विस्रावितमतिप्रवर्तते ॥३२॥ तदतिप्रवृत्तं शिरोभितापमाध्यमधिमंथं तिमिरप्रादुर्भावं धातुक्षयमाक्षेपकं पक्षाघातमेकाङ्गविकारं तृष्णादाहौ हिक्कां कासं श्वासं मरणञ्चापादयति ॥३३॥

भवन्तिचात्र—

तस्मान्नशीते नात्युष्णे नास्विन्ने नातितापिते ।
यवागूं प्रतिपीतस्य शोणितं मोक्षयेद्भिषक् ॥३४॥
सम्यग्गत्वा यदारक्तं स्वयमेवावतिष्ठते ।
शुद्धं तदा विजानीयात् सम्यक्विस्रावितन्तु तत् ॥३५॥
लाघवं वेदनाशान्तिर्व्याधेर्वेगपरिक्षयः ।
सम्यग् विस्राविते लिङ्गं प्रसादो मनसस्तथा ॥३६॥
त्वग्दोषा ग्रन्थयः शोफा रोगाः शोणितजाश्रये ।
रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥३७॥

अथ खल्वप्रवर्तमाने रक्ते एलाशीतशिव-कुष्ठ-तगर-पाठा-भद्रदारु विडंग-चित्रक-त्रिकटु-कागारधूम-हरिद्राऽर्कांकुर-नक्तमाल-फलै र्यथालाभं त्रिभिश्चतुर्भिः समस्तै र्वा चूर्णीकृतै र्लवणतैलप्रगाढैर्व्रणमुखमवघर्षयेदेवं सम्यक् प्रवर्तते ॥३८॥

अथातिप्रवृत्ते रोध्र-मधुक-प्रियंगु-पत्तंग-गैरिक-सर्जरस-रसांजन-शाल्मली पुष्प-शंख-शुक्ति-माष-यव-गोधूमचूर्णैः शनैः व्रणमुखमवचूर्ण्य गुल्यग्रेणावपीडयेत् ॥ ३९ ॥

सालसर्जार्जुनारिमेदमेषशृङ्गधवधन्वनत्वग्भिर्वा चूर्णिताभिः, क्षौमेणवाधमापितेन, समुद्रफेनलाक्षाचूर्णैर्वा, यथोक्तैर्व्रणबंधनद्रव्यै

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गाढं वध्नीयात्, शीताच्छादनभोजनागारैः शीतैः परिषेकप्रदेहैश्चोपाचरेत् ॥ ४० ॥

क्षारेणाग्निना वा दहेत्, यथोक्तव्यधनादनन्तरं तामेवातिप्रवृत्तां सिरां विध्येत् ॥ ४१ ॥

काकोल्यादिकाथं शर्करामधुमधुरं पाययेत्, एणहरिणोरभ्रशशमहिषवराहाणां वा रुधिरं क्षीरयूपरसैः सुस्निग्धैश्चाश्नीयात् ॥ ४२ ॥

उपद्रवांश्च यथास्वमुपाचरेत् ॥ ४३ ॥

भवन्तिचात्र ।

धातुक्षयात् स्रुते रक्ते मन्दः सञ्जायतेऽनलः ।
पवनश्च परं कोपं याति तस्मात्प्रयत्नतः ॥ ४४ ॥

तत्रातिशीतैर्लघुभिः स्निग्धैः शोणितवर्धनैः ।
ईषदम्लैरनम्लैश्च भोजनैः समुपाचरेत् ॥ ४५ ॥

चतुर्विधं यदेतद्धि रुधिरस्य निवारणम् ।
संधानं स्कन्दनञ्चैव पाचनं दहनन्तथा ॥ ४६ ॥

व्रणं कषायः संधत्ते रक्तं स्कन्दयते हिमम् ।
तथा सम्पाचयेद्भस्म दाहः संकोचयेच्छिराः ॥ ४७ ॥

अस्कन्दमाने रुधिरे संधानानि प्रयोजयेत् ।
संधाने भ्रश्यमाने तु पाचनैः समुपाचरेत् ॥ ४८ ॥

कल्पैरेतैस्त्रिभिर्वैद्यः प्रयतेत यथाविधिः ।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते ॥ ४९ ॥

शेषदोषे यतोरक्ते न व्याधिरतिवर्तते ।
सावशेषे ततः स्थेयं न तु कुर्यादतिक्रमम् ॥ ५० ॥

देहस्य रुधिरं मूलं रुधिरेणैव धार्यते ।
तस्माद् यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥ ५१ ॥

स्रुतरक्तस्य सेकाद्यैः शीतैः प्रकुपितेऽनिले ।
शोफं सतोदं कोष्णेन सर्पिषा चावसेचयेत् ॥ ५२ ॥

इति शल्यतन्त्रसमुच्चये शोणितवर्णनीयो नाम दशमोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

४२

अथैकादशोऽध्यायः

अथातः सिराव्यधविधिमध्यायं व्याख्यास्यामः ॥१॥

बाल-स्थविर-रुक्ष-क्षतक्षीण-भीरु-परिश्रान्त-स्त्री-मद्याध्वकर्शित-तृषित-विरिक्त-स्थापितानुवासित-जागरित-क्लीव-कृशगर्भिणीनां कास-श्वास-शोष-प्रवृद्धज्वरादोषकपक्षाघातोपवास-पिपासा-मूर्च्छाप्रपीडिताना-नाञ्च सिरां न विध्येत्, याश्चाव्यध्याव्यध्याश्चादृष्टा दृष्टाश्चायन्त्रिता यन्त्रिताश्चानुत्थिता इति ॥२॥

शोणितावसेकसाध्याश्च विकारा अभिहिता तेषु चापक्वेषु अन्येषु चानुक्लेषु यथाभ्यासं यथान्यायं सिरां विध्येत ॥३॥

प्रतिषिद्धानामपि विषोपसर्गं आत्ययिके च सिराव्यधनमप्रतिषिद्धम् ॥४॥

तत्र स्निग्धस्विन्नमातुरं यथादोषप्रत्यनीकं द्रवप्रायमन्नंभुक्तवन्तं यवागूं पीतवन्तं यथाकालमुपस्थाप्यासीनं स्थितं वा प्राणानवाधमानं वस्त्र पट्टचर्मान्तर्वल्कललतानामन्यतमेन यन्त्रयित्वानातिगाढं नाति शिथिलं शरीरप्रदेशमासाद्य प्राप्तं शस्त्रमासाद्य सिरां विध्येत ॥५॥

नैवातिशीते नात्युष्णे न प्रवाते न चाभ्रिते ॥
शिराणां व्यधनं कार्यमरोगे वा कदाचन ॥६॥

तत्र व्यध्यसिरं पुरुषं प्रत्यादित्यमुखमरत्निमात्रोच्छ्रित उपवेश्य सने सक्थ्नोराकुञ्चितयोर्निवेश्यकूर्परौ संधिद्वयस्योपरिहस्तावन्तर्गृह्य दृढांगुष्ठकृतमुष्टी मन्ययोः स्थापयित्वा यन्त्रणशाटकं ग्रीवामुष्टयोरुपरि परिक्षिप्यान्येन पुरुषेण पश्चात्स्थितेन वामहस्तेनोत्तानेन शाटकान्तर्द्वयं ग्राहयित्वा ततो वैद्यो ब्रूयात् दक्षिणहस्तेन सिरोत्थापनार्थं नात्यायतशिथिलं यन्त्रमावेष्टय" इति अस्टक् स्रावणार्थं यत्र पृष्ठमध्ये च पीड़य इति, कर्मपुरुषं वायुपूर्णमुखं स्थापयेदित्युत्तमांगगतानामन्तर्मुखवर्ज्यानां सिराणां व्यधनेयन्त्रणविधिः ॥७॥

तत्रपादव्यध्यसिरस्य पादं समे स्थाने सुस्थिरं स्थापयित्वान्यस्पादमीषत् संकुचितमुच्चैः कृत्वा व्यध्यसिरः पादं जानुसंधेरा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शाटकेनावेष्ट्य हस्ताभ्यां प्रपीड्य गुल्फं व्यध्यप्रदेशस्योपरि प्लोता दीनामन्यतमेन वद्धां पादसिरां विध्येत् ॥८॥

अथोपरिष्टाद्धस्तौ गूढाङ्गुष्ठकृतमुष्टी सम्यगासने स्थापयित्वा सुखोपविष्टस्य पूर्ववद्यन्त्रं वद्ध्वा हस्तसिरां विध्येत् ॥ ९ ॥

गृध्रसीविश्वाच्योः संकुचितजानुकूर्परः स्यात् श्रोणीपृष्ठ स्कंधेषून्नामितशिरस्कस्योपविष्टस्य विस्फूर्जितपृष्ठस्य विध्येत् ॥१०॥

उदरोरसोः प्रसारितोरस्कस्योन्नमितशिरस्कस्य विस्फूर्जितदेहस्य, बाहुभ्यामवलम्ब्यमानदेहस्य पार्श्वयोः, अवनामितमेढ्रस्य मेढ्रे उन्नामितविदष्टजिह्वाग्रस्याधोजिह्वायाम्, अतिव्यात्ताननस्य तालुनि दन्तमूलेषु च, एवं यन्त्रोपायानन्यांश्च सिरोत्थापनहेतूनवेक्ष्य व्याधिवशेन शरीरवशेन च विदध्यात् ॥११॥

मांसलेष्ववकाशेषु यवमात्रं शस्त्रं निदध्यादतोन्येष्वर्द्धयवमात्रं व्रीहिमात्रं वा व्रीहिमुखेन, अस्थ्नामुपरि कुठारिकया विध्येदर्धयवमात्रम् ॥१२॥

भवन्तिचात्र

व्यभ्रे वर्षासु विध्येत ग्रीष्मकाले तु शीतले ।
हेमन्तकाले मध्याह्ने शस्त्रकालास्त्रयः स्मृता ॥१३॥
सम्यक्शस्त्र निपातेन धारया वा स्रवेदसक् ॥
मुहूर्तं रुद्धा तिष्ठेच्च सुविद्धान्तां विनिर्दिशे ॥१४॥
यथाकुसुम्भपुष्पेभ्यः पूर्वं स्रवति पीतिका ॥
तथा सिरासु विद्धासु दुष्टमग्रे प्रवर्तते ॥१५॥
मूर्च्छितस्यातिभीतस्य श्रान्तस्य तृषितस्य च ।
न वहन्ति सिरा विद्धास्तथानुत्थितयंत्रिताः ॥१६॥
क्षीणस्य बहुदोषस्य मूर्च्छयाभिद्रुतस्य च ।
भूयोऽपराह्णे विस्राव्या सा परेद्युस्त्यहेऽपि वा ॥१७॥
रक्तं सशेषदोषन्तु कुर्यादपि विचक्षणः ।
न चातिप्रस्रुतं कुर्याच्छेषं संशमनैर्जयेत् ॥१८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बलिनो बहुदोषस्य वयस्थस्य शरीरिणः ।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे ॥१६॥

तत्र पाददाहपादहर्षपवाहुक-चिप्प-विसर्प-वातशोणित-वातकंटक विचर्चिका-पाददारीप्रभृतिषु क्षिप्रमर्मणः उपरिष्टाद् द्व्यंगुले व्रीहिमुखेन सिरां विध्येत् ॥२ ॥

श्लीपदे गुल्फस्याधः व्यधः कर्त्तव्यः ॥२१॥

क्रोष्टुकशिरखंजपंगुलवातवेदनासु जंघायां चतुरंगुले गुल्फस्योपरि ॥२२॥

अपच्यामिन्द्रवस्तेरधस्ताद् द्व्यंगुले जानुसंधेरुपरि श्रोणेर्वा चतुरंगुले गृध्रस्याम् ॥२३॥

ऊरुमूलसंश्रितान्तु गलगण्डे, एतेनेतरसक्थिबाहू च व्याख्यातौ ॥२४॥

विशेषेण वामबाहौ कूर्परसंधेरभ्यन्तरतो बाहुमध्ये श्रोहि कनिष्ठिकानामिकयो र्मध्ये वा, एवं दक्षिणबाहौयकृद्दाल्ये कफोदरे चैतामेव काश्वासयोरुपदिशन्ति ॥ ५॥

गृध्स्यामिव विश्वाच्यां, श्रोणीं प्रति समन्ताद् द्व्यंगुले प्रवाहिकायां शूलिन्यां ॥२६॥

परिवर्तिकोपदंशशूकदोषशुक्रव्यापत्सु मेढ्रमध्ये ॥२७॥

वृषणयोः पार्श्वे मूत्रवृद्ध्यां, नाभेरधश्चतुरंगुले सेवन्या वामपार्श्वे दकोदरे ॥२८॥

वामपार्श्वे कक्षास्तनयोरन्तरेऽन्तर्विद्रधौ पार्श्वशूले च, बाहुशोषापबाहुकयोरप्येके वदन्त्यंसयोरन्तरे ॥२९॥

त्रिकसंधिमध्यगतां तृतीयके, अधःस्कंधसंधिगतामन्यतरपार्श्वसंस्थितां चतुर्थके, शंखकेशान्तसंधिगतामुरोऽपांग्ललाटेषु चोन्मादे, जिह्वारोगेष्वधोजिह्वायां दन्तव्याधिषु च, तालुनि तालव्येषु, कर्णयोरुपरि समन्तात् कर्णशूले तद्रोगेषु च ॥३०॥

गंधाग्रहणे नासारोगेषु च नासाग्रे, तिमिरादिपाकप्रभृतिष्वक्ष्या-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मर्मेषूपनासिके, लालाट्यामपाङ्ग्यां वा एतानेव शिरोरोगाधिमन्थ-प्रभृतिषु रोगेषु ॥३१॥

अत ऊर्ध्वं दुष्टव्यधनमनुव्याख्यास्यामः ॥ २॥

तत्र दुर्विद्धा, अतिविद्धा, कुञ्चिता, पिच्चिता, कुट्टिता अप्रस्रुता, अत्युदीर्णा अन्तेऽविद्धा, परिशुष्का, कूणिता, वेपिता, अनुत्थितविद्धा, शस्त्रहतातिर्यग्विद्धा, अपविद्धा, अव्यध्या, विद्रुता, धेनुका, पुनः पुनः विद्धा, सिरास्नाय्वस्थिसन्धिमर्मसु विद्धा, इति ॥३३॥

तत्र या सूक्ष्मशस्त्रविद्धा स्पष्टं नासृक् स्रवति रुजाशोफवती च सा दुर्विद्धा ॥३४॥

प्रमाणतिरिक्तविद्धायां अन्तः प्रविशति शोणितं शोणितस्याति-प्रवृत्तिर्वा सा ऽतिविद्धा ॥३५॥

कुञ्चितायामप्येवम्, कुण्ठशस्त्रप्रमथिता पृथुलीवमापन्ना पिच्चिता ॥३६॥

अनासादिता पुनः पुनरन्तयोश्च बहुशः शस्त्राभिहताकुट्टिता ॥३७॥

शीतभयमूर्च्छाभिरप्रवृतशोणिताऽप्रस्रुता, तीक्ष्णमहामुखशस्त्र-विद्धाऽत्युदीर्णा, अल्पपरिस्राविण्यन्तेविद्धा, क्षीणशोणितस्यानिल-पूर्णा परिशुष्का, चतुर्भागावसादिता किञ्चित्प्रवृतशोणिता कूणिता ॥३८॥

दुस्थानबन्धनाद् वेपमानायाः शोणितसंमोहः सा वेपिता, अनुत्थि-तविद्धायामप्येवं छिन्नातिप्रवृतशोणिता क्रियासंगकरी शस्त्रहता ॥३९॥

तिर्यक्प्रणिहितशस्त्रा किञ्चिच्छेषा तिर्यग्विद्धा, बहुशःक्षतादीनशस्त्र प्रणिधानेनापविद्धा ॥४०॥

अशस्त्रकृत्याऽव्यध्या, अनवस्थितविद्धा विद्रुता, प्रदेशस्यबहुशोऽ वघट्टनादारोहद्व्यथामुहुर्मुहुः शोणितस्रावा धेनुका ॥४१॥

सूक्ष्मशस्त्रव्यधनाद, बहुशो विच्छिन्ना पुनर्पुनर्विद्धा, स्नायुसिरा-स्थिसंधिमर्मसु विद्धा वा रुजां शोफं वैकल्यं मरणं वापादयति ॥४२॥

भवतिचात्र ।

शिरासु शिक्षितो नास्ति चलाह्येताः स्वभावतः ।
मत्स्यवत्परिवर्तन्ते तस्माद्यत्नेन ताडयेत् ॥४३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अजानता गृहीते तु शस्त्रे कायनिपातिते ।
भवन्ति व्यापदश्चैताः बहवश्चाप्युपद्रवाः ॥४४॥
स्नेहादिभिः क्रियायोगैर्न तथालेपनैरपि ।
यान्त्याशुव्याधयः शांतिं तथासम्यक् सिराव्यधात् ॥४५॥
सिराव्यधचिकित्सार्धं शल्यतन्त्रे प्रकीर्तितः ।
यथाप्रणिहितः सम्यग्वस्तिः कायचिकित्सिते ॥४६॥

तत्रस्निग्धस्विन्नवान्तविरिक्तस्थापितानुवासितानां सिराविद्धैः परिहर्तव्यानि क्रोधायास-मैथुनदिवा-स्वप्न-वाग्व्यायामयानाध्ययनासन चंक्रमण-शीतवातातप-विरुद्धासात्म्याजीर्णान्यावललाभात् मासमेके मन्यन्ते ॥४७॥

भवत श्चात्र

सिराविषाणतुम्बैस्तु जलौकोभिः पदैस्तथा ॥
अवगाढं यथापूर्वं निर्हरेद्दुष्टशोणितम् ॥ ४८ ॥
अवगाढे जलौका स्थात् प्रच्छन्नं पिडिते हितम्
सिरांगव्यापके रक्ते शृङ्गालाबू त्वचि सुस्थिते ॥४९॥

इति शल्यतन्त्रसमुच्चये सिराव्यधविधि र्नामैकादशोऽध्यायः ।

अथद्वादशोऽध्यायः ।

अथात आमपक्वैषणीयमध्यायं व्याख्यास्यामः

शोफसमुत्थाना ग्रंथिविद्रध्यलजीप्रभृतयः प्रायेण व्याधयोऽभिधास्यंते ॥१॥

अनेकाकृतयस्तै र्विलक्षणः पृथुर्ग्रथित स्त्वङ्मांसस्थायी समो विषमो वा दोषसंघातः शरीरैकदेशोत्थितः शोफ इत्युच्यते ॥२॥

सषड्विधो वातपित्तकफशोणितसन्निपातागन्तुनिमित्तः ॥३॥

तस्य दोषरुपलक्षणैर्व्यंजनानि व्याख्यास्यामः, तत्र वातशोफोऽरुणः कृष्णो वा परुषः स्पर्शदुरनवस्थितास्तोदादयश्चात्रवेदनाविशेषा भवन्ति ॥४॥

पित्तशोफः पीतो स्पर्शदुः सरक्तो वा शीघ्रानुसारी श्रोषादयश्चात्र वेदनाविशेषाः ॥५॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्लेष्मशोफः पांडु शुक्लो वा कठिनः शीतः स्निग्धो मन्दानुसारी कंड्वादयश्चात्र वेदनाविशेषा भवन्ति ।।६।।

सर्ववर्णवेदनोपेतः सन्निपातश्वयथुः, पित्तवच्छोणितजोऽति कृष्णश्च ।।७।।

पित्तरक्तलक्षणागन्तु र्लोहितावभासश्च ।।८।।

स यदा वाह्याभ्यन्तरैः क्रिया विशेषै र्न सम्भावितः प्रशमयितुं क्रियाविपर्ययाद्वृद्धत्वाद्वा दोषाणां तदा पाकाभिमुखो भवति तस्यामस्य पच्यमानस्य पक्वस्यच लक्षणमुपधारय ।।९।।

तत्र मन्दोष्मता त्वक्सवर्णता शीतशोफ्ता स्थैर्यं मन्दवेदनताऽल्प श्वयथुता चामलक्षणमुपदिष्टम् ।।१०।।

सूचीभिरिव तुद्यते दश्यत इव पिपीलिकाभिः स्ताभिश्च संसर्प्यत इव छिद्यते इव शस्त्रेण भिद्यत इव शङ्कुभिः ताड्यत इव दण्डेन पीड्यत इव पाणिना घट्टत इव चांगुल्या दह्यते पच्यत इव चाग्निक्षाराभ्यां, श्रोषचोषपरिदाहाश्च भवन्ति, वृश्चिकविद्ध इव च स्थानासनशयनेषु न शान्तिमुपैति, आध्मातवस्तिरिवाततश्च शोफो भवति त्वग्वैवर्ण्यं शोफाभिवृद्धिः ज्वरदाहपिपासाभक्तारुचिश्च पच्यमानलिंगम् ।।११।।

वेदनोपशान्तिः पाण्डुताल्पशोफता वलिप्रादुर्भावस्त्वक्परिपुटनं निम्नदर्शनमंगुल्या वावपीड़िते प्रत्युन्नमनं वस्ताविवोदकस्याऽरणं पूयस्य प्रपीड़यत्येकमन्तमन्ते वाऽवपीड़िते मुहुर्मुहुस्तोदः कण्डूरनुन्नतता च व्याधेरुपद्रवशान्ति र्भक्ताभिकांक्षा च पक्वलिंगम् ।।१२।।

कफजेषु तु रोगेषु गम्भीरगतित्वादभिघातजेषु केषुचिदसमस्तं पक्वलक्षणं दृष्ट्वा पक्वमपक्वमिति मन्यमानः भिषङ् मोहमुपैति यत्र हि त्वक्सवर्णता शीतशोफता स्थौल्यमल्परुजताश्मवच्च घनता न तत्र मोहमुपेयादिति ।।१३।।

गद्योक्तो यः पुनः श्लोकैरर्थः समनुगीयते ।
तद्व्यक्ति व्यवसायार्थं द्विरुक्तं तन्नगर्ह्यते ।।१४।।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शोफोऽल्पोल्पोष्णरुक्सामः सवर्णःकठिनः स्थिरः ।
पच्यमानो विवर्णस्तु रागि वस्तिरिवाततः ॥१५॥
स्फुटतीव सनिस्तोदः सांगमर्दः ज्वरस्तमः ।
संरम्भारुचिदाहोषा तृड्ज्वरानिद्रताऽन्वितः ॥१६॥
स्त्यानं विष्यन्दयत्याज्यं व्रणवत्स्पर्शनासहः ।
पक्वेऽल्पवेगता म्लानिः पाण्डुता वलिसम्भवः ॥१७॥
नामोऽन्तेषून्नति मध्ये कण्डूशोफादिमार्दवम् ।
स्पृष्टे पूयस्य सञ्चारो भवेद्रस्ताविवाम्भसः ॥१८॥
पाकेऽतिवृत्ते सुषिर स्तनुत्वगुदीपभन्नितः ।
वलिभिराचितः श्यावःशीर्यमाणतनूरुहः ॥१९॥
कफजेषुचरोगेषु गम्भीरंपाक मेत्यसृक् ।
पक्वलिंगं तनोऽस्पष्टं यत्र स्यात् शीतशोफता ॥२०॥
त्वक्सावरणं रुजोऽल्पत्वं घनस्पर्शत्वमश्मवत् ॥
रक्तपाकमिति ब्रुयात्तं प्राज्ञो मुक्तसंशयः ॥२१॥
आमंविपच्यमानञ्च सम्यक् पक्वञ्च यो भिषक्
जानीयात् स भवद्वैद्यः शेषास्तस्करवृत्तयः ॥२२॥

वाताद्दते नास्ति रुजा न पाकः पिताद्दते नास्ति कफाच्च पूयः ॥
तस्मात्समस्तान् परिपाककाले पचन्ति शोफांस्त्रय एव दोषाः ॥२३॥

तत्रामछेदे सिरास्नाय्वस्थिसंधिव्यापादनमतिमात्रं शोणितातिप्रवृत्तिं वैदनाप्रादुर्भावोऽवदरणमनेकोपद्रवदर्शनं कृतविद्रधिर्वा ॥२४॥

भवतिचात्र ।

आमछेदे सिरास्नायुव्यापदोऽसृगतिस्रुतिः ॥
रुजोऽतिवृद्धि र्दरणं विसर्पोवाक्षतोद्भवः ॥२५॥

स यदा भयमोहाभ्यां पक्वमपक्वमिति मन्यमान श्चिरमुपेक्षते व्याधिं वैद्यस्तदागम्भीरानुगतोद्धारमलभमानः पूयः स्वमाश्रयमवदार्य उत्संगंमहान्तमवकाशं कृत्वा नाडीं जनयित्वा कृच्छ्रसाध्यो भवति चासाध्यो वेति ॥२६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिष्ठन्नंतः पुनः पूयः सिरास्नाय्वसृगामिषम् ॥
विवृद्धो दहति क्षिप्रं तृणोलपमिवानिलः ॥२७॥
यश्छिनत्याममज्ञानाद्यश्चपक्वमुपेक्षते ।
स्वपचाविवमन्तव्यौ तावनिश्चितकारिणौ ॥२८॥
प्राक् शस्त्रकर्मणश्चेष्टं भोजयेदन्नमातुरम् ।
मद्यपं पाययेन्मद्यं तीक्ष्णं योवेदनासहः ॥२९॥
न मूर्च्छत्यन्नसंयोगान् मत्तः शस्त्रं न बुद्ध्यते ।
अन्यत्र मूढ़गर्भाश्ममुखरोगोदरातुरात् ॥३०॥
प्राणोह्याभ्यन्तरो नृणां बाह्यप्राणगुणान्वितः ।
धारयत्यविरोधेन शरीरं पाञ्चभौतिकम् ॥३१॥
अल्पो महान् वा क्रियया विना यः समुच्छ्रितः पाकमुपैतिशोफः ।
विशालमूलो विषमं विदग्धः सकृच्छ्रतां यात्यवगाढदोषः ॥३२॥
आलेपनस्रावणशोधनैश्च सम्यक्प्रयुक्तैर्यदिनोपशाम्येत् ।
पच्येत शीघ्रं सममल्पमूलः सपिंडितश्चोपरिचोन्नतः स्यात् ॥३३॥
कक्षं समासाद्य यथैव वह्निं वातेरितः संदहति प्रसह्य ।
तथैव पूयोऽप्यविनिसृतो हि मासं सिरास्नायु च खादतीह ॥३४॥
आद्यौ विस्लापनं श्रेष्ठं द्वितीयमवसेचनम् ।
तृतीयमुपनाहञ्च चतुर्थं पाटनक्रियाम् ॥३५॥
पञ्चमं शोधनं कुर्यात् षष्ठं रोपणमिष्यते ।
एते क्रमा व्रणस्योक्ताः सप्तमं वैकृतापहम् ॥३६॥

इति शल्यतन्त्रसमुच्चये आमपक्वैषणीयो नाम द्वादशोऽध्यायः ।

अथत्रयोदशोऽध्यायः ।

अथातो व्रणालेपनबंधविधिमध्यायं व्याख्यास्यामः ।

आलेप आद्य उपक्रमः एष सर्वशोफानांसामान्यः प्रधानतमश्च तञ्च प्रतिरोगं वक्ष्यामः ततोऽपि बंधः प्रधानं तेन शुद्धि व्रणरोपणमस्थिसंधिस्थैर्य्यञ्च ॥१॥

तत्र प्रतिलोममालिम्पेन्नानुलोमम्, प्रतिलोमे हि सम्यगौषधमवतिष्ठतेऽनुप्रविशति रोमकूपान्स्वेदवाहिभिश्च सिरामुखैर्वीर्यं प्राप्नोति ॥२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न च शुष्यमाणमुपेक्षेतान्यत्र पीडयितव्यात्, शुष्कोह्यपार्थको रुक्करश्च ॥३॥

स त्रिविधः प्रलेपः प्रदेह आलेपश्च, प्रलेपः शीतस्तनुरविशोषी विशोषी वा, प्रदेहस्तूष्णः शीतो वा बहलो बहुरविशोषी च मध्यमोऽ आलेपस्तत्र रक्तपित्तप्रसादकृदालेपः प्रदेहो वातबलासप्रशमनः संधानः शोधनो रोपणः शोफवेदनापहश्च, तस्योपयोगः क्षताक्षतेषु यस्तु क्षतेषूपयुज्यते सभूयःकल्क इति संज्ञां लभन्ते, निरुद्धालेपनसंज्ञस्तेनास्रावसन्निरोधो मृदुता पूतिमांसापकर्षणमन्तर्दोषताव्रणशुद्धिश्च भवति ॥४॥

भवन्ति चात्र ।

अविदग्धेषु शोफेषु हितमालेपनं भवेत् ।
यथास्वं दोषशमनं दाहकण्डूरुजापहम् ॥५॥
त्वक्प्रसादनमेवाग्र्यं मांसरक्तप्रसादनम् ।
दाहप्रशमनं श्रेष्ठं तोदकण्डूविनाशनम् ॥६॥
मर्मदेशेषु ये रोगा गुह्येष्वपि तथा नृणाम् ।
संशोधनाय तेषां हि कुर्यादालेपनं भिषक् ॥७॥
षड्भागं पैत्तिके स्नेहं चतुर्भागन्तु वातिके ।
अष्टभागन्तु कफजे स्नेहमात्रां प्रदापयेत् ॥८॥

तस्य प्रमाणं महिषाद्रचर्मोच्छ्रयापेक्षयाऽस्थूल इति ॥९॥

नचालेपं रात्रौप्रयुञ्जीत, माभूत्शैत्यपिहितोष्मणस्तदनिर्गमाद विकारप्रवृत्तिरिति ॥१०॥

तमसापिहितो ह्युष्मारोमकूपमुखे स्थितः ।
विना लेपेन निर्याति रात्रौ नो लेपयेत्ततः ॥११॥

व्रणाधिकारे तूक्तत्वान्नायं नियमः सर्वत्रग्राह्यः ॥१२॥

भवन्ति चात्र ।

प्रदेहसाध्ये व्याधौ तु हितमालेपनं दिवा ॥
पित्तरक्ताभिघातोत्थे सविषेच विशेषतः ॥१३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न च पर्युषितं लेपं कदाचिदवचारयेत्।
ऊष्माणं वेदनां दाहं घनत्वाजनयेत् स हि॥१४॥
न च तेनैव लेपेन प्रदेहं दापयेत्पुनः॥
शुष्कभावात्स निर्वीर्यो युक्तोऽपि स्यादपार्थकः॥१५॥
अत ऊर्ध्वं व्रणबंधनद्रव्याणि व्याख्यास्यामः॥

तद्यथा—क्षौम-कार्पासाविक-दुकूल-कौशेय-पत्रोर्ण-चोन-पट्ट चर्मा-न्तर्वल्कला नु-शकल-लता-विदलरज्जु-तूलफल-सन्तानिका-लौहानि, तेषां-व्याधिं कालञ्चावेदयोपयोगः प्रकरणतश्चैषामादेशः॥१॥ तत्रकोश-दामस्वस्तिकानुवेल्लितमुत्तोली-मण्डल-स्थगिका-यमक-खट्वा-चीन-विवंधवितान-गोफणाः पञ्चाङ्गी चेति चतुर्दशबंधविकल्पा स्तेषां नाम-मिरेवाकृतयः प्रायेण व्याख्याताः॥१७॥

प्रायोग्रहणान्नामैव सर्वेषामाकृतयोवक्तुं न युज्यंते तस्मात्पर-तन्त्रोक्तलक्षणभेषत्रैव सम्यगाकृतिविज्ञानाय श्लोकैरुपदेक्ष्यामः॥१८॥

पूरयित्वैषधै बंधः क्रियते कोशकाकृतिः॥
कोशबंधः स विज्ञेयो वैद्यै र्वंधेन वर्जितान्॥१९॥
दामाकृतिं चतुष्पादां दामाख्यं स्वस्तिकं पुनः॥
स्वस्तिकाकृतिमासीव्य पश्चादावेष्ट्यबध्यते॥२०॥
तदनुवेल्लितं विद्यात्॥
बहुबंधिमुष्टिकाकारो जालवद्बहुरंध्रकः।
मुत्तोलीबंध एष स्यात् संज्ञान्तरमतः शृणु॥२१॥
गोतुण्डिकां चालनीञ्च तामेवाहु र्भिषग्वराः।
मण्डलं वेष्टनाकारं विदध्यान्मण्डलात्मके॥२२॥
भेषजादिभिरापूर्य स्थगिकापट्टकेन च।
बध्यते मण्डलाकारो यमलव्रणयोस्तु सः॥२३॥
बंधं यमकनामानं भिषजो वर्णयन्ति तम्।
खट्वा तु बहुभि र्वृता॥२४॥
चीनबंधं विजनीयाच्चीराभिर्बहुभिर्वृतम्।
विबंधो विविधो बंधो स च षड् ग्रन्थिकायुतः॥२५॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. Panini Kanya Maha Vidyalaya Collection. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञेयो वितानसंज्ञस्तु वितानाकारसंयुतः ।
पाषाणगुडकोत्क्षेपकारिणां गोफणां विदुः ॥२६॥
तदाकृति भिषक् कुर्यात् फलस्य पञ्चकं त्रिभिः ।
पञ्चाङ्गीन्तु वृतां कुर्याद् संधानाय चिकित्सकः ॥२७॥

तत्र केशमंगुष्ठांगुलिपर्वसु निदध्यात् ।

दाम सम्बाधेऽङ्गे, संधिकूर्चकभ्रूस्तनान्तरतलकर्णेषुस्वस्तिकम्, अनुवेल्लितन्तुशाखासु, हनुशंखगण्डेषु खट्वां, अपांगयोश्चीनम्, ग्रीवामेढ्रयो मुक्तोलीम् ।

वृत्तेंगे मण्डलम्, यमलव्रणयो र्यमकम्, अंगुलीमेढ्राग्रेषु स्थगिकाम्, पृष्ठोदरोरस्सु विवंधम्, मूर्धनि वितानम्, चिबुकनासौष्ठांसवस्तिषु गोफणाम्, जत्रुण ऊर्ध्वं पञ्चाङ्गीमिति यो वा यस्मिन् शरीरप्रदेशे सुनिविष्टोभवति तं तस्मिन्विदध्यात् ॥२८॥

यन्त्रणमूर्ध्वमधस्तिर्यक् च, तत्र घनां कवलिकां दत्वावामहस्तपरिक्षेपमृजुमनाविद्धमसंकुचितं मृदुपट्टं निवेश्य बध्नीयात् ॥२९॥

न च व्रणस्योपरि कुर्याद् ग्रंथिमाबाधकरं न च विकेशिकौषधेऽतिस्निग्धेऽतिरूक्षे विषमे वा कुर्वीत ॥३०॥

यस्मादतिस्नेहात् क्लेदोरौक्ष्याच्छेदो दुर्न्यासाद् व्रणवर्त्मावघर्षणम् ॥३१॥

तत्र व्रणायतनविशेषाद् बंधविशेषस्त्रिविधः ॥३२॥

गाढः समः शिथिल इति,

पीड़यन्नरुजो गाढः सोच्छ्वासः शिथिलः स्मृतः ॥
नैव गाढो न शिथिलः समो बंधः प्रकीर्तितः ॥३३॥

तत्र स्फिक्-कुक्षि-कक्षा-बंक्षणोरः-शिरःसु गाढः, शाखा-वदन-कर्ण-कण्ठ-मेढ्र-मुष्क पृष्ठ-पार्श्वोदरोरःसु समः, अक्ष्णोःसंधिषुच शिथिल इति ॥३४॥

तत्र पैत्तिकं गाढस्थाने समं बध्नीयात्, समस्थानेशिथिलं शिथिलस्थाने न एवं शोणितदुष्टञ्च ॥३५॥

श्लैष्मिकं शिथिलस्थाने समं, समस्थाने गाढम्, गाढस्थाने गाढतरम् एवं वातदुष्टञ्च ॥३६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र पैत्तिकं शरदि ग्रीष्मे द्विरह्नो वह्नीया द्रक्ष्योपद्रुतमप्येवम्, श्लैष्मिकं हेमन्तवसन्तयोः, व्यहाद् वातोपद्रुतमप्येवम्, इति विचार्य-बंधविपर्ययं कुर्वीत ॥३७॥

तत्र समशिथिलस्थानेषु गाढं बद्धे विकेशिकौषधनैरर्थक्यं शोफवेदनाप्रादुर्भावश्च ॥३८॥

गाढसमस्थानेषु शिथिलं बद्धे विकेशिकौषधपतनं पट्टसञ्चाराद्व्रण-घर्षणम्, गाढशिथिलस्थानेषु समे बद्धे च गुणाभावः ॥३९॥

अविरीतबंधे वेदनोपशान्तिरस्रक्प्रसादो मार्दवञ्च ॥४०॥

अवध्यमानो दंश-मशक-तृण-काष्ठोपल-पांशु-शीत-वातातप-प्रभृतिभि र्विशेषेरभिहन्यते व्रणोविविधवेदनोपद्रुतश्चदुष्टतामुपैति, आलेपनादीनि चास्य विशोषमुपयांति ॥ १॥

चूर्णितं मथितं भग्नं विश्लिष्टमतिपातितम् ॥
अस्थिस्नायुसिराश्छिन्नमाशु बंधेन रोहति ॥४२॥
सुखमेवं व्रणी शेते सुखं गच्छति तिष्ठति ॥
सुखं शय्यासनस्थस्य क्षिप्रं संरोहति व्रणः ॥४३॥

[अबंध्याः] पित्तरक्तामिधातविषनिमिता यदा च शोफ-दाह-पाक राग-तोद-वेदनाभिभूताः क्षाराग्निदग्धाः पाकात् प्रकुपिताः प्रविशीर्ण-मांसाश्च भवन्ति ॥ ४४ ॥

कुष्ठिनामग्निदग्धानां पिडका मधुमेहिनां ।
कर्णिकाश्चोन्दुरुविषे विषजुष्टा व्रणाश्रये ॥४५॥
मांसपाके न बद्ध्यन्ते गुदपाके च दारुणे ॥
स्वबुद्ध्या चापि विभजेत् कृत्याकृत्यांश्च बुद्धिमान् ॥४६॥
देशं दोषं च विज्ञाय व्रणं च व्रणकोविदः ।
ऋतूंश्च परिसंख्याय ततोबन्धान्विवेशयेत् ॥४७॥
ऊर्ध्वं तिर्यगधस्ताच्च यत्रणात्रिविधामता ॥
यथा च बध्यते बंधः तथा वक्ष्याम्यशेषतः ॥४८॥
घनां कवलिकां दत्वा मृदु चैवापिपट्टकम् ॥
विकेशिकामौषधञ्च नातिस्निग्धां समाचरेत् ॥४९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रक्लेदयत्यति स्निग्धा तथा रुक्षाक्षिणोति च
युक्तस्नेहारोपयति दुर्न्यस्ता वर्त्मघर्षति ॥ ५० ॥
विषमञ्च व्रणं कुर्यात् स्तम्भयेत्स्रावयेत्तथा ।
यथाव्रणं विदित्वा तु योगं वैद्यः प्रयोजयेत् ॥५१॥
पित्तजे रक्तजे वापि सकृदेव परिक्षिपेत् ।
असकृत्कफजे वापिवातजे च विचक्षणः ॥५२॥
तलेन प्रतिपीड्याथ स्रावयेदनुलोमतः ।
सर्वांश्च बंधान् गूढान्तान संधिँश्च विनिवेशयेत् ॥५३॥
ओष्ठस्याप्येष संधाने यथादृष्टोविधिस्मृतः ।
बुद्ध्योत्प्रेक्ष्याभियुक्तेन तथाचास्थिषु जानता ॥५४॥
उत्तिष्ठतो निषण्णस्य शयनं चापि गच्छतः ।
गच्छतो विविधैर्यानै नास्य दुष्यति स व्रणः ॥५५॥
ये च स्यु र्मांससंस्था वै त्वग्गताश्च तथा व्रणाः ।
संध्यस्थिकोष्ठप्राप्ताश्च सिरास्नायुगतास्तथा ॥५६॥
तथावगाढगम्भीराः सर्वतो विषमस्थिताः ।
नैते साधयितुं शक्या ऋते बंधान्नवनीतिहि ॥५७॥

इति शल्यतन्त्रसमुच्चये त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः ।

अथातो व्रणितोपासनीयमध्यायं व्याख्यास्यामः ॥

व्रणी प्रथममेवागारमन्विच्छेत् तच्चागारं प्रशस्तवास्त्वादिकं कार्य्यम् ॥१॥ तत्रादौ प्रशस्तातुरालयलक्षणं चरकत उद्धृत्य विलिखामः ॥२॥ तद्यथा

दृढं निवातं प्रवातैकदेशं सुखप्रचारमनुपत्यकं धूमातपजलरजसामनभिगमनीयम्, अनिष्टानाञ्च शब्द-स्पर्श-रूप-रस-गंधानां सोदपानोदूखलमुशलवर्चस्थानस्नानभूमिमहानसोपेतं प्रशस्तं गृहमेवतावत्पर्वमुपकल्पयेत् ॥३॥ ततः शीलशौचाचारानुरागदाक्षिण्योपपन्नानुपचारकुशलान् सर्वकर्मसु पर्यवदातान् सूपौदन-पाचक-स्नापक-संवाहकोत्थापक-संवेशकौपधूपेपकांश्च परिचारकान् सर्वकर्मस्वप्रतिकूलान् तथा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गीतवादित्रोल्लापकश्लोकगाथाख्यायिकेतिहासपुराणकुशलानभिप्राय-ज्ञान् देशकालविदः परिचर्यांश्च ॥४॥ तथा लावकपिञ्जलैणशशहरिण-कालपुच्छकमृगमात्रिकोरभ्रान् ॥५॥ गां दोग्ध्रीमनातुरां शीलवतीं जीवद्व-त्सां सुप्रतिविहिततृणशरणपानीयाम् ॥६॥ पाद्याचमनीयोदकोष्ट्र-मणिक घट-पिठर-पर्येाग-कुम्भी-कुम्भ-कुण्ड-शरावदर्वी-कट-उदञ्चन परिपचन मन्थान-चर्म-चेल-सूत्र कार्पासेार्णादीनि शयनासनानि-चेापन्यस्तभृंगा-रप्रतिगृहाणिसुप्रयुक्तास्तरणोत्तरप्रच्छदेापधानानि स्वापाश्रयाणि ॥७॥

संवेशनेापवेशन-स्नेह-स्वेदाभ्यंग-प्रदेह-परिषेकानुलेपन-वमन-वि-रेचनास्थापनानुवासन-शिरोविरेचन-मूत्रोच्चार-कर्मणामुपचार-सुखानि ॥८॥

सुप्रज्वालितेापधानाँश्च सुश्लक्ष्णखरमध्यमाः दृढदः शस्त्राणियन्त्राणि चेापकरणार्थानि धूमनेत्राञ्च, उत्तरवस्तिकञ्च कुशहस्तकञ्च, तुलाञ्च, मानभाण्डंच, घृत-तैल-वसा-मज्ज-क्षौद्र-फाणित-लवणेन्धनोदक-मधु-सीधु-सुरा-सौवीरक-तुषोदक-मैरेय-मेदक-दधि-दधि-मण्डे-दश्विद्धा-न्याम्लसूत्राणि च ॥९॥

तथा शालिषष्टिक-मुद्ग-माष-यव-तिल-कुलत्थ-वदर-मृद्वीका-परूषकाभयामलक-विभीतकानि । १०॥

नानाविधानि च स्नेह-स्वेदोपकरणानि द्रव्याणितथैवोद्धरानु-लेामिकैाभयभाञ्जि ॥११॥

संग्रहणीय-दीपनीयपाचनीयेापशमनीयवातहराणि समाख्यातानि यच्चान्यदपि व्यापदः परिसंख्यायेापकरणं विद्यात्प्रतीकारार्थं यच्च-प्रतिभोगार्थन्तदुपकल्पयेदित्यातुरालयनिर्माणम् ॥१२

प्रशस्तवास्तुनिगृहे शुचावातपवर्जिते ।
निवाते न च रोगाः स्युः शारीरागन्तुमानसाः ॥१३॥

तस्मिँश्छयनमसम्बाधं मनोज्ञं प्राक्शिरस्कं सशस्त्रं कुर्वीत ॥१४॥

सुखचेष्टाप्रचारः स्यात् स्वास्तीर्णेशयने व्रणी ।
प्राच्यां दिशि स्थिता देवा स्तत्पूजार्थं नतशिरः ॥१५॥

तस्मिन् सुहृद्भिरनुकूलैरुपास्यमानेा यथेष्टमासीत्,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुहृदोविच्छिन्दन्त्याशु कथाभिर्व्रणवेदनाः ।
आश्वासयन्तो बहुशस्त्वनुकूलाः प्रियम्वदाः ॥१६॥

न च दिवानिद्रावशगः स्यात् ।

दिवास्वप्नाद्व्रणे कण्डूर्गौरवन्तथा ।
श्वयथु र्वेदना रागः स्रावश्चैव भृशं भवेत् ॥१७॥

उत्थानसंवेशन परिवर्तनचंक्रमणोच्चैर्भाषणाद्यासु आत्मचेष्टास्वप्रमत्तो व्रणं संरक्षेत् ॥१८॥

स्थानासनं चंक्रमणं दिवास्वप्नन्तथैव च ॥
व्रणितो न निषेवेत शक्तिमानपिमानवः ॥१९॥
उत्थानाद्यासनं स्थानं शय्याचातिनिषेविता ।
प्राप्नुयान्मारुतादंगे रुजस्तस्माद्विवर्जयेत् ॥२०॥

गम्यानाञ्च तथा स्त्रीणां सन्दर्शन-सम्भाषण-संस्पर्श-नानि दूरतः परिहरेत् ॥ २१ ॥

स्त्रीदर्शनादिभिःशुक्रं कदाचिच्चलितं स्रवेत् ।
ग्राम्यधर्मकृतान् दोषान्सोऽसंसर्गेऽप्यवाप्नुयात् ॥२२॥

नवधान्यमाषतिल-कलाय-कुलत्थ- निष्पावहरीतक-शाकाम्ल-लवण कटुकगुड़-पिष्ट-विकृति वल्लुरशुष्कशाकाजाविकानूपौदक-मांस-वसाशीतोदक-कृशरा-पायसदधिदुग्ध-तक्र प्रभृतीन् परिहरेत् ॥२३॥

तक्रान्तो नवधान्यादि योऽयं वर्गः प्रकीर्तितः ।
दोषसञ्जननो ह्येष विज्ञेयः पूयवर्द्धनः ॥२४॥

मद्यपञ्च मैरेयारिष्टासवसीधुसुराविकारान् परिहरेत् ॥२५॥

मद्यमम्लं तथा रूक्षं तीक्ष्णमुष्णञ्च वीर्यतः ।
आशुकारिच तत्पीतं क्षिप्रं व्यापादयेद्व्रणम् ॥२६॥

वाततप-रजो-धूमावश्यायातिभोजनानिष्ट- भोजनाश्रवण-दर्शनेर्ष्यामर्ष-भय-क्रोध शोक-ध्यान-रात्रिजागरण-विषमाशनानशन-शयनोपवास-वाग्व्यायाम-स्थान-चंक्रमणशीत-वात-विरुद्धाशनाजीर्णमक्षिकाद्यावाधाः परिहरेत् ॥२७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्रणिनः संप्रतप्तस्य कारणैरेवमादिभिः ॥
क्षीणशोणितमांसस्य भुक्तम् सम्यङ् न जीर्यति ॥२८॥
अजीर्णात पवनादीनां विभ्रमो बलवान्भवेत् ॥
ततः शोफरुजास्रावदाहपाकानवाप्नुयात् ॥२९॥

सदा नीचनखरोम्णा शुचिना शुक्लवाससा शान्तिमंगलदेवता-ब्राह्मणगुरुपरेण भवितव्यम् ॥३०॥

हिंसाविहाराणि रक्षांसि हि महावीर्याणि पशुपतिकुवेरकुमारानुचराणि मांसशोणितप्रियत्वात् क्षतजनिमित्तं व्रणिनमुपसर्पन्ति सत्कारार्थं जिघांसूनिवाक्रदाचित् ॥३१॥

तेषां सत्कारकामानां प्रयतेतान्तरात्मना ॥
धूपबल्युपहारांश्च भक्ष्यांश्चैवोपहारयेत् ॥३२॥

ते तु संतर्पिता आत्मवन्तं न हिंस्युः, तस्मात्सततमतन्द्रितः जनपरिवृतो, नित्यंदीपोदकशस्त्रस्रग्दामपुष्पलाजाद्यलंकृतेवेश्मनि सम्पन्मंगलमनोनुकूलाः कथाः शृण्वन्नासीत् ॥३३

सम्पदाद्यनुकूलाभिः कथाभिः प्रीतिमानसः ॥
आशावान्व्याधिमोक्षाय क्षिप्रं सुखमवाप्नुयात् ॥३४॥

ऋग्यजुः सामाथर्ववेदाभिहितैरपरैश्चागदैर्विधानैरुपाध्याया भिषजश्चसन्ध्ययो रक्षां कुर्युः ॥३५॥

सर्षपारिष्टपत्राभ्यां सर्पिषा लवणेन च ।
द्विरह्नः कारयेद्धूपं दशरात्रमतन्द्रितः ॥३६॥
छत्रातिछत्रे लांगूलीं जटिलां ब्रह्मचारिणीं

लक्ष्मीं गुह्यामतिगुह्यां सहस्रवीर्य्यां शतवीर्यां सिद्धार्थकांश्च शिरसा धारयेत् ॥३७॥

व्यज्येत वालव्यजनै र्व्रणं न च विघट्टयेत् ।
नतुदेन्नच कण्डूयेच्छयानः परिपालयेत् ॥३८॥
अनेन विधिना युक्तमादावेव निशाचराः ।
वनं केशरिणाक्रान्तं वर्जयंति मृगा इव ॥३८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri Sarayu Trust. Funding IKS-MoE-Grant-2

जीर्णशाल्योदनं स्निग्धमल्पमुष्णं द्रवोत्तरम् ।
भुंजानो जांगलै र्मांसैः शीघ्रं व्रणमपोहति ॥४०॥
तण्डुलीयकजीवन्तीसुनिषण्णकवास्तुकैः ।
वालमूलकवार्ताकपटोलैः कारवेल्लकैः ॥४१
सदाड़िमैः सामलकैः घृतभृष्टैः ससैंधवैः ।
अन्यैरेवं गुणैश्चापिमुद्गादीनांरसेन वा ॥४२॥
शक्तुन् विलेपीं कुल्माषं जलं चापिश्रृतं पिवेत् ।
व्रणे श्वयथुरायासात्स च रागश्च जागरात् ।
तौ च रुक् च दिवास्वापात् ताश्च मृत्युश्च मैथुनात् ॥४३॥
दिवा न निद्रावशगो निर्वातगृहगोचरः ।
व्रणी वैद्यवशे तिष्ठन् शीघ्रं व्रणमपोहति ॥४४॥
एवं वृत्तसमाचारो व्रणी सम्पद्यते सुखी ।
आयुश्च दीर्घमाप्नोति धन्वन्तरिवचो यथा ॥४५॥

इतिशल्यतन्त्रसमुच्चये व्रणितोपासनीयो नाम चतुर्दशोऽध्यायः ।

अथ पञ्चदशोऽध्यायः

अथातो व्रणास्रावविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥

त्वङ्मांससिरास्नायुसंधिस्थिकोष्ठमर्माणीत्यष्टौव्रणवस्तून्यत्रसर्वव्रण सन्निवेशः ॥ २ ॥

तत्राद्यैकवस्तुसन्निवेशीत्वग्भेदी व्रणः सूपचरः शेषाः स्वयमवदीर्यमाणादुरुपचाराः ॥ ३ ॥

तत्रायतश्चतुरस्रः वृत्तस्त्रिपुटकश्चेति व्रणाकृतिसमासः शेषास्तु विकृताकृतयोदुरुपक्रमाः भवन्ति ॥ ४ ॥

सर्व एव व्रणाः क्षिप्रं सरोहन्त्यात्मवतां सुभिषग्भिश्चोपक्रान्ता नात्मवतामश्चैश्चोपक्रान्ता प्रदुष्यन्ति प्रवृद्धत्वाच्च दोषाणाम् ॥ ५ ॥

तत्रातिसम्वृताऽतिविवृताऽतिकठिनोऽतिमृदुरवसन्नोत्सन्नोत्युष्णोऽतिशीतः कृष्णरक्तपीतशुक्लादीनां वर्णानामन्यतमवर्णो भैरवः पूतिपूयमांसिरास्नायुप्रभृतिभिः पूर्णः पूतिपूयास्रावी चोन्मार्गी चोत्सङ्गयमनोन्नद्धः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गंधोऽत्यर्थं वेदनावान् दाहपाकरागकण्डूशोफपीड़कोपद्रुतोऽत्यर्थं दुष्टशोणितास्रावी दीर्घकालानुबंधी चेतिदुष्टव्रणलिंगानि ॥ ६ ॥

तस्य दोषोच्छ्रायेण षट्त्वं विभज्य यथास्वं प्रतिकारे प्रयतेत ॥ ७ ॥

अत ऊर्ध्वं सर्वस्रावान्व्याख्यामः ॥ तत्र घट्टितासु छिन्नासु वा त्वच्चु स्फोटेषु भिन्नेषु विदारितेषु वा सलिलप्रकाशो भवति आस्रावः किञ्चिद्विस्रः पीतावभासश्च ॥ ८ ॥

मांसगतः सर्पिःप्रकाश सान्द्रः श्वेतः पिच्छिलश्च ॥ ९ ॥

सिरागतः सद्यश्छिन्नासु शिरासु रक्तातिप्रवृत्तिः पक्वासु च [illegible]तोय-नाड़ीभिरिव तोयागमनं पूयस्य ॥ १० ॥

आस्रावश्चात्र तनुर्विच्छिन्नः श्यावोऽवश्यायप्रतिमः पिच्छिलोऽवलम्बी च ॥ ११ ॥

स्नायुगतः स्निग्धो घनः सिंहाणकप्रतिमः सरक्तश्च, अस्थिगतेऽस्थनि चाभिहते स्फुटिते भिन्ने दोषावदारिते वा दोषभित्त्वा दस्थिनिस्सारं शुक्लिधौतमिवाभाति, आस्रावश्चात्र मज्जमिश्रः सरुधिरः स्निग्धश्च ॥ १२ ॥

संधिगतः पीड्यमानो न प्रवर्तते आकुञ्चनप्रसारणोन्नमन-विनमन-प्रधावनोत्कासनप्रवाहणैश्च स्रवति, आस्रावश्चात्र पिच्छिलोऽवलम्बी सफेनपूयरुधिरोन्मथितश्च ॥ १३ ॥

कोष्ठगतोऽस्रष्टमूत्रपूरीषपूयोदकानि स्रवति ॥ १४ ॥

मर्मगतस्त्वगादिष्ववरुद्धत्वान्नोच्यते ॥ तत्र त्वगादिगतानामास्रावाणां यथाक्रमं पारुष्यश्यावावश्य यदधिमस्तुक्षारोदक-मांस-धावनपुलाकोदकसन्निभत्वानि मारुताद् भवन्ति ॥ १५ ॥

पितादुगोमेदगोमूत्र भस्मशंखकषायकैः ॥
जलमाध्वीकतैलाभैरभिस्तुल्यः प्रजायते ॥ १६ ॥
पित्तास्रावो वर्णितो हि कफास्रावः प्रवक्ष्यते ॥

पितवद्रक्तादतिविस्रत्वञ्च, कफान्नवनीतकासीसमज्जपिष्टतिलनारिकेलोदकवराहवसासंनिभत्वानि, सन्निपातान् नारिकेलोदकैर्वारुक-प्रियंगुयकृन्मुद्गयूषसवर्णत्वानीति ॥ १७ ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्र

पक्वाशयादसाध्यस्तु पुलाकोदकसन्निभः ॥
क्षारोदकनिभः स्रावो वर्ज्योरक्ताशयात् स्रवन् ॥ १८ ॥
आमाशया त्कलायाम्भोनिभश्च त्रिकसंधिजः ॥
स्रावानेतान्परीक्ष्यादौ ततः कर्माचरेद्भिषक् ॥ १९ ॥

॥ अत ऊर्ध्वं सर्वव्रणवेदनावक्ष्यामः ॥

तोदन-भेदन-ताड़न-छेदनायामन-मन्थन-विक्षेपण-चुञ्चुमायन-निर्दहनावभंजन-स्फोटन-विदारणोत्पाटन-कम्पन-विविध-शूल-विश्लेषण-विकिरण-पूरण-स्तम्भन-स्वप्नाकुञ्चनांकुशिकाः सम्भवन्ति ॥ २० ॥ अनिमित्तविविधवेदनाप्रादुर्भावो वा मुहुर्मुहु र्यत्रागच्छन्ति वेदना विशेषास्तं वातिकमिति विद्यात् ॥ २१ ॥

श्रोषचोषपरिदाहधूमायना.ने यत्र गात्रमंगारावकीर्णमिवपच्यते यत्र चोष्माभिवृद्धिः क्षते क्षारावसिक्तवच्चवेदनाविशेषास्तं पैत्तिकमिति विद्यात् ॥ २२ ॥

पित्तवद्रक्तसमुत्थं जानीयात्, करङ्गुरुत्वमुपदेहो सुप्तत्वम रुपवेदनत्वं स्तम्भः शैत्यं च यत्र तं श्लैष्मिकमिति विद्यात् २३ ।

यत्र सर्वासां वेदनानामुत्पत्तिस्तंसान्निपातिकमिति २४॥

अत ऊर्ध्वं व्रणवर्णान्वक्ष्यामः, भस्मकपोतास्थिवर्णः परुषः रुणः कृष्णइति मारुतजस्य, नीलः पीतो हरितः श्यावः कृष्णोरक्तः कपिलः पिंगलइति रक्तपित्तसमुत्थयोः, श्वेतः स्निग्धः पाण्डुरितिश्लेष्मजस्य, सर्ववर्णोपेतः सान्निपातिक इति २५।

न केवलं व्रणेषूक्तो वेदनावर्णसंग्रहः ।
सर्वशोफविकारेषु व्रणवल्लक्षयेद्भिषक् ॥२६॥

इतिशल्यतन्त्रसमुच्चये व्रणस्रावविज्ञानीयो नाम पञ्चदशोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथषोडशोऽध्यायः ।

अथ कृत्याकृत्यविधिमध्यायं व्याख्यास्यामः

तत्र वयःस्थानां दृढ़ानां प्राणवतां सुचिकित्स्याः व्रणाः एकस्मिन्वा पुरुषे यत्रैतद्गुणचतुष्टयं तस्य सुखसाधनीयतमाः ॥ १ ॥

तत्र वयःस्थानां प्रत्यग्रधातुत्वादाशु व्रणारोहन्ति, दृढ़ानांस्थिर-बहुमांसत्वाच्छस्त्रमवचार्यमाणं शिरास्नाय्वादिविशेषान्नप्राप्नोति ॥ २ ॥

प्राणवतां वेदनाभिघाताहारयन्त्रणादिभि र्न ग्लानिरुत्पद्यते, सत्व-वतां दारुणैरपिक्रियाविशेषै र्न व्यथा भवति तस्मादेतेषां सुखसाध-नीयतमाः ॥ ३ ॥

ते चैव विपरीतगुणा वृद्धकृशाल्पप्राणभीरुषु द्रष्टव्या ॥ ४ ॥

स्फिक्पायु प्रजनन-ललाट-गण्डौष्ठ-पृष्ठ कर्ण-फलकोषोदर-जत्रुमुखा-भ्यन्तरस्थाः सुखरोपणीया व्रणाः ॥ ५ ॥

अक्षिदन्त-नासापाङ्ग-श्रोत्र-नाभिजठर-सेवनी-नितम्ब-पार्श्व-कुक्षि-वक्षःकक्षास्तनसंधिभागगताः सफेन-पूयरक्तानिलवाहिनोऽन्तः शल्याश्च दुश्चिकित्स्या व्रणाः ॥ ६ ॥

अधोभागाश्चोर्ध्वभागनिर्वाहिणो रोमान्तोपनखमर्म-जंघास्थि-संश्रि-ताश्च भगन्दरमपिचान्तर्मुखं सेवनीकूटकास्थिसंश्रितम् ॥ ७ ॥

कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम् ।
व्रणाः कृच्छ्रेण सिद्ध्यन्ति येषां चापि व्रणे व्रणाः ॥८॥

अवपाटिका-निरुद्धप्रकश-सन्निरुद्धगुद-जठरग्रन्थिक्षतकृमयः प्रति-श्यायजा कोष्ठजाश्च त्वग्दोषिणां प्रमेहिणाम्वा ये परिक्षतेषु दृश्यंते ॥९॥

शर्करा-सिकता-मेहो वात-कुण्डलिकाष्ठीलादन्तशर्करोपकुशकण्ठ-शालूकं निष्कोषणदूषिताश्चदन्तवेष्टाः सविसर्पास्थिक्षतोरःक्षतव्रणग्र-न्थिप्रभृतयश्च याप्याः ॥१०॥

साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥११॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यापनीयं विजानीयात् क्रिया धारयते तु यम् ।
क्रियायान्तु निवृतायां सद्य एव विनश्यति ॥१२॥
प्राप्ता क्रिया धारयति याप्यव्याधितमातुरम् ।
प्रपतिष्यदिवागारं विष्कम्भः साधु योजितः ॥१३॥

अत ऊर्ध्वमसाध्यान्वक्ष्यामः

मांसपिण्डवदुद्गताः प्रसेकिनोऽन्तःपूयवेदनावन्तोऽश्वापानवदुद्वृत्तौष्ठाः केचित्कठिनागोशृङ्गवदुन्नतमृदुमांसप्ररोहा अपरे दुष्टरुधिरास्राविणस्तनुपिच्छिलास्राविणश्च मध्योन्नताः केचिदवसन्नशुषिरपर्यन्ताः शणतूलवत्स्नायुजालवन्तो दुर्दर्शाः

वसामेदोमज्जमस्तुलुङ्गस्राविणश्च दोषसमुत्थाः पीतासित-मूत्र-पुरीष-वातवाहिनश्चकोष्ठ समुत्थाः त एवोभयतोभागव्रणमुखेषु पूयरक्तनिर्वाहिणः सर्वतोगतयश्चाणुमुखाः मांसबुद्बुदवन्तः सशब्द वातवाहिनश्च शिरःकण्ठस्थाः क्षीणमांसानां पूय-रक्तनिर्वाहिणोऽरोचकाविपाककासश्वासोपद्रवयुक्ताः भिन्ने वा शिरःकपाले यत्र मस्तुलुंगदर्शनं त्रिदोषलिंगप्रादुर्भावो कासश्वासौ वा यस्येति ॥१४॥

भवन्ति चात्र ।

वसां मेदोऽथ मज्जानं मस्तुलुंगं चयः स्रवेत् ।
आगन्तुस्तु व्रणः सिध्येन्नसिध्येद्दोषसम्भवः ॥१५॥
अमर्मोपहिते देशे सिरासंध्यस्थिवर्जिते ।
विकारो योऽनुपर्येति तदसाध्यस्यलक्षणम् ॥१६॥
क्रमेणोपचयं प्राप्य धातूननुगतः शनैः ।
न शक्य ऊन्मूलयितुं वृद्धो वृक्ष इवामयः ॥१७॥
सस्थिरत्वान्महत्वाच्च धात्वनुक्रमणेन च ॥
निहन्त्यौषधवीर्याणि मन्त्रान्दुष्टग्रहो यथा ॥१८॥
अतो यो विपरीतः स्यात्सुखसाध्यः स उच्यते ।
अवद्धमूलः क्षुपको यद्वदुत्पाटने सुखः ॥
त्रिभिर्दोषैरनाक्रान्तः श्यावौष्ठः पिडकीसमः ।
अवेदनोनिरास्रावः व्रणः शुद्ध इहोच्यते ॥२०॥
कपोतवर्णप्रतिमायस्यान्ताः क्लेदवर्जिताः ।
स्थिराश्चिपिटिकावन्तो रोहतीति समादिशेत् ॥२१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रूढ़वर्त्मानमग्रंथिमशूनमरूजं व्रणम् ।
त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत् ॥२२॥
दोषप्रकोपाद् व्यायामादभिघातादजीर्णतः ।
हर्षात् क्रोधाद्भयाद्वापि व्रणो रूढोऽपिदीर्यति ॥२३॥

इति शल्यतन्त्रसमुच्चये कृत्याकृत्यविधिर्नाम षोडशोऽध्यायः ।

अथ सप्तदशोऽध्यायः

अथातोऽष्टविधशस्त्रकर्मीयमध्यायं व्याख्यास्यामः ॥१॥

छेद्याव्याधयः

छेद्या भगन्दराग्रन्थिः श्लैष्मिकस्तिलकालकः ॥
व्रणवर्त्मार्बुदान्यर्शश्चर्मकीलोऽस्थिमांसगम् ॥२॥
शल्यं जतुमणिः मांससंघातोगलशुण्डिका ॥
स्नायुमांसशिराकोथो वल्मीकं शतपोनकः ॥३॥
अश्रुपश्चोपदंशाश्च मांसकंद्यधिमांसकः ॥

भेद्या व्याधयः ।

भेद्या विद्रधयोऽन्यत्र सर्वजाद् ग्रन्थयस्त्रयः ॥४॥
आदितो ये विसर्पाश्च वृद्धयः सविदारिकाः ॥
प्रमेहपिड़काः शोफः स्तनरोगावमन्थकाः ॥५॥
कुम्भिकानुशयौ नाड्यौ वृन्दौ पुष्करिकालजी ॥
प्रायशः क्षुद्ररोगाश्च पुप्पुटौ तालुदन्तजौ ॥६॥
तुण्डिकेरी गिलायुश्च पूर्वं ये च प्रपाकिणः ॥
वस्तिस्तथाश्मरीहेतो मेदोजा ये च केचन ॥७॥

॥ लेख्याव्याधयः ॥

लेख्याश्चतस्रो रोहिण्यः किलासमुपजिह्विका ॥
मेदोजो दन्तवैदर्भौ ग्रंथिवर्त्माधिजिह्विका ॥८॥
अर्शांसि मण्डलं मांसकन्दी मांसोन्नतिस्तथा ॥

वेध्या व्याधयः ।

वेध्याः शिरा बहुविधा मूत्रवृद्धिर्दकोदरम् ॥ ९ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एष्या व्याधयः ।

एष्या नाड्यः सशल्याश्चव्रणा उन्मार्गिणश्च ये ।

आहार्या व्याधयः ।

आहार्य्याः शर्कराश्तिस्रो दन्तकर्णमलाश्मरी ॥१०॥
शल्यानि मूढ़गर्भाश्च वर्चश्च निचितं गुदे ।

स्राव्या व्याधयः ।

स्राव्या विद्रधयः पञ्च भवेयुः सर्वजादते ॥११॥
कुष्ठानि वायुः सरुजः शोफो यश्चैकदेशजः
पाल्यामयाः श्लीपदानि विषजुष्टश्च शोणितम् ॥१२॥
अर्बुदानि विसर्पाश्च ग्रन्थयश्चादितश्च ये ।
त्रयस्त्रयश्चोपदंशाः स्तनरोगा विदारिका ॥१३॥
शौषिरोगलशालूकं कण्टकाः कृमिदन्तकः ।
दन्तवेष्टः सोपकुशः शीतादो दन्तपुप्पुटः ॥१४॥
पितास्टक्कफजाश्चौष्ठ्याः क्षुद्ररोगाश्च भूयसः ।

सीव्या व्याधयः ॥

सीव्या मेदःसमुत्थाश्च भिन्नाः सुलिखिता गदाः ॥१५॥
सद्यो व्रणाश्च ये चैव चलसंधिव्यपाश्रयाः ।
नक्षाराग्निविषैर्जुष्टाः न वा मारुतवाहिनः ॥१६॥
नान्तर्लोहितशल्याश्च तेषु सम्यग्विशोधनम् ।
पाशुरोमनखादीनि चलमस्थिभवेच्च यत् ॥१७॥
अहृतानि यतोऽमूनि पाचयेयुर्भृशं व्रणम् ।
रुजश्च विविधाः कुर्य्युस्तस्मादेतान्विशोधयेत् ॥१८॥
ततोव्रणं समुन्नम्य स्थापयित्वा यथास्थितम् ।
सीव्येत्सूक्ष्मेण सूत्रेण वल्केनास्मंतकस्यवा ॥१९॥
(शणजन्नौमसूत्राभ्यां स्नाय्वा वालेन वा पुनः)
मूर्वागुडूचीतानै वा सीव्येद्वेष्टितिकं शनैः ।
सीव्येद् गोफणिकां वापि सीव्येद् वा तुन्नसेवनीम् ॥२०॥
ऋजुग्रंथिमथो वापि यथायोगमथापि वा ।
देशेऽल्पमांसे संधौ च सूचीवृत्तांगुलद्वयम् ॥२१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नातिदूरे निकृष्टे वा सूचीं कर्मणि पातयेत् ।
दूराद्रुजो व्रणोष्ठस्य सन्निकृष्टेऽवलुञ्चनम् ॥२२॥
अथ क्षौमपिचुच्छन्नं सुस्थूतं प्रतिसारयेत् ।
प्रियंग्वञ्जनयष्ट्याह्वरोध्रचूर्णैः समन्ततः ॥२३॥
सल्लकीफलचूर्णैर्वा क्षौमध्यामेन वा पुनः ।
ततो व्रणं यथायोगं वदध्वाचारिकमादिशेत् ॥२४॥
एतदष्टविधं कर्म समासेन प्रकीर्तितम् ।
चिकित्सितेषु कार्त्स्न्येन विस्तरस्तस्य वक्ष्यते ॥२५॥
हीनातिरिक्तं तिर्यक् च गात्रच्छेदनमात्मनः ।
एताश्चतस्रोऽष्टविधे कर्मणि व्यापदः स्मृताः ॥२६॥
अज्ञानलोभाहितवाक्ययोगभयप्रमोहैरपरैश्च भावैः ।
यदा प्रयुंजीत भिषक् कुशस्त्रं तदा सशेषान् कुरुते विकारान् ॥२७॥
तं क्षारशस्त्राग्निभिरौषधैश्च भूयोऽभियुञ्जानमयुक्तियुक्तम् ।
जिजीविषुं दूरत एव वैद्यं विवर्जयेदुग्रविषाहितुल्यम् ॥२८॥
तदेव युक्तं त्वतिमर्मसंधीन् हिंस्याच्छिरास्नायुमथास्थिचैव ।
मूर्खप्रयुक्तं पुरुषं क्षणेन प्राणैर्वियुञ्ज्यादथवा कथंचित् ॥२९॥
भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं ग्लानिरथोष्णता च ।
सूस्तांगता मूर्च्छनमूर्ध्ववात स्तीव्ररुजो वातकृताश्च तास्ताः ॥३०॥
मांसोदकाभं रुधिरं च गच्छेत् सर्वेन्द्रियार्थेषु परमस्तथैव ।
दशाद्यसंख्येष्वपि हि क्षतेषु सामान्यतो मर्मसुलिंगमुक्तम् ॥३१॥
सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेद् वै क्षततश्च वायुः ।
करोतिरोगान् विविधान् यथोक्तान् छिन्नासु भिन्नास्वथवा सिरासु ॥३२॥
कौब्ज्यं शरीरावयवावसादः क्रियास्वशक्तिस्तुमुला रुजश्च ।
चिराद्व्रणो रोहति यस्य चापि तं स्नायुविद्धं पुरुषं व्यवस्येत् ॥३३॥
शोफाभिवृद्धिस्तुमुला रुजश्च वलक्षयः पर्वसु भेदशोथौ ।
क्षतेषु संधिष्वचलाचलेषु स्यात्संधिकर्मोपरतिश्च लिंगम् ॥३४॥
घोरारुजो यस्य निशादिनेषु सर्वास्ववस्थासु न शान्तिरस्ति ।
तृष्णांगसादौ श्वयथुश्च रुक्षस्तमस्थिविद्धं पुरुषं व्यवस्येत् ॥
यथास्वमेतानि विभावयेत्तु लिंगानि मर्मस्वभिताडितेषु ।
स्पर्शं न जानाति विपाण्डुवर्णः यो मांसमर्मण्यभिताडितः स्यात् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आत्मानमेवाथ जघन्यकारी शस्त्रेण यो हन्ति हि कर्म कुर्वन् ।
तमात्मवानात्महनं कुवैद्यं विवर्जयेदायुरभीप्समानः ॥
तिर्यक्प्रणिहिते शस्त्रे दोषाः पूर्वमुदाहृताः ।
तस्मात्परिहरन्दोषान् कुर्यात् शस्त्रनिपातनम् ॥
कर्मणा कश्चिदेकेन द्वाभ्यां कश्चित्त्रिभिस्तथा ।
विकारः साध्यते कश्चिच्चतुर्भिरपि कर्मभिः ॥

इति शल्यतन्त्रसमुच्चयेऽष्टविधकर्मीयो नाम सप्तदशोऽध्यायः ।

अथाष्टादशोऽध्यायः

अथातो वीपरीतावीपरीतव्रणविज्ञानीयमध्यायं व्याख्यास्यामः । व्रणस्य साध्यसाध्यविज्ञानमन्तराअष्टविधकर्म वैयर्थं अतोऽष्ट-विधकर्मानन्तरं विपरीताविपरीतव्रणविज्ञानीयो वक्ष्यते ॥१॥

फलाग्निजलवृष्टीनां पुष्पधूमाम्बुदा यथा ।
ख्यापयन्ति भविष्यत्वं तथारिष्टानि पञ्चताम् ॥२॥
तानि सौदम्यात्प्रमादाद्वा तथैवाशु व्यतिक्रमात् ।
गृह्यन्ते नोदगतान्यज्ञै र्मुमुर्षोर्नान्त्वसम्भवात् ॥३॥
ध्रुवन्तु मरण रिष्टे ब्राह्मणैस्तत्किलामलैः ।
रसायनतपोजप्यतत्परै र्वा निवार्यते ॥४॥
नक्षत्रपीड़ा वहुधा यथा कालाद्विपच्यते ।
तथैवारिष्टपाकञ्च ब्रुवते वहुधा जनाः ॥५॥
असिद्धिमाप्नुयाल्लोके प्रतिकुर्वन् गतायुषः ।
अतो रिष्टानि यत्नेन लक्षये त्कुशलोभिषक् ॥६॥
गंधवर्णरसादीनां विशेषाणां समासतः ।
वैकृतं यत्तदाचष्टे व्रणिनः पक्वलक्षणम् ॥७॥
कटुस्तीक्ष्णश्च विस्रश्च गंधस्तु पवनादिभिः ।
लोहगंधिस्तु रक्तेन व्यामिश्रः सान्निपातिकः ॥८॥
लाजातसीतैलसमाः किञ्चिद्विस्राश्च गंधतः ।
ज्ञेयाः प्रकृतिगंधाः स्युरतोन्यद्गंधवैकृतम् ॥९॥
मद्यागुर्वाज्यसुमनः पद्मचन्दनचम्पकैः ।
सगंधाः पंकगंधाश्च भूमिगंधाश्च गर्हिताः ॥१०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्वबाजिमूषकध्वांक्ष पूतिवल्लूरमत्कुणैः।
सगंधाः दिव्यगंधाश्च सुमूर्पूणां व्रणाः स्मृताः ॥११॥
श्यामकृकुमकंकुष्टसवर्णाः पित्तकोपतः।
न दह्यन्ते न चूष्यन्ते भिषक् तान् परिवर्जयेत् ॥१२॥
कण्डूमन्तः स्थिराः श्वेताः स्निग्धाः कफनिमित्ततः।
दूयन्ते वापि दह्यन्ते भिषक् तान्परिवर्जयेत् ॥१३॥
कृष्णास्तु ये तनुस्रावाः वातजाः मर्मतापिनः।
स्वल्पामपि न कुर्वन्ति रुजं तान्परिवर्जयेत् ॥१४॥
क्वेडन्ति धुर्धुरायन्ते ज्वलन्तीव च ये व्रणाः।
त्वङ्मांसस्थाश्च पवनं सशब्दं विस्टजन्ति ये ॥१५॥
ये च मर्मस्वसम्भूताः भवन्त्यत्यर्थवेदनाः।
दह्यन्ते चान्तरत्यर्थं बहिः शीताश्च ये व्रणाः ॥१६॥
दह्यन्ते बहिरत्यर्थं भवंत्यन्तश्च शीतलाः।
शक्तिकुन्तध्वजरथा वाजिवारणगोवृषाः ॥१७॥
येषु चाप्यवभासेरन् प्रासादाकृतयस्तथा।
चूर्णावकीर्णा इव ये भान्ति वा न च चूर्णिताः। १८॥
प्राणमांसक्षयश्वासकासारोचकपीडिताः।
प्रवृद्धपूयरुधिरा व्रणाः येषाञ्च मर्मसु ॥१९॥
क्रियाभिः सम्यगारब्धा नसिद्ध्यति च ये व्रणाः।
वर्जयेत्तान् भिषक् प्राज्ञः संरक्षन्नात्मनो यशः ॥२०॥

इति शल्यतन्त्रसमुच्चये विपरीताविपरीतव्रणविज्ञानीयो नामाष्टादशोऽध्यायः

अथैकोनविंशोऽध्यायः

अथातः शल्यविज्ञानीयमध्यायंव्याख्यास्यामः ॥
शल्श्वल आशुगमने, अस्य धातोः शल्यमिति रूपम् ॥ १ ॥
तद्विविधं शारीरमागन्तुकञ्च ॥ २ ॥
सर्वशरीरावाधकरं, तदिहोपदिश्यते शल्यमित्यतः शल्यशास्त्रम् ॥३॥
तत्रशारीरं नाम रोमनखादिधातवोऽनमला दोषाश्च दुष्टाः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आगन्तुरपि शारीरशल्यव्यतिरेकेण यावन्तो भावाः दुःखमुत्पाद्-यन्ति ॥ ४ ॥

अधिकारो हि लोहवेणुवृन्ततृणशृङ्गास्थिमयेषु तत्रापि विशेषतो-लोहेष्वेव विशसनार्थोपपन्नत्वाल्लोहस्य, लोहानामपि दुर्वारत्वादणु-मुखत्वाद्बहूपयोजनत्वात् शर एवाधिकृतः ॥ ५ ॥

स द्विविधः कर्णीश्लक्ष्णश्च तत्र प्रायेण विविधवृक्षपत्रपुष्पफल तुल्याकृतयो व्याख्याताः-व्याल-मृग-पक्षि-वल्क-सदृशाश्च ॥ ६ ॥

सर्वशल्यानां महतामणूनां पञ्चविधोगतिविशेषः ऊर्ध्वमधोऽर्वा-चीनस्तिर्यग्गृजुरिति ॥ ७ ॥

तानिवेगक्षयात्प्रतिघाताद्वा त्वगादिषु व्रणवस्तुषु, अवतिष्ठंतेधमनी-स्रोतोऽस्थिविवरेषु पेशीप्रभृतिषु वा शरीरप्रदेशेषु तत्र शल्यलक्षण-मुच्यमानमवधारय ॥ ८ ॥

तत्तु द्विविधं सामान्यं वैशेषिकञ्च तत्र श्यावं रुशोफं पिडकाचितं मुहुर्मुहुः शोणितवाहिनञ्च । मृदूद्गतम् बुद्बुदतुल्यभांसं व्रणं सशल्यं सरुजं वदन्ति ॥ ९ ॥

वैशेषिकन्तु त्वग्गते विवर्णः शोफो भवति आयतः कठिनश्च । मांसगते शोफाभिवृद्धिः शल्यमार्गानुपसंरोहः पीड़नासहिष्णुता चोष पाकौ च । पेश्यन्तरस्थे चाप्येतदेव चोषशोफवर्जम् । सिरागते सिराध्मानं सिराशूलं सिराशोफश्च । स्नायुगते स्नायुजालोत्क्षेपणं संरम्भ चोग्रारुक्च ॥ १० ॥

स्रोतोगते स्रोतसां स्वकर्मगुणहानिः; धमनिस्थे सफेनम् रक्तमीर-यन्निलः सशब्दो निर्गच्छति अंगमर्दः पिपासाहल्लासश्च । अस्थिगते विविधवेदनाप्रादुर्भावः शोफ, श्चास्थिविवरगतेऽस्थिपूर्णता अस्थितोदः संहर्षोवलवाँश्च,संधिगते अस्थिवच्चेष्टोपरमश्च,कोष्ठगते आटोपानाहौ-मूत्रपुरीषाहारदर्शनश्च व्रणमुखात्; ममगते र्मविद्धवच्चेष्टते; सूक्ष्म-गतिषु शल्येष्वेतान्येवलिंगान्यल्पानि भवंति ॥ ११ ॥

महान्ति अल्पानि वा शुद्धदेहानामनुलोमसन्निविष्टानिरोहन्ति-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विशेषतः कण्ठ-स्रोतः-सिरा-त्वक्-पेश्यस्थि-विवरेषु, दोषप्रकोप-व्यायामादिभ्यः प्रचलितानि पुनर्बाधन्ते ॥ १२ ॥

वृत्तं पृथु चतुष्कोणं, त्रिपुटञ्च समासतः ।
अदृश्यशल्यसंस्थानं व्रणाकृत्याविभावयेत् ॥१२॥

सामान्यलक्षणमपि हस्तिस्कन्धाश्वपृष्ठपर्वतद्रुमारोहणधनुर्व्यायाम-द्रुत-याननियुद्धाध्वगमन-लंघन-प्रतरण-प्लवन-व्यायामैः । जृम्भोद्गारकास-क्षवथु-ष्ठीवन-हसन-प्राणायामैः वातमूत्रपुरीषशुक्रोत्सर्गैर्वा यत्र सरम्भोवेदना वा भवति तत्र शल्यं जानीयात् ॥१३॥

— : भवंति चात्र :—

यस्मिँ स्तोदादयो देशे सुप्तता गुरुतापि च ।
घट्टते वहुशो शब्दं स्रुयते तुद्यतेऽपि च ॥१४॥
आतुरश्चापियं देशमभीक्ष्णं परिरक्षति ।
सम्वाह्यमानो वहुशस्तत्र शल्यं विनिर्दिशेत् ॥१५॥
अल्पवाधमशूनञ्च, निरुजं निरुपद्रवम् ।
प्रसन्नं मृदुपर्यन्तं निराघट्टमनुन्नतम् ॥१६॥
एषण्या सर्वतो दृष्ट्वा यथामार्गं चिकित्सकः ।
प्रसाराकुञ्चनान्नूनं निःशल्यमिति निर्दिशेत् ॥१७॥
अस्थ्यात्मकं भज्यते च शल्यमन्तश्च शीर्यते ।
प्रायो निर्भुज्यते शार्ङ्गमायसञ्चेति निश्चयः ॥१८॥
वार्क्ष्यवैणवतार्णानि निर्ह्रियन्ते तु नो यदि ।
पचन्ति रक्तं मासञ्च क्षिप्र मेतानि देहिनाम् ॥१९ ॥
कानकं राजतं ताम्रं रैतिकं त्रपुसीसकम् ।
चिरस्थानाद्विलीयन्ते पित्ततेजःप्रतापनात् ॥२०॥
स्वभाशीताः मृदवो येचान्येऽपीदृशामताः ।
द्रवीभूता शरीरेऽस्मिन्नेकत्वं यान्तिधातुभिः ॥२१
द्विविधं पञ्चगतिमत्त्वगादिव्रणवस्तुषु ।
विश्लिष्टं वेत्तियःशल्यं सराज्ञः कर्तुमर्हति ॥२२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषाणदन्तकेशास्थिवेणुदारूपलानि च ।
शल्यानि न विशीर्यन्ते शरीरे मृन्मयानि च ॥२३॥

इति शल्यतन्त्रसमुच्चये शल्यविज्ञानीयोनामैकोनविंशतिरध्यायः ।

अथविंशोऽध्यायः

अथातः शल्यापनयनीयमध्यायं व्याख्यास्यामः ॥ १ ॥

शल्यं द्विविधमवबद्धमनवबद्धञ्च ॥ २ ॥

तत्र समासेनानवबद्धशल्योद्धरणार्थं पञ्चदश हेतून् वक्ष्यामः तद्यथा स्वभावः, पाचनं, भेदनं, दारणं, पीड़नं, प्रमार्जनं, निर्ध्मापनं, वमनं विरेचनं, प्रक्षालनं, प्रतिमर्षः, प्रवाहणं, आचूषणम् अयस्कान्तो, हर्षश्चेति ॥ ३ ॥

तत्राश्रुक्षवथूद्गारकासमूत्रपुरीषानिलैः स्वभावबलप्रवृत्तैर्नयनादिभ्यः पतति,, मांसावगाढं शल्यमविदह्यमानं पाचयित्वा प्रकोथात् तस्य पूयशोणितवेगाद् गौरवाद्वा पतति पक्वमभिद्यमानं भेदयेद्दारयेद्वा भिन्नमनिरस्यमानं पीड़नीयैः पीड़येत्पाणिभिर्वा ॥ ४ ॥

अणूनि अक्तशल्यानिपरिषेचनाभ्यामापन्ने वालवस्त्रपाणिभिः प्रमार्जयेत् ॥ ५ ॥

आहारशेषश्लेष्महीनाणुशल्यानि श्वसनोत्कासनप्रधमनैर्निर्धमेत् अन्नशल्यानि वमनांगुलीप्रतिमर्षप्रभृतिभिः ।

विरेचनैः पक्वाशयगतानि प्रक्षालनैः व्रणदोषाशयगतानि; वातमूत्रपुरीषगर्भसंगेषु प्रवाहणमुक्तम्; मारुतोदकसविषदुष्टस्तन्येषु आचूषणम् आस्येन विषाणैर्वा, अनुलोममनवबद्धमकर्णमनल्पव्रणमुखमयस्कान्तेन; हृद्यवस्थितमनेककारणोत्पन्नं शोकशल्यं हर्षणेति ॥ ५ ॥

सर्वशल्यानां महतामणूनां द्वावेवाहरणहेतूभवतः प्रतिलोमोऽनुलोमश्च ॥६॥

तत्र प्रतिलोममर्वाचीनमानयेदनुलोमं पराचीनम् ॥७॥

उत्तुण्डितं छित्त्वा निर्घातयेत् छेदनीयमुखम् ॥८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छेदनीयमुखान्यपि कुक्षिवङ्क्षकक्षावंक्षणपशुकान्तरपतितानि च न निर्घातयेत् ॥ ९ ॥

अनुत्तुण्डितशल्यानि छेदनीयमुखान्यपि
अनिर्घात्यानि जानीयाद्भूयश्छेदानुबंधतः ॥१०॥

हस्तशक्यं यथामार्गं हस्तेनैवापहर्त्तुं यतेत् ॥११॥

हस्तेनापहर्तुमशक्यं विशस्य यन्त्रेणशस्त्रेण वापहरेत् ॥१२॥

शीतलेन जलेनैनं मूर्च्छन्तमवसेचयेत् ।
संरक्षेदस्य मर्माणि मुहुराश्वासयेच्चतम् ॥१३॥

ततः शल्यमुद्धृत्य निर्लोहितं व्रणं कृत्वा स्वेदार्हमग्निघृतप्रभृतिभिः संस्वेद्य विदह्य प्रदिह्य वा मधुसर्पिर्भ्याम् बद्धाचारिकमादिशेत् ॥१४॥

शिरास्नायुविलग्नं शलाकादिभिर्विमोच्यापनयेत्, श्वयथु-ग्रस्तवारंगं समवपीड्यश्वयथुं दुर्बलवारंगं कुशादिभि र्बद्ध्वापहरेत् ॥१५॥

हृदयमभितो वर्तमानं शल्यं शीतलजलादिभिरुद्धे जितस्य अपहरेद् यथामार्गम् दुरुपहरम् अन्यतोपवाध्यमानम् पाटयित्वोद्धरेत् ॥१६॥

अस्थिविवरप्रविष्टमस्थिविदृष्टं वावगृह्य पादाभ्याम् यन्त्रेणापहरेत्, अशक्यमेवं वा बलवद्भिः किंकरैः सुपरिगृहीतस्ययन्त्रेण ग्राहयित्वा शल्यवारंगं प्रविभुज्य धनुर्गुणैर्बद्ध्वापहरेत् ॥१७॥

एकतश्चास्याः पञ्चांग्यामुपसंयतस्य अश्ववक्त्रकटके वा बध्नीयात् अथैनं कशया ताडयेत् यथोन्नामयन् शिरोवेगेन शल्यमुद्धरति, दृढां वा वृक्षशाखामवनम्य तस्यां पूर्ववद्बद्ध्वोपहरेत् ॥१८॥

अस्थिदेशोत्तुण्डितमष्टीलाश्ममुद्गराणामन्यतमस्य प्रहारेण विचाल्य यथामार्गमेवं यन्त्रेण ॥१९॥

विमृदितकर्णानि कर्णवन्ति अनवाधकरदेशोत्तुण्डितानि पुरस्तादेव ॥२०॥

जातुषे कण्ठासक्ते कण्ठे नाडीं प्रवेश्य अग्नितप्तांचशलाकां तया वगृह्य शीताभिरद्भिः परिषिच्य स्थिरीभूतमुद्धरेत् ॥२१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अजातुषं जतुमधूच्छिष्टलिप्तया शलाकया पूर्वकल्पेनेत्येके ॥२२॥

अस्थिशल्यमन्यद्वा तिर्यक् कण्ठासक्तमवेक्ष्य केशोण्डुकं दृढैक सूत्रवद्धं द्रवभक्तोपहितं पाययेत् आकण्ठात्, पूर्णकोष्ठञ्च वामयेत्, वमतश्च शल्यैकदेशशक्तं ज्ञात्वा सूत्रं सहसा त्वाक्षिपेत् ॥२३॥

मृदुना वा दन्तधावनकूर्चकेनापहरेत्, प्रणुदेद्वान्तः क्षतकण्ठाय च मधुसर्पिषिलेढुं प्रयच्छेत्, त्रिफलाचूर्णम्वा मधुशर्कराविमिश्रम् ॥२४॥

उदकपूर्णोदरमवाक् शिरसमवपीड़येत् धुनीयाद्वामयेत् भस्मराशौ वा निखनेदामुखात् ॥२५॥

ग्रासशल्ये तु कण्ठासक्ते निःशंकमनवबुद्धं स्कंधे मुष्टिनाभिहन्यात् मद्यं पानीय म्वा पाययेत् ॥२६॥

वाहुरज्जुलतापाशैः कण्ठपीड़नाद्वायुः प्रकुपितः श्लेष्माणं कोपयित्वा स्रोतो निरुणद्धि, लालास्रावं फेनागमनं संज्ञानाशं चापादयति, तमभ्यज्य संस्वेद्य शिरोविरेचनं तस्मै दद्यात् तीक्ष्णम्, रसञ्च वातघ्नं विदध्यात् ॥२७॥

॥ शल्याकृतिविशेषाँश्च स्थानान्यवेक्ष्य बुद्धिमान् ॥
तथा यन्त्रपृथक्त्वं च सम्यक् शल्यमथाहरेत् ॥२८॥

कर्णवन्ति तु शल्यानि दुःखाहार्याणि यानि च ।
आददीत भिषक् तस्मात्तानि युक्त्या समाहितः ॥२९॥

एतै रुपायैः शल्यन्तु नैव निर्घात्यते यदि ।
मत्य निपुणया वैद्यो यन्त्रयोगैश्च निर्हरेत् ॥३०॥

शोथपाकौ रुजश्चोग्रा कुर्यात् शल्यमनिर्हृतम् ।
वैकल्यं मरणञ्चापि तस्माद्यत्नाद्धिनिर्हरेत् ॥३१॥

इति शल्यतन्त्रसमुच्चये शल्यापनयनीयो नाम विंशोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथैकविंशोऽध्यायः ॥

संज्ञातव्रणस्य भिषज श्चिकित्साया आवश्यकताभवतिअतो हि चिकित्सां वक्ष्यमाणाः पूर्वमालेपनादिज्ञानार्थंमिश्रकं वक्ष्यामः ॥ १ ॥

मातुलुंगानि मंथौ च भद्रदारुमहौषधम् ।
अहिंसा चैव रास्ना च प्रलेपो वातशोफहृत् ॥२॥
दूर्वा च नलमूलञ्च मधूकं चन्दनं तथा ।
शीतलाश्च गणा स्सर्वे प्रलेपः पित्तशोफहृत् ॥३॥
आगन्तुजे रक्तजे च एष एवं विधिः स्मृतः ।
विधि र्विषघ्नो विषजे पितघ्नोपि हितस्तथा ॥४॥
अजगंधाश्वगंधा च काला सरलया सह ।
एकैषिकाजशृंगी च प्रलेपः श्लेष्मशोफहृत् ॥५॥
एते वर्गा स्त्रयो लोध्रं पथ्या पिण्डीतकानि च ।
अनन्ता चेति लेपोऽयं सान्निपातिकशोफहृत् ॥६॥
शोथविम्लापनार्थं हि लेपाश्चैते प्रकीर्तिताः ॥
स्निग्धाम्ललवणो वाते कोष्णःशीतः पयोयुतः ।
पित्ते चोष्णः कफे क्षारमूत्राढ्य स्तत्प्रशान्तये ॥७॥
शणमूलकशिग्रूणांफलानि तिलसर्षपाः ।
सक्तवः किण्वमतसी द्रव्याण्युष्णानि पाचनम् ॥८॥
चिरविल्वोनि को दन्ती चित्रको हयमारकः ।
कपोतगृध्रकंकानां पुरीषाणि च दारणम् ॥९॥
क्षारद्रव्याणि वा यानि क्षारो वा दारणम्परम् ।
द्रव्याणांपिच्छिलानान्तु त्वङ्मूलानि प्रपीड़नम् ॥१०॥
यवगोधूममाषाणां चूर्णानि च समासतः ।
शंखिन्यंकोठसुमनः करवीरसुवर्चलाः ।
शोधनानि कषायाणि वर्गश्चारग्वधादिकः ॥११॥
अजगंधाजशृङ्गी च गवाक्षी लांगलाह्वया ।
पूतीकश्चित्रकः पाठा विड़ंगैलाहरेणवः ॥१२॥
कटुत्रिकं यवक्षारो लवणानि मनः शिला ।
कांसीसंत्रिवृतादन्ती हरिताल सुराष्ट्रजा ॥१३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संशोधिनीनां वर्तीनां द्रव्याण्येतानि निर्दिशेत् ।
एतैरेवौषधैः कुर्यात् कल्कानपि च शोधनान् ॥१४॥
कासीसकटुरोहिण्यो जातीकन्दहरिद्रयोः ।
पूर्वोद्दिष्टेषु चान्नेषु कुर्यात् तैलघ्टतानि वै ॥१५॥
अर्कोत्तमांस्नूहिक्षीरं पिष्ट्वा क्षारोत्तमानपि ।
जातिमूलं हरिद्रे द्वे कासीसं कटुरोहिणीम् ॥१६॥
पूर्वोद्दिष्टानि चान्यानि कुर्यात् संशोधनं घ्टतम् ।
मयूरको राजघ्टक्षः निम्बः कोशातकी तिलाः ॥१७॥
घ्टहती कंटकारी च हरितालं मनःशिला ।
शोधनानि च योज्यानि तैले द्रव्याणि शोधने ॥१८॥
कासीसे सैंधवे किण्वे वचायां रजनीद्वये ।
शोधनाङ्गेषु चान्येषु चूर्णं कुर्वीत शोधनम् ॥१९॥
शालासारादिसारेषु पटोलत्रिफलासु च ।
रसक्रिया विधातव्या शोधनी शोधनेषु च ॥२०॥
श्रीवेष्टके सर्जरसे सरले देवदारुणि ।
सारेष्वपि च कुर्वीत मतिमान् व्रणधूपनम् ॥२१॥
कषायाणामनुष्णानां घ्टक्षाणां त्वक्षु साधितम् ।
श्रृतं शीतं कषायम्वा रोपणार्थेषु शस्यते ॥२२॥
सोमामृताश्वगंधासु काकोल्यादौ गणे तथा ।
क्षीरिप्ररोहेष्वपि च वर्तयो रोपणाः स्मृताः ॥२३॥
समंगा सोमसरला सोमवल्काः सचंदनाः ।
काकोल्यादिश्च कल्कः स्यात् प्रशस्तो व्रणरोपणे ॥२४॥
घ्टथक्पर्ण्यात्मगुप्ता च हरिद्रे मालती सिता ।
काकोल्यादिश्च योज्यः स्यात् भिषजा रोपणे घ्टते ॥२५॥
कालानुसार्यागुरुणी हरिद्रे देवदारु च ।
प्रियंगवश्च रोध्रश्च तैले योज्यानि रोपणे ॥२६॥
कंगुका त्रिफला रोध्रं कासीसं श्रवणाह्वया ।
धवाश्वकर्णयो स्त्वक् च रोपणं चूर्णमिष्यते ॥२७॥
प्रियंगुका सर्जरसः पुष्पं कासीसमेव च ।
त्वक्चूर्णं धवजं चैव रोपणार्थं प्रशस्यते ॥२८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वक्षुन्यग्रोधवर्गस्य त्रिफलायास्तथैव च ।
रसक्रियां रोपणार्थे विदधीत यथाक्रमम् ॥२९॥
अपामार्गोऽश्वगंधा च तालपर्णी सुवर्चला ।
उत्सादने प्रशस्यन्ते काकोल्यादिश्च यो गणः ॥३०॥
कासीसं सैंधवं किण्वं कुरुविन्दो मनःशिला ।
कुक्कुटाण्डकपालानि सुमनोमुकुलानि च ॥३१॥
फले शैरीषिकारञ्जे धातुचूर्णानि यानि च ।
व्रणेषूत्सन्नमांसेषु प्रशस्तान्यवसादने ॥३२॥
समस्तवर्गमर्द्धं वा यथालाभमथापि वा ।
प्रयुञ्जीत भिषक् प्राज्ञो यथादिष्टेषु कर्मसु ॥३३॥

इति शल्यतन्त्रे एकविंशोऽध्यायः ।

अथातो द्विव्रणीयमध्यायं व्याख्यास्यामः ॥ १ ॥

द्वौ व्रणौ भवतः शारीर आगन्तुकश्चेति, तयोः शारीरः पवन-पित्त-कफ-शोणित-सन्निपात-निमित्तः ॥ २ ॥

आगन्तुरपि पुरुष-पशु-पक्षि-व्याल-सरीसृप-प्रपतन-पीडन-प्रहाराग्नि-क्षार-विष-तीक्ष्णौषध-शकल-कपाल-शृङ्ग-चक्रोपरशु-शक्ति-कुन्ताद्यायुधा-भिघात-निमित्तः ॥ ३ ॥

तत्र तुल्ये व्रणसामान्ये द्विकारणोत्थानप्रयोजन-सामर्थ्याद् द्विव्रणीय इत्युच्यते ॥ ४ ॥

सर्वस्मिन्नेवागन्तुव्रणे तत्कालमेव क्षतोष्मणः प्रसृतस्योपशमार्थं पित्तवत् शीतक्रियावचारणविधिविशेषः, सन्धानार्थश्च मधुघृतप्रयोगः ॥ ५ ॥

इत्येतद् द्विकारणोत्थानप्रयोजनमुत्तरकालन्तुदोषोपप्लवविशेषात् शारीरवत्प्रतीकारः ॥ ६ ॥

दोषोपप्लवविशेषः पुनः समासेन पञ्चदशप्रकारः शुद्धत्वात् षोड़श इत्येके ॥ ७ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य लक्षणं द्विविधं सामान्यं वैशेषिकञ्च, 'तत्र सामान्यं रुक् व्रणगात्रविचूर्णने, व्रणयतीतिव्रणः विशेषलक्षणं पुन र्वातादिलिंगविशेषः ॥ ८ ॥

तत्र श्यावारुणाभस्तनुः शीतः पिच्छिलोऽल्पस्रावी रुक्षश्चटचटायनशीलः स्फुरणायामतोदभेदवेदनाबहुलो निर्मांसश्चेति वातात् ॥ ९ ॥

क्षिप्रजः पीतनीलाभः किंशुकोदकाम्भोष्णस्रावी दाहपाकरागविकारो पित्तपिडकाजुष्टश्चेति पित्तात् ॥ १० ॥

प्रततश्वयथुकण्डूबहुलः स्थूलो घनः स्तब्धसिरास्नायुजालावततः कठिनः पांडवावभासः मन्दवेदनः शुक्लशीतस्नान्द्रपिच्छिलास्रावी गुरुश्चेति कफात् ॥ ११ ॥

प्रवालदलनिचयप्रकाशः कृष्णस्फोटपिडकाजालोपचितस्तुरंगस्थानगंधः सवेदनः धूमायनशीलस्तद्वर्णस्रावी पित्तलिंगश्चेतिरक्तात् ॥१२॥

तोददाहधूमायनशीलः पीतारुणाभासस्तद्वर्णस्रावी चेति वातपित्ताभ्याम् ॥ १३ ॥

कण्डूयनशीलः सनिस्तोदो दारुणो मुहुर्मुहुः शीतपिच्छिलास्रावीचेति वातश्लेष्मभ्याम् ॥ १४ ॥

गुरुः सदाहः उष्णः पीतः पाण्डुस्रावी चेति पित्तश्लेष्मभ्याम् ॥१५॥

रुक्षस्तनुस्तोदबहुलः सुप्तइवचरक्तारुणाभः तद्वर्णस्रावी चेति वातशोणिताभ्याम् ॥ १६ ॥

घृतमण्डाभोमीनधावनतोयगंधी मृदु विसर्पीउष्णस्रावी चेति पित्तशोणिताभ्याम् ॥ १७ ॥

रक्तो गुरुः पिच्छिलः कण्डूप्रायः स्थिरोरक्तःपाण्डुस्रावीचेति श्लेष्मशोणिताभ्याम् ॥ १८ ॥

स्फुरणतोददाहधूमायनप्रायः पीततनुरक्तस्रावी चेति वातपित्तशोणितेभ्यः ॥ १९ ॥

कण्डूस्फुरणचुंचुमायनप्रायः पाण्डुघनरक्तस्रावी चेति वातश्लेष्मशोणितेभ्यः ॥ २० ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0, In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दाहपाकरागकण्डूप्रायः पाण्डुघनरक्तस्रावी चेतिश्लेष्मपित्तशोणितेभ्य ॥ २१ ॥

त्रिविधवर्णवेदनास्रावविशेषोपेतः पवनपित्तकफेभ्यः ॥ २२ ॥

निदर्हन-निर्मथन-स्फुरण-तोद-दाह-पाक-राग-कण्डू-स्वाप-बहुलो-नाना-वर्ण-वेदना-स्राव-विशेषोपेतः पवनपित्तकफशोणितेभ्यः ॥ २३ ॥

जिह्मवातलाभो मृदुः स्निग्धः श्लक्ष्णः विगतवेदनः सुव्यवस्थितो निरास्रावः इति शुद्धो व्रणः ॥ २४ ॥

तस्य षष्टिरुपक्रमाः भवन्ति तद्यथा—

अपतर्पणमालेपः परिषेकस्तथैव च ।
स्वेदविस्लापनाभ्यंगा उपनाहश्च पाचनम् ॥२५॥
विस्रावणं स्नेहवमने रेचनं छेदनन्तथा ।
भेदनं दारणं प्रोक्तं लेखनञ्चैषणं ततः ॥२६॥
व्यधनाहरणे चापि विस्रावणसुसीवने ।
संधानं पीडनं चैव शोणितास्थापनन्तथा ॥२७॥
कषायोत्कारिकावर्त्यः कल्को निर्वापणं मतम् ।
चूर्णनं धूपनञ्चैवसर्पिस्तैलं रसक्रिया ॥२८॥
उत्सादनावसदनं मृदुदारुणकर्म च ।
कृष्णकर्म पाण्डुकर्म क्षारकर्माग्निकर्मकम् ॥२९॥
प्रतिसारपरंतात रोमसञ्जननं परम् ।
निरूहोत्तरवस्तीच कर्म लोमापहन्तथा ॥३०॥
पत्रदानं कृमिघ्नञ्च बंधः बृहणमेव च ।
विबन्धं मूर्धरेकंश्च नस्यंकवलधारणम् ॥३१॥
मधुसर्पिस्तथा यन्त्रमाहारश्चापि भाषितः ।
रक्षाविधानमित्येताःस्मृताः षष्टिरुपक्रमाः ॥३२॥

तेषु कषायोवर्तिस्तैलं कल्कः सर्पिः रसक्रियाचूर्णनमिति शोधनरोपणानि ॥३३॥

तेषु अष्टौ शस्त्रकृत्याः, शोणितास्थापनं क्षारोऽग्निः यन्त्रमाहारोरक्षाविधानं बंधविधानं चोक्तानि ॥३४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्नेह-स्वेद-वमन-विरेचन-वस्त्युत्तरवस्ति-शिरोविरेचन-नस्य-धूम-कवल-धारणानि कायचिकित्सासु वक्ष्यामः यदन्यदवशिष्टमुपक्रमजातं तदिह वक्ष्यामः ॥३५॥

इति शल्यतन्त्रसमुच्चये द्वाविंशोऽध्यायः ।

॥ अथत्रयोविंशोऽध्यायः ॥

अथातोद्विव्रणीयचिकित्सितंव्याख्यास्यामः ॥१॥

षड्विधः प्राग्उपदिष्टः शोफः तस्यैकादशोपक्रमा भवन्ति, अपतर्पणादयो विरेचनान्ताः ॥२॥

ते च विशेषेण शोथप्रतीकारा एव व्रणभावमापन्नस्य न विरुद्ध्यन्ते, शेषास्तु प्रायेण व्रणप्रतिकारहेतवः एव ॥३॥

अपतर्पणन्तु आद्य उपक्रमः एष सर्वशोफानां सामान्यः प्रधानतमश्च ॥४॥

अपतर्पणम् ॥१॥

दोषोच्छ्रायोपशान्त्यर्थं दोषानद्धस्य देहिनः ।
अवेक्ष्यदोषं प्राणञ्च कार्यं स्यादपतर्पणम् ॥५॥
ऊर्ध्वमारुततृष्णाच्छुन्मुखशोषभ्रमान्वितैः ।
न कार्यं गर्भिणि-बाल-वृद्ध-दुर्बल-भीरुभिः ॥६॥

आलेपः २ ।

शोफेषूत्थितमात्रेषु व्रणेषूग्ररुजेषु च ।
यथास्वैरौषधैर्लेपं प्रत्येकं चैव कारयेत् ॥७॥
यथाप्रज्वलिते वेश्मन्यम्भसा परिषेचनम् ।
क्षिप्रं प्रशमयत्यग्निमेवमालेपनं रुजः ॥८॥
प्रह्लादने शोधने च शोफस्यहरणे तथा ।
उत्सादने रोपणे च लेपः स्यात्तु तदर्थकृत् ॥९॥

परिषेकः ३ ।

वातशोफे तु वेदनोपशान्त्यर्थं सर्पिस्तैलधान्याम्लमांसरसवातहरौषधनिकाथैरुष्णैः परिषेकान् कुर्वीत । पित्तरक्ताभिघातविषनिमित्तेषु

RajGuru Math, Shivala, Varanasi Collection. Equipment; Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षीरघृतमधुशर्करादकेक्षुरसमधुरौषधक्षीरवृक्षनिकाथैरनुष्णैः परिषेकान्कुर्वीत। श्लेष्मशोफेतु तैलमूत्रक्षारोदकसुराशुक्तकफघ्नौषधनिःक्काथैरशीतैः परिषेकान् कुर्वीत ॥१०॥

यथाम्बुभिःसिच्यमानः शान्तिमग्निर्नियच्छति ।
दोषाग्निरेवं सहसा परिषेकेण शाम्यति ॥११॥

स्वेदनम् ॥ ॥

रुजावतां दारुणानां कठिनानान्तथैव च ।
शोफानां स्वेदनं कार्यं येचाप्येवं विधाः व्रणाः ॥१२॥

विस्लापनम् ॥५॥

स्थिराणां रुजतां मन्दं कार्यं विस्लापनं बुधैः ।
अभ्यज्य स्वेदयित्वा तु वेणुना वा शनैः शनैः ॥१३॥
विमर्दयेत् भिषक् प्राज्ञस्तलेनांगुष्ठकेन च ।

अभ्यंगः ॥६॥

अभ्यंगस्तु दोषानुसारोपयुक्तः दोषोपशमं मृदुतां च करोति ॥१४॥

उपनाहः ॥७॥

शोफयोरुपनाहन्तु कुर्यादामविदग्धयोः ।
अविदग्धः शमंयाति विदग्धः पाकमेति च ॥१५॥

पाचनम् ॥८॥

निवर्तते न यः शोफो विरेकान्तैरुपक्रमैः ।
तस्य सम्पाचनं कुर्यात् समाहृत्यौषधानितु १६॥
दधितक्रसुराशुक्तधान्याम्लै र्योजितानि तु ।
स्निग्धानि लवणीकृत्य पचेदुत्कारिकां शुभाम् ॥१७॥
सैरण्डपत्रयाशोफं नाहयेदुष्णयातया ।
हितं सम्भोजनं वापि पाकायाभिमुखो यदि ॥१८॥

विस्रावणम् ॥९॥

वेदनोपशमार्थाय तथापाकशमाय च ।
अचिरोत्पतिते शोफे कुर्यात् शोणितमोक्षणम् ॥१९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सशोफे कठिने श्यावे सरक्ते वेदनावति ।
संरब्धे विषमेवापि व्रणेविस्रावणं हितम् ॥२०॥
सविषे च विशेषेण जलौकोभिः पदैस्तथा ।
वेदनायाः प्रशान्त्यर्थं पाकस्याप्राप्तयेतथा ॥२१॥

स्नेहपानम् ॥१०॥

सोपद्रवाणां रुक्षाणां कृशानां व्रणशोषिणाम् ।
यथास्वमौषधैः सिद्धंस्नेहपानं विधीयते ॥२२॥

वमनम् ॥११॥

उत्सन्नमांसशोफे तु कफजुष्टे विशेषतः ।
संक्लिष्टश्यामरुधिरे व्रणे प्रच्छर्दनं हितम् ॥२३॥

विरेचनम् ॥१२॥

वातपित्तप्रदुष्टेषु दीर्घकालानुबंधिषु ।
विरेचनं प्रशंसन्ति व्रणेषु व्रणकोविदाः ॥२४॥

छेदनम् ॥१३॥

अपाकेषु तु रोगेषु कठिनेषु स्थिरेषुच ।
स्नायुकोथादिषु तथा छेदनं प्राप्तमुच्यते ॥२५॥

भेदनम् ॥१४॥

अन्तः पूयेष्ववक्त्रेषु तथैवोत्संगवत्स्वपि ।
गतिमत्सुच रोगेषु भेदनं प्राप्तमुच्यते ॥२६॥

दारणम् ॥१५॥

बालवृद्धामहत्क्षीणभीरूणांयोषितामपि ।
मर्मोपरि च जातेषु रोगेष्वुक्तेषु दारणम् ॥२७॥
सुपक्वेपिंडितेशोफेपीडनैरुपपीडिते ।
पाकोद्वृत्तेषु दोषेषु तन्तुकार्यं विजानता ॥२८॥
सुपिष्टै र्दारणद्रव्यै र्युक्तः क्षारेण वा पुनः

लेखनम् ॥१६॥

कठिनान् स्थूलवृत्तौष्ठान् दीर्यमाणान् पुनः पुनः ।
कठिनोत्सन्नमांसांश्च लेखनेनाच्चरेद्भिषक् ॥२९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समंलिखेत्सुलिखितं लिखेन्निरवशेषतः ।
वर्त्मनानुप्रमाणेन समंशस्त्रेण निर्लिखेत् ॥३०
क्षौमं प्लोतं पिचुं फेनं यावशूकं ससैंधवम् ।
कर्कशानि च पत्राणि लेखनार्थं प्रदापयेत् ॥३१॥

एषणम् १७

नाड़ीव्रणान् शल्यगर्भा नुन्मार्ग्युत्संगिनः शनैः ।
करीरवालांगुलीभि श्चैषण्या वैषयेद्भिषक् ॥३२॥
नेत्रवर्त्मगुदाभ्यासनाड्योंऽवक्त्राःसशोणिताः ।
चुच्चूपोदकजैः शाकैःकरीरैरेषयेत्तु ताः ॥३३॥

व्यधनम् ॥१८॥ विस्रावणञ्च ॥१९॥

रोगेव्यधनसाध्ये तु यथोद्देशं यथागमम् ।
शस्त्रं निदध्यात् दोषञ्च स्रावयेत् कीर्तितंयथा ॥३४॥

आहरणम् ॥२०॥

सम्यटतासम्यटतास्येषु व्रणेषु मतिमान्भिषक् ।
यथोक्तमाहरेत् शल्यं प्राग्दोद्धरणलक्षणम् ॥३५॥

सीव्यम् ॥२१॥ संधानम् ॥२२॥

अपाकोपद्रुता ये च मांसस्था विष्टताश्च ये ।
यथोक्तं सीवनं तेषु कार्यं संधानमेव च ॥३६॥

इति शल्यतन्त्रसमुच्चये त्रयोविंशोऽध्यायः

अथ चतुर्विंशोऽध्यायः

अथातो व्रणव्युपक्रमणीयमध्यायं व्याख्यास्यामः ॥१॥

पीडनम् ॥१॥

पूयगर्भानणुद्वारान् व्रणान्मर्मगतानपि ।
यथोक्तैः पीडनद्रव्यैः समन्तात्परिपीडयेत् ॥२॥
शुष्यमाणमुपेक्षेतप्रदेहम्पीड़नम्प्रति ।
नचाभिमुखमालिम्पेत् तेन दोषः प्रसिच्यते ॥३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शोणितास्थापनम् ॥२॥

तैस्तै र्निमित्तै र्बहुधा शोणिते प्रस्रुते भृशम् ।
कार्यं यथोक्तं वैद्येन शोणितास्थापनन्तथा ॥४॥

कषायः ॥३॥

दुर्गंधानां क्लेदवतां पिच्छिलानां विशेषतः ।
कषायैः शोधनंकार्यं शोधनैः प्रागुदीरितैः ।५॥

उत्कारिका ॥४॥

व्रणेषु क्षीणमांसेषु तनुस्रावि ष्वपाकिषु ।
तोदकाठिन्यपारुष्यशूलवेपथुमत्सु च ॥६॥
बातघ्नवर्गेऽम्लगणे काकोल्यादिगणे तथा ।
स्नैहिकेषु च वर्गेषु पचेदुत्कारिकांशुभाम् ।७॥
तेषांञ्च स्वेदनं कार्यं स्थिराणाम्वेदनावताम् ।

वर्त्तिः ५ ।

शोधनद्रव्ययुक्ताभिः वर्तिभिस्तान्यथाक्रमम् ।
अन्तः शल्यानणुमुखान् गम्भीरान्मांससंश्रितान् ॥८॥
पूतिमांसप्रतिच्छन्नान्महांदोषांश्च शोधयेत् ।
कल्कीकृतै र्यथालाभम् वर्तिद्रव्यैः पुरोदितैः ॥९॥

कल्कः ६ ।

अपेतपूतिमांसानां मांसस्थानामरोहताम् ।
कल्कः संरोहणः कार्यः तिलजोमधुसंयुतः ॥१०॥
स माधुर्य्यात्तथौष्ण्याच्च स्नेहाच्चानिलनाशनः ।
कषायभावान्माधुर्य्यात् तिक्तत्वाच्चापि पित्तहृत् ॥११॥
औष्ण्यायात्कषायभावाच्च तिक्तत्वाच्च कफे हितः ।
शोधयेद्रोपयेच्चापि युक्तः शोधनरोपणैः ॥१२॥
निम्बपत्रमधुभ्यान्तु युक्तः संशोधनः स्मृतः ।
पूर्वाभ्यां सर्षपा चापि युक्तः संरोपणो भवेत् ॥१३॥
तिलवद्यवकल्कन्तु केचिदाहुर्मनीषिणः ।
शमयेदविदग्धञ्च विदग्धमपि पाचयेत् ॥१४॥
पक्वं भिनत्ति भिन्नञ्च शोधयेद्रोपयेत्तथा ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निर्वापणम् ७।

दाहपाकज्वरघ्नतां व्रणानां पित्तकोपतः।
रक्तेनचाभिभूतानां कार्यं निर्वापणं बुधैः १५॥
यथोक्तैः शीतलद्रव्यैः क्षीरपिष्टैः घृतप्लुतैः।
दिह्यादवहलान् लेपान् सुशीतांश्चावचारयेत् ॥१६॥

अवचूर्णनम् ॥८॥

समानां स्थिरमांसानां त्वक्स्थानां रोपणं भिषक्।
चूर्णं विदध्यात् मतिमान्पूर्वाध्यायोक्तभेषजैः ॥१७॥
गम्भीरान्मेदसा जुष्टान् दुर्गंधांश्चूर्णशोधनैरुपाचरेत्
शोधनो रोपणश्चैव विधिर्योऽयं प्रकीर्तितः।
सर्वव्रणानां सामान्येनोक्तो दोषविशेषतः ॥१८॥
एष आगमसिद्धत्वा त्प्रत्यक्षफलदर्शनात्।
मंत्रवत्संप्रयोक्तव्यो न मीमांस्यः कथंचन ॥१९॥
स्ववुद्ध्या चापि विभजेत्कषायादिषु सप्तसु।
भेषजानि यथायोगं यान्युक्तानि पुरामया ॥२०॥
आद्ये द्वे पञ्चमूल्यौ तु गणो यश्चानिलापहः।
स वातदुष्टे दातव्यः कषायादिषु सप्तसु ॥२१॥
न्यग्रोधादिगणो यस्तु काकोल्यादिश्च यः स्मृतः।
तौ पितदुष्टे दातव्यौ कषायादिषु सप्तसु ॥२२॥
आरग्वधादिस्तु गणो यश्चोष्णः परिकीर्तितः।
तौ देयौ कफदुष्टे तु संसृष्टे संयुता गणाः ॥२३॥

व्रणधूपनम् ॥९॥

वातात्मकानुग्ररुजान् सास्रावानपि च व्रणान्।
सर्जरसयवसर्षिर्भि र्धूपनाङ्गैश्च धूपयेत् ॥२४॥

सर्पिः ॥१०॥

पित्तप्रदुष्टान् गम्भीरान् दाहपाकप्रपीडितान्।
कार्पासीफलमिश्रेण जयेत् शोधनसर्पिषा ॥२५॥
पित्तरक्तविषागन्तून् गम्भीरानपि च व्रणान्।
रोपयेत् रोपणीयेन क्षीरसिद्धेन सर्पिषा ॥२६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तैलम् ।।११।।

उत्सन्नमांसान् अस्निग्धानल्पस्रावान् व्रणांस्तथा ।
सर्षपस्नेहयुक्तेन धीमांस्तैलेन शोधयेत् ।।२७।।
कफवाताभिभूतानां व्रणानां मतिमान् भिषक् ।
कारयेद्रोपणं तैलम् भेषजैस्तद्यथोचितैः ।।२८।।

रसक्रिया ।।१२।।

तैलेनाशुद्ध्यमानानां शोधनीयां रसक्रियाम् ।
व्रणानां स्थिरमांसानां कुर्याद्द्रव्यै रुदीरितैः ।।२९।।
कषाये विधिवत्तेषां कृते व्यामिश्रयेत्पुनः ।
सुराष्ट्रजां स कासीसां दद्याच्चापि मनः शिलाम् ।।३०।।
हरितालञ्च मतिमान् ततस्तामवचारयेत ।
मातुलुंगरसोपेतां सद्यो द्रामतिमर्दिताम् ।।३१।।
व्रणेषु दत्वा तां तिष्ठेत् त्रीन् त्रींश्च दिवसान् परम्
शुद्धलक्षणयुक्तानां कषायं रोपणं हितम् ।
तत्र कार्यं यथोद्दिष्टे र्द्रव्यै र्वैद्येन जानता ।।३२।।
अवेदनानां शुद्धानां गम्भीराणान्तथैव च ।
हिता रोपणवर्त्यगकृता रोपणवर्तयः ।।३३।।

उत्सादनम् ।।१३।।

परिशुष्काल्पमासानां गंभीराणान्तथैव च ।
कुर्यादुत्सादनीयानि सर्पिष्यालेपनानि च ।।३४।।
मांसाशिनां च मांसानि भक्षयेद्विधिवन्नरः ।
विशुद्धमनसस्तस्य मांसं मांसेन वर्द्धते ।।३५।।

अवसादनम् ।।१४।।

उत्सन्नमृदुमांसानां व्रणानामवसादनम् ।
कुर्याद्द्रव्यैर्यथोद्दिष्टै श्चूर्णितै र्मधुना सह ।।३६।।

मृदुकर्म १५।।

कठिनानाममांसानां दुष्टानां मातरिश्वना ।
मृद्वी क्रिया विधातव्या शोणितं चापि मोक्षयेत् ।।३७।।
वातघ्नौषधसंयुक्तान् स्नेहान्सेकांश्च कारयेत् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2

दारुणकर्म १६।

व्रणेषु मृदुमांसेषु दारुणीकरणं हितम्।
धवार्कयंग्वशोकानां रोहिण्याश्च त्वचस्तथा ॥३८॥
त्रिफलाधातकीपुष्परोध्रसर्जरसान्समान्।
कृत्वासूक्ष्माणि चूर्णानि व्रणं तैरेव चूर्णयेत् ॥३९॥

क्षारकर्म १७।

उत्सन्नमांसान् कठिनान् कण्डूयुक्तांश्चिरोत्थितान्।
तथैवखलु दुःशोध्यान् शोधयेत्क्षारकर्मणा ॥४०॥

अग्निकर्म १८।

स्रवतोऽश्मभवान्मूत्रं ये चान्ये रक्तवाहिनः।
निःशेषच्छिन्नसंधींश्च साधयेदग्निकर्मणा ॥४१

कृष्णकर्म १९।

दुरूढत्वात्तु शुक्लानां कृष्णकर्म प्रशस्यते।
भल्लातकान् वासयेत्तु क्षीरे प्राङ्मूलभावितान् ॥४२॥
ततोद्विधाच्छेदयित्वा लोहकुम्भे निधापयेत।
कुम्भेऽन्यं मन्निखाते तु तं कुम्भमथयोजयेत ॥४३॥
मुखं मुखेन संधाय गोमयै र्दाहयेत्पुनः।
यः स्नेहश्च्यवते तस्मात् ग्राहयेत्तं शनैर्भिषक् ॥४४॥
ग्राम्यानूपशफान् दग्धान् सूक्ष्मचूर्णानि कारयेत।
तैलेनानेन संसृष्टं शुक्लमालेपयेद्व्रणम् ॥४५॥
भल्लातकविधानेन सारस्नेहाँस्तु कारयेत्।
ये च केचित्फलस्नेहाः विधानं तेषु कीर्तितम् ॥४६॥

पांडुकर्म २०।

दुरूढत्वात्तुकृष्णानां पाण्डुकर्म हितम्भवेत्।
सप्तरात्रं स्थिते क्षीरे छागले रोहिणीफलम् ॥४७॥
तेनैव पिष्टं सुश्लक्ष्णं सवर्णकरणं भ वेत्।
नवं कपालिकाचूर्णं वैदुलं सर्जनाम च ॥४८॥
कासीसं मधुकञ्चैव क्षौद्रयुक्तं प्रलेपये
कपित्थमुद्धृते मांसे मूत्रैणाजेन पूरयेत् ॥४९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding.IKS-MoE-Grant-2

कासीसं रोचनां तुत्थं हरितालं मनःशिलाम् ।
वेणुनिर्लेखनञ्चापि प्रपुन्नाड़रसांजनम् ॥५०॥
अधस्तादर्जनस्यैतन् मासं भूमौ निधापयेत् ।
मासादूर्ध्वं ततस्तेन कृष्णमालेपयेद्व्रणम् ॥५१॥

प्रतिसारणम् २१ ।

कुक्कुटाण्डकपालानि कतकं मधुकं समम् ।
तथा समुद्रमण्डूकीमणिचूर्णञ्च दापयेत् ॥५२॥
गुटिका मूत्रपिष्टास्ताः व्रणानां प्रतिसारणम् ।

लोमसंजननम् २२ ।

हस्तिदन्तमसीं कृत्वा मुख्यं चैव रसांजनम् ।
रोमाण्येतेनजायन्ते लेपात्पाणितलेष्वपि ॥५३॥
चतुष्पदानां त्वग्रोमखुरशृङ्गास्थि भस्मना ।
तैलाक्ता चूर्णिता भूमिर्भवेद्रोमवती पुनः ॥५४
कासीसं नक्तमालस्य पल्लवांश्चैव संहरेत् ।
कपित्थरसपिष्टानि रोमसञ्जननं परम् ॥५५॥

लोमापहरणम् २३ ।

रोमाकीर्णो व्रणो यस्तु न सम्यगुपरोहति ।
क्षुरकर्त्तरिसंदंशैः तस्यरोमाणि निर्हरेत् ॥५६॥
शंखचूर्णस्य भागौ द्वौ हरितालञ्च भागिकम् ।
शुक्तन सहपिष्टानि लोमशातनमुत्तमम् ॥५७॥
तैलं भल्लातकस्याथ स्नुहीक्षीरं तथैवच ।
प्रगृह्यैकत्र मतिमान् लोमशातनमुत्तमम् ॥५८॥
कदलीदीर्घण्टन्ताभ्यां भस्मालं लवणं शमी ।
वीजं शीतोदपिष्टं वा रोमशातनमुत्तमम् ॥५९॥
आगारगोधिकापुच्छं रम्भालं वीजमैङ्गुदम् ।
दग्ध्वा तद्भस्मतैलाम्बु सूर्यपक्वं कचान्तकृत् ॥६०॥

वस्तिः ॥२४॥

वातदुष्टो व्रणो यस्तुरुक्षश्चात्यर्थवेदनः ।
अधःकाये विशेषेण तत्र वस्तिर्विधीयते ॥६१॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्तरवस्तिः ॥२५॥

मूलाघाते मूलदोषे शुक्रदोषेऽस्मरीव्रणे।
तथैवार्त्तवदोषे च वस्तिरप्युत्तरो हितः ॥६२॥

बंधः ॥२६॥

यस्माच्छुद्ध्यति बंधेन व्रणो याति च मार्दवम्।
रोहत्यपि च निःशंकः तस्माद्बंधो विधीयते ॥६३॥

पत्रदानम् ॥२७॥

स्थिराणां मल्पमांसानां रौक्ष्यादनुपरोहताम्।
पत्रदानं भवेत्कार्यं यथादोषं यथतु च ॥६४॥
एरंड-भूर्ज-पूतीक-हरिद्राणाञ्च वातिके।
पत्रमाश्ववलं यच्च काश्मरीपत्रमेव च ॥६५॥
पत्राणि क्षीरवृक्षाणामौदकानि तथैव च।
दूषिते रक्तपिताभ्यां व्रणेदद्याद्विचक्षणः ॥६६॥
पाठामूर्वागुडूचीनां काकमाचीहरिद्रयोः।
पत्राञ्च शुकनासायाः योजयेत्कफजे व्रणे ॥६७॥
अकर्कशमविच्छिन्नमजीर्णं सुकुमारकम्।
अजन्तुजग्धं मृदु च पत्रं गुणवदुच्यते ॥६८॥
स्नेहमौषधसारञ्च पट्टवस्त्रान्तरीकृतम्।
नादते यत्ततः पत्रं लेपस्योपरि दापयेत् ॥६९॥
शैत्योष्णजननार्थाय स्नेहसंग्रहणाय च।
दत्तौषधेषु दातव्यं पत्रं वैद्येन जानता ॥७०॥

कृमिघ्नम्। २८॥

मक्षिका व्रणजातस्य निक्षिपन्ति यदा कृमीम्।
श्वयथुर्भक्षिते तैस्तु जायते भृशदारुणः ॥७१॥
तीव्रारुजो विचित्राश्च रक्तास्रावश्च जायते।
सुरसादिर्हितस्तत्र धावने पूरणे तथा ॥७२॥
सप्तपर्णकरञ्जार्कनिम्वराजादनत्वचः।
हिता गोमूत्रपिष्टाश्च सेकः क्षारोदकेन वा ॥७३॥
प्रच्छाद्य मांसपेश्या वा कृमीनपहरेद् व्रणात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुरसादिगणं वक्ष्यामो वाग्भटतः ।
सुरसयुगफणिज्जं कालमाला विडंगम् ।
खरवुसवृषकर्णीकट्फळं कासमर्दः ॥
क्षवकसरसिभार्गी कामुकाकाकमाची ।
कुलहलविषमुष्टिः भूस्तृणो भूतकेशी ॥७४॥

बृंहणम् २९ ।

दीर्घकालातुराणाञ्च कृशानां व्रणशोषिणाम् ।
बृंहणीयो विधिः सर्वः कायाग्निं परिरक्षता ॥७५॥

विषघ्नम् ३० ।

विषघ्नैरौषधैस्तस्य धूपनं सम्प्रशस्यते ।
तथाच दुष्टव्रणवत् चिकित्सां कारयेद्बुधः ॥७६॥

शिरोविरेचनम् ३१ ।

कण्ठूमन्तः सशोफाश्च ये च जलूपरिव्रणाः ।
शिरोविरेचनं तेषु विदध्यात्कुशलो भिषक् ॥७७॥

नस्यम् ३२ ।

रुजावन्तोऽनिलाविष्टा रुक्षा ये चोर्ध्वजत्रुजाः ।
व्रणेषु तेषु कर्तव्यं नस्यंवैद्येन जानता ॥७८॥

कवलधारणम् ॥३३॥

दोषप्रच्यावनार्थाय रुजादाहक्षयाय च ।
जिह्वादन्तसमुत्थस्य हरणार्थं मलस्य च ॥७९॥
शोधनो रोपणश्चैव व्रणस्य मुखजस्य च ।
उष्णो वा यदि वा शीतः कवलग्रह इष्यते ॥८०॥

धूमपानम् ॥३४॥

ऊर्ध्वजत्रुगतान् रोगान् व्रणांश्च कफवातजान् ।
शोफस्रावरुजायुक्तान् धूमपानै रुपाचरेत् ॥८१॥

मधुसर्पिः ॥३५॥

क्षतोष्मणो निग्रहार्थं संधानार्थं तथैव च ।
सद्योव्रणेष्वायतेषु क्षौद्रसर्पि र्विधीयते ॥८२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यन्त्रम् ॥३६॥

अवगाढा स्त्वणुमुखाः ये व्रणाः शल्यपीडिताः ।
निवृत्तहस्तोद्धरणा यन्त्रं तेषु विधीयते ॥८३॥

आहारः ॥३७॥

लघुमात्रो लघुश्चापि स्निग्ध उष्णोऽग्निदीपनः ।
सर्वव्रणेभ्यो देयस्तु सदाहारं विजानता ॥८४॥

रक्षाविधानम् ॥३८॥

निशाचरेभ्यो रक्ष्यस्तु नित्यमेव क्षतातुरः ।
रक्षाविधानैरुद्दिष्टै र्यमैःसनियमैस्तथा ॥८५॥

॥उपसंहारमाह ॥

षण्मूलोऽष्टपरिग्राही पञ्चलक्षणलक्षितः ।
षष्ठ्याविधानैः निर्दिष्टै श्चतुर्भिः साध्यते व्रणः ॥८६॥
योऽल्पौषधकृतो योगो बहुग्रन्थभयान्मया ।
द्रव्याणां तत्समानानां तत्रावापो न दुष्यति ॥८७॥
प्रसंगाभिहितो यो वा बहुदुर्लभभेषजः ।
यथोपपत्ति तत्रापि कार्य मेवचिकित्सितम् ॥८८॥
गणोक्तमपि यद्द्रव्यं भवेद् व्याधावयौगिकम् ।
तदुद्धरेत् यौगिकन्तु प्रक्षिपेदप्यकीर्तितम् ॥८९॥
उपद्रवास्तु विविधाः व्रणस्य व्रणितस्य च ।
तत्र गंधादयः पञ्च व्रणस्योपद्रवाः स्मृताः ॥९०॥
ज्वरातिसारौ मूर्च्छा च हिक्का छर्द्दिररोचकाः ।
श्वासकासाविपाकाश्च तृष्णा च व्रणितस्य वै ॥९१॥
व्रणक्रियास्वेवमाशु व्यासेनोक्तास्वपि क्रियाम् ।
भूयोप्युपरि वक्ष्यामि सद्योव्रणचिकित्सिते ॥९२॥

इति शल्यतन्त्रसमुच्चये चतुर्विंशोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पञ्चविंशोऽध्यायः

तथातः सद्योव्रणविज्ञानीयमध्यायं व्याख्यास्यामः ।१॥

धन्वन्तरि र्धर्मभृतां वरिष्ठो वाग्विशारदः ।
विश्वामित्रात्मजमृषिं शिष्यं सुश्रुतमन्वशात् ॥२॥
नानाधारामुखैः शस्त्रै र्नानास्थाननिपातितैः ।
नानारूपा व्रणा ये स्युः तेषां वक्ष्यामि लक्षणम् ॥३॥
आयता श्चतुरस्राश्च त्र्यस्रा मण्डलिनस्तथा ।
अर्धचन्द्रप्रतीकाशा विशालाः कुटिलास्तथा ॥४॥
शरावनिम्नमध्याश्च यवमध्यास्तथापरे ।
एवंप्रकाराकृतयो भवन्त्यागन्तवो व्रणाः ॥५॥
दोषजा वा स्वयं भिन्ना न तु वैद्यनिमित्तजाः ।
भिषक् व्रणाकृतिज्ञो हि न मोहमधिगच्छति ॥६॥
भृशं दुर्दर्शरूपेषु व्रणेषु विकृतेष्वपि ।
अनेकाकृतिरागन्तु स भिषग्भिः पुरातनैः ॥७॥
समासतो लक्षणतः षड्विधः परिकीर्तितः ।
छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च ।
घट्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणम् ॥८॥

छिन्न लक्षणम् ।

तिरश्चीन ऋजु र्वापि यो व्रणश्चायतो भवेत् ।
गात्रस्य पातनं चापि छिन्नमित्युपदिश्यते ॥९॥

भिन्न लक्षणम्

कुन्तशक्त्यृष्टिखड्गाग्रविषाणादिभिराशयः
हतः किञ्चित्स्रवेत्तद्धि भिन्नलक्षणमुच्यते ॥१०॥
स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुकः फुस्फुसश्च कोष्ठ इत्यभिधीयते ॥११॥

यद्यपि उरोगुहायां द्वौ फुसफुसौ प्रत्यक्षदृष्टौ चेति वामः तथापि जातावेकवचनमिति शुक्लः ॥१२॥

तस्मिन् भिन्ने रक्तपूर्णो ज्वरो दाहश्च जायते ।
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति ॥१३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मूर्छाश्वासतृड्ढाध्मानमभक्तच्छन्द एव च ।
विण्मूत्रवातसंगश्च स्वेदास्रावोऽतिरक्तता ॥१४॥
लोहगन्धित्वमास्यस्य गात्रदौर्गंध्यमेव च ।
हृच्छूलं पार्श्वयोश्चापि विशेषं चात्र मे शृणु ।
आमाशयस्थे रुधिरे रुधिरं छर्दयेत्पुनः ।
आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणम् ॥१५॥
पक्वाशयगते चापि रुजा गौरवमेव च ।
अधः काये विशेषेण शीतता च भवेदिह ॥१६॥
(॥ शीतता चाप्यधो नाभेः खेभ्यश्चरुधिरागमः॥)

इत्यपि पाठः

अभिन्ने प्याशयेऽन्त्राणां खैः सूक्ष्मैरन्त्रपूरणम् ।
पिहितास्ये घटे यद्वल्लक्ष्यते तस्य गौरवम् ॥१७॥

॥ विद्धलक्षणम् ॥ ३ ॥

सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयं विना ॥
उत्तुडितं निर्गतंवा तद्विद्धमितिनिर्दिशेत् ॥१८॥

॥ पिच्चितलक्षणम् ॥ ४ ॥

प्रहारपीड़नाभ्यान्तु यदंगं पृथुतां गतम् ॥
सास्थि तत्पिच्चितं विद्यान्मज्जरक्तपरिप्लुतम् ॥१९॥

॥ घृष्टलक्षणम् ॥ ५ ॥

विगतत्वग्यदंगं हिं संघर्षादन्यथापि वा ॥
उपास्रावान्वितं तत्तु घृष्टमित्युपदिश्यते ॥२०॥

॥ क्षतलक्षणम् ॥ ६ ॥

नातिछिन्नं नातिभिन्नमुभयो र्लक्षणान्वितम् ॥
विषमं व्रणमङ्गं यत् तत्क्षतंत्वभिधीयते ॥२१॥
छिन्ने भिन्ने तथा विद्धेक्षते वासृगतिस्रवेत् ॥
रक्तक्षयाद्भृजस्तत्र करोति पवनो भृशम् ॥२२॥
स्नेहपानं हितं तत्र तत्सेको विहितस्तथा ॥
वेशवारैः सकृशरैः सुस्निग्धैश्चोपनाहयेत् ॥२३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धान्यस्वेदाँश्च कुर्वीत स्निग्धान्यालेपनानि च ॥
वातघ्नौषधसिद्धैश्च स्नेहै र्वस्ति र्विधीयते ॥२४॥
पिच्छिते च विघृष्टे च नातिस्रवति शोणितम् ॥
अगच्छति भृशं तस्मिन्दाहः पाकश्च जायते ॥२५॥
तत्रोष्मणो निग्रहार्थं तथा दाहप्रपाकयोः ॥
शीतमालेपनं कार्यं परिषेकश्च शीतलः ॥२६॥
षट्स्वेतेषु यथोक्तेषु छिन्नादिषु समासतः ॥
ज्ञेयं सामान्यतः सर्वं सद्योव्रणचिकित्सितम् ॥२७॥

इति शल्यतन्त्रसमुच्चये पंचविंशोऽध्यायः ।

अथषड्विंशोऽध्यायः ।

अधुनाछिन्नचिकित्सोच्यते ॥१॥

अथातो सद्योव्रणचिकित्सितमध्यायं व्याख्यास्यामः ॥१॥
अत ऊर्ध्वं प्रवक्ष्यामिछिन्नानान्तुचिकित्सितम् ॥
ये व्रणा विवृताः केचिच्छिरःपार्श्वावलम्बिनः ॥२॥
तान्सीव्येद्विधिनोक्तेन बध्नीयाद् गाढमेव च ॥
कर्णं स्थानादपहृतं स्थापयित्वा यथास्थितम् ॥३॥
सीव्येद्यथोक्तं तैलेन स्रोतश्चाभिप्रवर्तयेत् ॥
कृकाटिकान्ते छिन्ने तु गच्छत्यपि समीरणे ॥४॥
सम्यङ् निवेश्य बध्नीयात् सीव्येच्चापि निरन्तरम् ॥
आजेन सर्पिषा चापि परिषेकन्तु कारयेत् ॥५॥
उत्तानोऽन्नं समश्नीयात् शयीत च सुयन्त्रितः ॥
शाखासु पतितँा स्तिर्यक् प्रहारान् विवृतान्भृशम् ॥६॥
सीव्येत्सम्यक् निवेश्याशु संध्यस्थीननुपूर्वशः ॥
बद्धा वेल्लितकेनाशु ततस्तैलेन सेचयेत् ॥७॥
चर्मणा मण्डलोबंधः कार्यो यो वा हितोभवेत् ॥
पृष्ठे व्रणो यस्य भवेदुत्तानं शाययेत्तु तम् ॥
अतोऽन्यथा चोरसिजे शाययेत्पुरुषं व्रणे ॥८॥ पाठान्तरम्
पृष्ठे व्रणो यस्य भवेदनुत्तानः शयीत सः ॥
अतोऽन्यथाचोरसिजे शयीत पुरुषो व्रणे ॥९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS

पाठान्तरम्

छिन्ना निश्शेषतः शाखां दग्ध्वा तैलेन बुद्धिमान् ।
बध्नीयात् कोशबंधेन प्रातःकालञ्च रोपणम् ॥१०॥
चन्दनं पद्मकं लोध्रमुत्पलानि प्रियंगवः ।
हरिद्रां मधुकं चैव पयस्स्यादत्र चाष्टमम् ॥११॥
तैलमेभिर्विपक्वन्तु प्रधानं व्रणरोपणम् ।
चन्दनं कर्कटाख्या च सहे मांसाह्वयामृते ।
हरेणवो मृणालञ्च त्रिफला पद्मकोत्पलम् ॥१२॥
त्रयोदशांगं त्रिवृतम्-एतद्वा पयसान्वितम् ।
तैलं विपक्वं सेकार्थं हितन्तुव्रणरोपणम् ॥१३॥

भिन्नचिकित्सा प्रस्तूयते २ ।

अत ऊर्ध्वं प्रवक्ष्यामि भिन्नानान्तु चिकित्सितम् ।
भिन्नं नेत्रमकर्मण्यमभिन्नं लम्बतेतु यत् ॥१४॥
तन्निवेश्य यथास्थानमव्याविद्धशिरं शनैः ।
पीड़येत् पाणिना सम्यक् पद्मपत्रान्तरेण च ॥१५॥
ततोऽस्यतर्पणं कार्यं नस्यञ्चानेन सर्पिषा ।
आजं घृतं क्षीरपात्रं मधुकं चोत्पलानि च ॥१६॥
जीवकर्षभकौचैव पिष्ट्वा सर्पिर्विपाचयेत् ।
सर्वनेत्राभिघाते तु सर्पिरेतत्प्रशस्यते ॥१७॥
उदरान्मेदसोवर्तिं निर्गता यस्य देहिनः ।
कषायभस्मसूत्कीर्णां बद्धा सूत्रेण सूत्रवित् ॥१८॥
अथ तेन शस्त्रेण छिन्द्यान्मधुसमायुतम् ।
बद्धा व्रणं सुजीर्णेऽन्ने सर्पिषः पानमिष्यते ॥१८॥
स्नेहपानादृते चापि पयः पानं विधीयते ।
शर्करामधुयष्ट्यभ्यां लाजया वा स्वदंष्ट्रया ॥२०॥
चित्रासमन्वितञ्चैवरुजादाहविनाशनम् ।
आटोपो मरणं वा स्यात् शूलं वा छिद्यमानया ॥२१॥
मेदोग्रन्थौ च यत्तैलं वक्ष्यते तच्च योजयेत् ।
त्वचोऽतीत्य सिरादीनि भित्त्वा वा परिहृत्य वा ॥२२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कोष्ठे प्रतिष्ठतं शल्यं कुर्यादुक्तानुपद्रवान्
तत्रान्तर्लोहितं पाण्डु शीतपादकराननम् ॥२३॥
शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्जयेत् ।
आमाशयस्थे रुधिरे वमनं पथ्यमुच्यते ॥२४॥

पक्वाशयस्थे देयञ्च विरेचनमसंशयम् ।
आस्थापनञ्च निःस्नेहं कार्यमुष्णैर्विशोधनैः ॥२५॥
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
भुञ्जीतान्नं यवागूञ्च पिबेत्सैंधवसंयुताम् ।
अतिनिस्रुतरक्तो वा भिन्नकोष्ठः पिबेदसृक् ॥२७॥

स्वमार्गप्रतिपन्ना स्तु यस्य विण्मूत्रमारुताः ।
व्युपद्रवः स भिन्नेऽपि कोष्ठे जीवति मानवः ॥२८॥
अभिन्नमंत्रं निष्क्रान्तं प्रवेश्यं नान्यथा भवेत् ।
पिपीलिकाशिरोग्रस्तं तदप्येके वदन्ति तु ॥२९॥

प्रक्षाल्य पयसा दिग्धं तृणशोणितपांशुभिः ।
प्रवेशयेत् कृत्तनखो घृतेनाक्तं शनैः शनैः ॥३०॥
प्रवेशयेत् क्षीरसिक्तं शुष्कमंत्रं घृताप्लुतम् ।
अंगुल्याभिमृशे त्कण्ठं जले नोद्वेजयेदपि ॥३१॥

हस्तपादेषु संगृह्य समुत्थाप्य महाबलाः ।
भवत्यन्त्र प्रवेशस्तु यथा निर्धुनुयु स्तथा ॥३२॥
तथांत्राणि विशन्त्यन्तः स्वां कलां पीडयन्ति च ।
व्रणाल्पत्वाद्बहुत्वाद्वा दुःप्रवेशं भवेतु य ॥३३॥

तदापाट्य प्रमाणेन भिषगन्त्रं प्रवेशयेत् ।
यथास्थाननिविष्टे च व्रणं सीव्येदतन्द्रितः ॥३४॥
स्थानादपेत मादत्ते प्राणान् गुम्फितमेव च ।
वेष्टयित्वा तु प ेन घृतसेकं प्रदापयेत् ॥३५॥

घृतं पिबेत्सुखोष्णं वा चित्रातैलसमन्वितम् ।
मृदुक्रियार्थं शकृतो वायो श्चाधः प्रवृत्तये ॥३६॥

तत स्तैलमिदं कुर्याद्रोपणार्थं चिकित्सकः ।
त्वचोऽश्वकर्णधवयोः मोचकीमेषशृंगयोः ॥३७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शल्लक्यर्जुनयो श्चापिविदार्याच्छीरिणान्तथा ।
वलामूलानि चाहृत्य तैलमेतै र्विपाचयेत् ॥३८॥
व्रणं संरोपयेत्तेन वर्षमात्रं यतेत च ।
पादौ निरस्तमुष्कस्य जलेन प्रोक्ष्य चाङ्घ्रिणी ॥३९॥
प्रवेश्य तुन्न सेवन्याः मुष्कौ सीव्येदतः परम् ।
कार्यो गोफणिकावंधः कट्यामावेश्य यंत्रकम् ॥४०॥
न कुर्यात् स्नेहसेकन्तु तेन क्लिद्यति हि व्रणः ।
कालानुसार्यगुर्वेला जातीचन्दनपद्मकैः ॥४१॥
शिलादार्व्यमृतातुत्थै स्तैलं कुर्वीत रोपणम् ।
शिरसोऽपहृते शल्ये वालवर्त्तिं प्रवेशयेत् ॥४२॥
वालवर्त्या मदत्तायां मस्तुलुंगो व्रणात् स्रवेत् ।
हन्यादेनं ततो वायु स्तस्मादेवमुपाचरेत् ॥४३॥
व्रणे रोहति चैकैकं शनैर्वांलमपक्षिपेत् ।
गात्राद् व्यपहृतेऽन्यस्मात् स्नेहवर्त्तिं प्रवेशयेत् ॥४४॥
कृते निःशोणिते चापि विधिः सद्यः क्षते हितः ।
दूरावगाढ़ाः सूक्ष्माः स्युः ये व्रणा स्तान्विशोणितान् ॥४५॥
कृत्वा सूक्ष्मेण सूत्रेण चक्रतैलेन तर्पयेत् ।
समंगां रजनीं पद्मां त्रिवर्गं तुत्थमेव च ॥४६॥
विडंगं कटुकां पथ्यां गुडूचीं सकरंजिकाम् ।
संहृत्य विपचेत् काले तैलं रोपणमुत्तमम् ॥४७॥
तालीशं पद्मकं मांसी हरेणवगुरुचन्दनम् ।
हरिद्रे पद्मबीजानि सोशीरं मधुकं च तैः ॥४८॥
पक्वं सद्योव्रणेष्वुक्तं तैलं रोपणमुत्तमम् ।

अधुना क्षतपिच्छितचिकित्सामाह ॥ -३-४

क्षते क्षतविधिः कार्यः पिच्छिते भग्नवद्विधिः ॥

घृष्टोपक्रममाह ॥५॥

घृष्टे रुजो निगृह्याशु चूर्णैं रुपचरेद व्रणम् ॥
विश्लिष्टदेहं मथितं पतितं हतमेव च ॥४८॥
वासयेत्तैलपूर्णायां द्रोण्यां मासरसाशनम् ।
अयमेव विधिः कार्यः क्षीणे मर्महते तथा ॥४९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रोपणे सपरीषेके पाने च व्रणिनां सदा ।
तैलं घृतं वा संयोज्य शरीरर्तूनवेक्ष्य हि ॥५०॥
घृतानि यानि वक्ष्यामो यत्नतः पित्तविद्रधौ ।
सद्यो व्रणेषु देयानि तानि वैद्येन जानता ॥५१॥
सद्यः क्षतव्रणं वैद्यः सशूलं परिषेचयेत् ।
सर्पिषा नातिशीतेन बलातैलेन वा पुनः ॥५२॥
समंगां रजनीं पद्मां पथ्यां तुल्यं सुवर्चलाम् ।
पद्मकं रोध्रमधुकं विडंगानि हरेणुकम् ॥५३॥
तालीशपत्रं नलदं चन्दनं पद्मकेशरम् ।
मञ्जिष्टोशीरलाक्षाश्च क्षीरिणाञ्चापि पल्लवान् ॥५४॥
पियालबीजं तिन्दुक्या स्तरुणानि फलानि च ।
यथालाभम् समाहृत्य तैलमेतै र्विपाचयेत् ॥५५॥
सद्यो व्रणानां सर्वेषा मदुष्टाना न्तुरोपणम् ।
कषायमधुराः शीताः क्रियाः स्निग्धाश्च योजयेत् ।
सद्यो व्रणानां सप्ताहं पश्चात्पूर्वोक्तमाचरेत् ।
दुष्टव्रणेषु कर्तव्य मूर्ध्व चाधश्च शोधनम् ॥५६॥
विशेषणन्तथाहारः शोणितस्य च मोक्षणम् ।
कषायं राजवृक्षादौ सुरसादौ च धावनम् ॥५७॥
तयोरेव कषाये तु तैलं शोधन मिष्यते ।
क्षारकल्पेन वा तैलं क्षारद्रव्येषु साधितम् ॥५८॥
द्रवन्ती चिरविल्वश्च दन्तीचित्रकमेव च ।
पृथ्वीका निम्वपत्राणि कासीसं तुत्थमेव च ॥५९॥
तृवृत्तेजोवती नीली हरिद्रे सैंधवं तिला ।
भूमिकदम्बः सुवहा शुकाख्या लांगलाह्वया ॥६०॥
नैपाली जालिनी चैव मदयन्ती मृगादनी ।
सुधा मूर्वार्ककीटारिहरितालकरंजिकाः ॥६१॥
यथोपपत्ति कर्तव्यम् तैल मेतैस्तु शोधनम् ।
घृतं वा यदि वा प्राप्तं कल्काः संशोधनास्तथा ।
सैधवं त्वदेरण्डपत्र कल्कस्तु वातिके ॥६३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तृण्टङ्करिद्रामधुककल्कः पैत्ते तिलैर्युतः ।
कफजे तिलतेजोह्वा दन्तीस्वर्जिकचित्रकाः॥६४॥
दुष्टव्रणविधिः कार्यः मेहकुष्ठव्रणेष्वपि ।
षड्विधः प्राक् प्रदुष्टो यः सशोव्रणविनिश्चयः ॥६५॥
नातः शक्यं परंवक्तुं अपिनिश्चितवादिभिः ।
उपसर्गे निपातैश्च तत्तु पण्डितमानिनः ॥६६॥
केचित्संयोज्य भाषन्ते बहुधा मानगर्विताः ।
बहु तद्भाषितन्तेषां षट्स्वेष्वेवावतिष्ठते ॥६७॥
विशेषा इव सामान्ये षट्त्वं तु परमं मतम् ।

इति शल्यतन्त्रसमुच्चये षड्विंशोऽध्यायः

निधान १५वाँ

अथ सप्तविंशोऽध्यायः

✓अथातो भग्नविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

पतनपीड़नप्रहाराक्षेपणव्यालभृगदंशनप्रभृतिभिः-अभिघात विशेषै रनेक विधमस्थ्नां भङ्गमुपदिशन्ति ।२॥

तत्तु भग्नजातं मनुष्यार्यमाणं द्विविध मेवोत्पद्यते संधिमुक्तं काण्ड-भग्नञ्च ॥३॥

तत्र संधिमुक्तं, उत्पिष्टं, विश्लिष्टं, विवर्तितं अवक्षिप्तं तिर्यक्क्षिप्तं प्रतिक्षिप्तमिति ॥४॥

तत्र, प्रसारणाकुंचनविवर्तनाक्षेपणाऽशक्तिः-उग्ररुजत्वम् स्पर्शा-सहत्वं चेति सामान्यं संधिमुक्तलक्षणमुक्तम् ॥५॥

विशेषेणोत्पिष्टेनानाप्रकारवेदनावैचित्र्यं रात्रौ विशेषेण वेदना भवति श्वयथुश्च ॥ ॥

विश्लिष्टे ऽल्पशोफः वेदना सातत्यं संधिविक्रिया च ॥७॥
विवर्तिते पार्श्वसंध्यपगमात् विषमांगता तीव्राश्च पार्श्वरुजः ॥८॥
अवक्षिप्ते संधिविश्लेष स्तीव्ररुजत्वं च ॥१०॥
प्रतिक्षिप्ते द्वयोः संध्यस्थ्नो रतिक्रान्तता वेदना च ॥११॥
तिर्यक्क्षिप्ते त्वेकास्थिपार्श्वापगमनम् अत्यर्थं वेदना च ॥१२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

काण्डभग्नमतऊर्ध्वं वक्ष्यामः- कर्कटकं, अश्वकर्णं, विचूर्णितं, पिच्चितम्, अस्थिच्छल्लितम्,काण्डभग्नं मज्जानुगतम्, अतिपातितं, वक्रं, छिन्नं, पाटितं, स्फुटितं, इति द्वादशविधम् ॥१३॥

श्वयथुवाहुल्यं स्पन्दनविवर्तनस्पर्शासहिष्णुत्वमवपीड्यमाने शब्दः स्रस्तांगता विविधवेदनाप्रादुर्भावः सर्वास्ववस्थासु न शर्मलाभ इति समासेन काण्डभग्नलक्षणमुक्तम् ॥१४॥

विशेषतस्तु सम्मूढमूभयतो ऽस्थिमध्ये मग्नं ग्रन्थि रिवोन्नतं कर्कटकम् ॥१५॥

अश्वकर्णवदुद्गतमश्वकर्णकं, चूर्णितम् स्पृश्यमानं शब्दवदवगच्छेत् ॥१६॥

पिच्चितं पृथुतां गतम् अनल्पशोफम्, पार्श्वयो रस्थिहीनोद्गतम् अस्थिच्छल्लितम्,वेल्लते प्रकम्पमानं काण्डभग्नम् ॥१७॥

शस्त्यवयवो ऽस्थिमध्यमनुप्रविश्य मज्जानं मुन्नह्यतीति मज्जानुगतम् ॥१८॥

अस्थि निःशेषतश्छिन्नमतिपातितम् आभुग्नमविमुक्तास्थि वक्रं, अन्यतरपार्श्वावशिष्टं छिन्नम्, पाटितमणु बहुविदारितं वेदनावच्च ॥१९॥

शुष्कपूर्णमिवाध्मातं विपुलं विस्फुटीकृतम् स्फुटितमिति ।२०॥

तेषु स्फुटितचूर्णितछिन्नातिपातितमज्जानुगतानि कृच्छ्रसाध्यानि, कृशवृद्धबालानां क्षतक्षीणकुष्ठश्वासिनां संश्रयुपगतं चेति ।२१

भिन्नं कपालं कट्यान्तु संधिमुक्तं तथा च्युतम् ।
जघनं प्रतिपिष्टं च वर्जयेत्तच्चिकित्सकः ॥२२॥

असंश्लिष्टं कपालन्तु ललाटे चूर्णितं च यत् ।
भग्नं स्तनान्तरे शंखे पृष्ठे मूर्ध्नि च वर्जयेत् ॥२३॥

आदितो यच्च दुर्जातमस्थिसंधिरथापि वा ।
सम्यग्यमितमप्यस्थि दुर्न्यासाद्दुर्निबंधनात् ।
संक्षोभाद्वापि यद्गच्छेद्विक्रियां तच्च वर्जयेत् ॥२४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मध्यस्य वयसोऽवस्था तिस्रो याः परिकीर्तिताः ।
तत्र स्थिरो भवेज्जन्तु रुपक्रान्तो विजानता ॥२५॥
तरुणास्थीनि नम्यन्ते भज्यन्ते नलकानि तु ।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥२६॥

इति शल्यतन्त्रसमुच्चये सप्तविंशोऽध्यायः

अथाष्टाविंशोऽध्यायः

अथातो भग्नचिकित्सिताध्यायम् व्याख्यास्यामः ॥१॥

अल्पाशिनोऽनात्मवतो जन्तो वातात्मकस्य च ॥
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥२॥
लवणं कटुकं क्षारमम्लं मैथुनमातपम् ॥
व्यायामञ्च न सेवेत भग्नो रुक्षान्नमेव च ॥३॥
शालि मांसरसः क्षीरं सर्पि र्यूषः सतीनजः ॥
वृंहणञ्चान्नपानञ्च देयं भग्नाय जानता ॥४॥
मधूकोडुम्बराश्वत्थपलाशककुभत्वचः ॥
वंशसर्जवटानाञ्च बंधार्थं मुपसंहरेत् ॥५॥
आलेपनार्थं मञ्जिष्ठां मधुकं रक्तचन्दनम् ॥
शतधौतघृतोन्मिश्रं शालिपिष्टञ्च संहरेत् ॥६॥
सप्ताहादथ सप्ताहात् सौम्येष्वृतुषु बंधनम् ॥
साधारणेषु कर्तव्यं पञ्चमे पञ्चमेऽहनि ॥७॥
आग्नेयेषु त्र्यहा त्कुर्यात् भग्नदोषवशेन वा ॥
तलातिशिथिले बद्धे संधिस्थैर्यं न जायते ॥८॥
गाढेनापि त्वगादीनां शोफो रुक् पाक एव च ॥
तस्मात्साधारणं बंधं भग्ने शंसन्ति तद्विदः ॥९॥
न्यग्रोधादिकषायं तु सुशीतं परिषेचने ।
पञ्चमूलीविपक्वन्तु क्षीरं कुर्यात् सवेदने ॥
सुखोष्णमवचार्यं वा चक्रतैलं विजानता ॥१०॥
विभज्य दोषं कालञ्च देषघ्नौषधसंयुतम् ॥
परिषेकं प्रदेहञ्च विदध्याच्छीतमेव च ॥११॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गृष्टीक्षीरं ससर्पिष्कं मधुरौषधसाधितम् ॥
शीतलं लाक्षया युक्तं प्रातर्भग्नः पिवेन्नरः ॥१२॥
सव्रणस्य तु भग्नस्य व्रणं सर्पिर्मधूत्तरैः ॥
प्रतिसार्य्य कषायै स्तु शेषं भग्नवदाचरेत् ॥१३॥
प्रथमे वयसि त्वेवं भग्नं सुकरमादिशेत् ॥
अल्पदोषस्य जन्तो स्तु काले च शिशिरात्मके ॥१४॥
प्रथमे वयसि त्वेवं मासात् संधिः स्थिरो भवेत् ॥
मध्यमे द्विगुणा त्कालादुत्तरे त्रिगुणात्स्मृतः ॥१५॥
अवनामितमुन्नह्ये दुन्नतं चावपीड़येत् ॥
आंछेंदतिच्छितमधोगतं चोपरिवर्तयेत् ॥१६॥
आंछन्नैः पीड़नै श्चैव संक्षेपैः बंधनै स्तथा ॥
संधीन् शरीरे सर्वांस्तु चलानप्यचलानपि ॥१७॥
एतै स्तु स्थापनोपायैः स्थापयेन्मतिमान् भिषक् ॥
उत्पिष्टमथ विश्लिष्टं संधिं वैद्यो न घट्टयेत् ॥१८
तस्य शीतान् परीषेकान् प्रदेहाँ श्चावचारयेत् ॥
अभिघाते हते संधिं स्वां याति प्रकृतिं पुनः ॥१९॥
घृतदिग्धेन पट्टेन वेष्टयित्वा यथाविधिः ॥
पट्टोपरि कुशान्दत्वा यथावद्बंधमाचरेत् ॥२०॥
प्रत्यंगभग्नस्य विधि रत ऊर्ध्वं प्रवक्ष्यते ॥
नखसंधिं समुत्पिष्टं रक्तानुगतमारुजा ॥२१॥
अवमथ्य स्रुतं रक्ते शालिपिष्टेन लेपयेत् ॥
भग्नां वा संधिमुक्तां वा स्थापयित्वांगुलीं समाम् ॥२२॥
अणुनावेष्ट्य पट्टेन घृतसेकं प्रदापयेत् ॥
अभ्यज्य सर्पिषा पादं तलभग्नं कुशोत्तरम् ॥२३॥
वस्त्रपट्टेन बध्नीयात् न च व्यायाममाचरेत् ॥
अभ्यज्यायामयेज्जंघा मूरुञ्च सुसमाहितः । २४॥
दत्वा वृद्धत्वचः शीताः वस्त्रपट्टेन वेष्टयेत् ॥
मतिमाँ श्चक्रयोगेन आंछेदूर्वस्थि निर्गतम् ॥२५॥
स्फुटितं पिच्छितञ्चापि बध्नीयात्पूर्ववद्भिषक् ॥
आंछेदूर्ध्वमधो वापि कटीभग्नन्तु मानवम् ॥२६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः स्थानस्थिते संधौ वस्तिभिः समुपाचरेत् ॥
पर्शुकास्वथ भग्नासु घृताभ्यक्तस्य तिष्ठतः ॥२७॥
दक्षिणास्वथ वामासु चानुमृज्य निबंधिनी ॥
ततः कवलिकां दत्वा वेष्टये त्सुसमाहितः ॥२८॥
तैलपूर्णेकटाहे च द्रोण्यां वा शायये न्नरम् ॥
मूषलेनोत्क्षिपेत्कक्षां अंससंधौ विसंहते ॥२९॥
स्थानस्थितं च बध्नीयात् स्वस्तिकेन विचक्षणः ॥
कूर्परन्तु तथासंधिं अंगुष्ठेनानुमार्जयेत् ॥३०॥
अनुमृज्य ततः संधिं पीड़येत्कूर्पराच्च्युतम् ॥
प्रसार्याकुंचयेच्चैनम् स्नेहसेकन्तु दापयेत् ॥३१॥
एवं जानुनि गुल्फे च मणिबंधे च कारयेत् ॥
उभे तले समे कृत्वा तलभग्नस्य देहिनः ॥३२॥
बध्नीयादामतैलेन परिषेकञ्च कारयेत् ॥
प्राग्गोमयमयं पिण्डं धारये न्मृन्मयं ततः ॥३३॥
हस्ते जातबले चापि कुर्यात्पाषाणधारणम् ॥
सन्नमुन्नमयेत् स्विन्नमक्तकं मुषलेन तु ॥३४॥
तथोन्नतं पीड़येच्च बध्नीयाद्गाढ़मेव च ॥
ऊरुवच्चापि कर्तव्यं बाहुभग्नचिकित्सितं ॥३५॥
ततः कुशाः समं दत्वा वस्त्रपट्टेन वेष्टयेत् ॥
उत्तानं शाययेच्चैनं सप्तरात्रमतन्द्रितः ॥३७॥
हन्वस्थीनि समानीय हनुसंधौ विसंहते ॥
स्वेदयित्वा स्थिते सम्यक् पंचाङ्गीं योजयेद् भिषक् ॥३८॥
वातघ्नमधुरैः सर्पिः सिद्धे नस्ये च पूजितम् ॥
अभग्नां श्लथितान् दन्तान् सरक्ता नवपीड़येत् ॥३९॥
तरुणस्य मनुष्यस्य शीतै रालेपयेद् बहिः ॥
सिक्त्वांबुभि स्ततश्शीतैः संधानीयै रुपाचरेत् ॥४०॥
उत्पलस्य च नालेन क्षीरपानं विधीयते ॥
जीर्णस्याथ मनुष्यस्य वर्जयेच्चलितान् द्विजान् ॥४१॥
नासां सन्नां विवृत्तां च ऋज्जीं कृत्वा शलाकया ।
प्टथङ् नासिकयो र्नाडयौ द्विमुख्यौ संप्रवेशयेत् ॥४२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः पट्टेन संवेष्ट्य घृतसेकं प्रदापयेत् ।
भग्नं कर्णं च बध्नीयात् समं कृत्वा घृतप्लुतम् ॥४३॥
सद्यः क्षतविधानञ्च ततः पश्चात्समाचरेत् ।
मस्तुलुंगाद्विना भिन्ने कपाले मधुसर्पिषी ॥४४॥
दत्वा ततो निवध्नीया त्घटसेकं प्रदापयेत् ।
(॥ सप्ताहञ्च पिबेद्घृतमित्यपिपाठः)
पतनादभिघाताद्वा शूनमंगं यदक्षतम् ।
शीतान्प्रदेहां सेकांश्च भिषक् तस्यावचारयेत् ॥४५॥
अथ जंघोरुभग्नानां कपाटशयनं हितम् ।
कीलकाः बंधनार्थं हि पञ्च कार्या विजानता ॥४६॥
यथा न चलनं तस्य भग्नस्य क्रियते तथा ।
संधे रुभयतो द्वौ द्वौ तले चैकश्च कीलकः ॥४७॥
श्रोण्यां वा पृष्ठवंशे वा वक्षस्यक्षकयो स्तथा ।
भग्नसंधिविमोक्षेषु विधिमेनं समाचरे ४८॥
संधीं श्चिरविमुक्तांस्तु स्निग्धान्स्विन्नान्मृदुकृतान् ।
उक्तै र्विधानै र्बुद्ध्या तु सम्यक् प्रकृतिमानयेत् ॥४९॥
काण्डभग्ने प्ररूढेतु विषमोल्वणसंहिते
आपोथ्य शमयेद्भग्न ततो भग्नवदाचरेत् ॥५०॥
कल्पयेत् गतं शुष्कं व्रणान्ते ऽस्थि समाहितः ।
संध्यन्ते वा क्रियां कुर्यात् सव्रणे व्रणभग्नवत् ॥५१॥
ऊर्ध्वकाये तु भग्नानां मास्तिक्यं कर्णपूरणम् ।
घृतपानं हितं नस्यं प्रशाखास्वनुवासनम् ॥५२॥
अत ऊर्ध्वं प्रवक्ष्यामि तैलं भग्नस्य साधनम् ।
रात्रौ रात्रौ तिलान् कृष्णान् वासयेदस्थिरे जले ॥५३॥
दिवा दिवा शोषयित्वा गवां क्षीरेण भावयेत् ॥५४॥
तृतीयं सप्तरात्रं वा भावये न्मधुकाम्बुना ।
ततः क्षीरे पुनः पीतान् सुशुष्कां श्चूर्णयेद्भिषक् ॥५५॥
काकोल्यादि सयष्ट्याह्वं मंजिष्टां सारिवां तथा ।
कुष्ठं सर्जरसं मासीं सुरदारु सचन्दनम् ॥५६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शतपुष्पां च संचूर्ण्य तिलचूर्णेन योजयेत् ।
पीड़नार्थं च कर्त्तव्यं सर्वगंधशृतम्पयः ॥५७॥
चतुर्गुणेन पयसा तत्तैलं विपचेद्भिषक् ।
एला मंशुमतीं पत्रं जीवकं तगरं तथा ॥५८॥
रोधं प्रपौण्डरीकं च तथा कालानुसारिणं ।
सैरेयकं क्षीरशुक्ला मनन्तां समधूलिकाम् ॥५९॥
पिष्ट्वा शृङ्गाटकं चैव पूर्वोक्तान्यौषधानि च ।
एभिस्तु विपचेत्तैलं शास्त्रविन्मृदुनाग्निना ॥६०॥
एतत्तैलं सदा पथ्यं भग्नानां सर्वकर्मसु ॥
आक्षेपके पक्षघाते तालुशोषे तथार्दिते ॥६१॥
मन्यास्तम्भे शिरोरोगे कर्णशूले हनुग्रहे ॥
वाधीर्य्ये तिमिरे चैव ये च स्त्रीषु क्षयं गताः ॥६२॥
पथ्यं पाने तथाभ्यंगे नस्ये वस्तिषु भोजने ॥
ग्रीवास्कंधोरसां वृद्धि रमुनैवोपजायते ॥६३॥
मुखं च पद्मप्रतिमं ससुगंधि समीरणम् ॥
गंधतैलमिदं नाम्ना सर्ववातविकारनुत् ॥
राजार्हमेतत्कर्तव्यं राज्ञामेव विचक्षणैः ॥६४॥
लपुसाक्षप्रियालानां तैलानि मधुरैः सह ॥
वसां दत्वा यथालाभं क्षीरे दशगुणे पचेत् ॥६५॥
स्नेहोत्तममिदं चाशु कुर्याद् भग्नस्य साधनम् ॥
पानाभ्यंजननस्येषु वस्तिकर्मणि सेचने ॥६६॥
भग्नं नैति यथापाकं प्रयतेत तथा भिषक् ॥
पक्वमांससिरास्नायु तद्धि कृच्छ्रेण सिद्ध्यति ॥६७॥
भग्नं संधिमनाविद्धमहीनाङ्गमनुल्वणम् ॥
सुखचेष्टाप्रचारं च संहितं सम्यगादिशेत् ॥६८॥

इतिशल्यतन्त्रसमुच्चयेऽष्टाविंशोऽध्यायः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथैकोनात्रिंशोऽध्यायः

अथातोऽश्मरीविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

चतस्रोऽश्मर्यो भवन्ति श्लेष्माधिष्ठानाः - तद्यथा श्लेष्मणा, वातेन, पित्तेन, शुक्रेण चेति ॥२॥

तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मा मूत्रसम्पृक्तोऽनुप्रविश्य वस्तिमश्मरीं जनयति ॥३॥

तासां पूर्वरूपाणि, वस्तिपीड़ारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसादीनां वेदना ज्वरो कृच्छ्रावसादो वस्तगधित्वं मूत्रस्येति ॥४॥

यथास्ववेदनावर्णं दुष्टं सान्द्रमथाविलम् ॥
पूर्वरूपेऽश्मनः कृच्छ्रान्मूत्रं सृजति मानवः ॥५॥

अथ जातासु वस्तिसेवनीमेहनेषु वृक्कगवीनीमूत्रप्रसेकेषु च अन्यतमस्मिन्मेहतो वेदना मूत्रधारासंगः वृक्कान्तर्गतसूक्ष्मस्रोतसामक्रियत्वात् सरूधिरमूत्रता मूत्रविकिरणं गोमेदकप्रकाशमत्याविलं ससिकतं विसृजति; धावनलंघन-प्लवनपृथ्यानोष्णाध्वगमनैश्चास्य वेदना भवति ॥६॥

तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्यमूत्रप्रतीघाता द्दाल्यते भिद्यते निस्तुद्यते इव च वस्ति र्गुरुः शीतश्च भवति अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्ड-प्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लेष्मिकीमिति विद्यात् ॥७॥

पित्तयुक्तस्तु श्लेष्मा संघातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि, तस्य मूत्रप्रतीघादूष्यते चूष्यते दह्यते पच्यते इव वस्ति, उष्णवातश्च भवति अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकमितिविद्यात् ॥८॥

वातयुक्तस्तु श्लेष्मा संघातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि, तस्य मूत्रप्रतिघातात् तीव्रा वेदना

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति, तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीड़यति मेढ्रं मृद्नाति पायुं स्पृशति आत्मानं मुंचति विदहति कृच्छ्रेण चास्य मेहतो वातमूत्रपुरीषाणि निः सरन्ति, अश्मरी चात्र श्यावा परुषा विषमा खरा कदम्बपुष्पवत्कंटकाचिता भवति तां वातिकिमितिविद्यात् ॥९॥

प्रायेणैता स्तिस्रोऽश्मर्यो दिवास्वप्नसमशनाध्यशन-शीतस्निग्ध-गुरुमधुराहारप्रियत्वात् विशेषेण बालानां भवन्ति, तेषामेवाल्पवस्ति-कायत्वादनुपचितमांसत्वात् च वस्तेः सुखग्रहणाहरणा भवन्ति, महतां तु शुक्राश्मरी शुक्रवेगरोधनिमित्ता ॥१०॥

मैथुनाभिघातादतिमैथुनाद्वा शुक्रं चलितं मार्गमनिर्गच्छद्विमार्ग-गमनादनिलो ऽभितः संगृह्य मेढ्रवृषणयो रन्तरे संहरति संहृत्य चोपशोषयति सा मूत्रमार्गमावृणोति मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च श्वयथुमापादयति, पीडितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यत इव तां शुक्राश्मरीमिति विद्यात् ॥११॥

भवन्ति चात्र

शर्करा सिकतामेहौ भस्माख्यो ऽश्मरीवैकृतम् ।
अश्मरी शर्करा ज्ञेया तुल्यव्यञ्जनवेदना ॥१२॥
पवने ऽनुगुणे सा तु निरेत्यल्पा विशेषतः ।
साभिन्नमूर्ति वीतेन शर्करेत्यभिधीयते ॥१३॥
हृत्पीड़ा सक्थिसदनं कुक्षिशूलं सवेपथुः ।
तृष्णोर्ध्वगोऽनिलः कार्श्यं दौर्बल्यं पाण्डुगात्रता ॥१४॥
अरोचकाविपाकौ तु शर्करार्तं भवन्ति च ।
मूत्रमार्गप्रवृत्ता सा सक्ता कुर्यादुपद्रवान् ॥१५॥
दौर्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिम् ।
पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीड़नं वमिम् ॥१६॥
नाभिपृष्ठकटिमुष्कगुदवंक्षणशेफसाम् ।
एकद्वारः तनुत्वक्कः मध्ये वस्तिरधोमुखः ॥१७॥
एकसम्बंधिनो ह्येते गुदास्थिविवरश्रिताः ।
वर्ति र्वस्तिशिरश्चैव पौरुषं वृषणौ गुदम् ॥१८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अलाब्वा इव रूपेण सिरास्नायुपरिग्रहः ।
मूत्राशयो मलाधारः प्राणायतनमुत्तमम् ॥१९॥
पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः ।
तर्पयन्ति तु ताः वृक्कौ सरितः सागरं यथा ॥२०॥

तर्पयन्ति सदा मुत्रमित्यस्य स्थाने वृक्काविति ।
श्रीगणनाथसम्मतिः वयमप्यनुमोदामहे ।

सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः ।
नाडीभिरुपनीतस्य मूत्रस्यामाशयान्तरात् ॥२१॥
जाग्रतः स्वपतश्चैव स निःस्यन्देन पूर्यते ।
आमुखा त्सलिले न्यस्तः पार्श्वेभ्य पूर्यते नवः ॥२२॥
घटो यथा तथा वृक्कौ ततो वस्तिश्च पूर्यते ।
एवमेव प्रवेशेन वातः पित्तं कफोऽपि वा ॥२३॥
मूत्रयुक्त उषस्नेहात् प्रविश्य कुरुते ऽश्मरीम् ।
अप्सु स्वच्छास्वपि यथा निषिक्तासु नवे घटे ॥२४॥
कालान्तरेण पंकः स्यादश्मरीसंभवस्तथा ।
संहन्त्यपो यथा दिव्या मारुतो ऽग्निश्च वैद्युतः ॥२५॥
तद्वद्बलासं वस्तिस्थ मुष्मा संहन्ति सानिलः ।
मारुते प्रगुणे वस्तौ मूत्रं सम्यक् प्रवर्तते ॥२६॥
विकारा विविधाश्चापि प्रतिलोमे भवन्ति हि ।

इति शल्यतन्त्रसमुच्चय एकोनत्रिंशोऽध्यायः

अथ त्रिंशोऽध्यायः ॥

अथातो ऽश्मरीचिकित्सितमध्यायं व्याख्यास्यामः ॥१॥
अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः ।
तरुणो भेषजै स्साध्यः प्रवृद्ध श्छेदमर्हति ॥२॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ।
निश्चितस्यापि वैद्यस्य बहुशो दृष्टकर्मणः ॥३॥
तस्मादाप्टच्छ्य कर्त्तव्यमीश्वरं साधुकारिणा ।

अथ रोगान्वित-मुपस्निग्धमपक्वदोषमीषत्कर्शितम्, अभ्यक्त-स्विन्नशरीरम् भुक्तवन्तं कृतबलिमंगलस्वस्तिवाचनम् अोपहरणीयेन विधानेनोपसम्भृतसम्भारं आश्वास्य ततो बलवन्तं अविक्लवम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

आजानुसमे फलके प्रागुपवेश्य पुरुषम् तस्योत्संगे निषण्णपूर्वकायम् उत्तानम् उन्नतकटिकम् वस्त्रधारकोपविष्टम् संकुचितजानुकूर्परम् इतरेण सह सूत्रेण शाटकं वा यन्त्रयित्वा ॥४॥

ततः स्वभ्यक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिना अवपीड़येत् यावदश्मरी अधःप्रपन्ना इति ॥५॥

ततः स्नेहाभ्यक्ते क्लृप्तनखे वामहस्तप्रदेशिनीमध्यमे पायौ प्रणिधायानुसेवनी मासाद्य प्रयत्नवलाभ्यां पायुमेढ्रान्तरमानीय निर्व्यलीकमनायतम् अविषमञ्च वस्तिं सन्निवेश्य भृशमुत्पोड़येत् अंगुलिभ्यां यथाग्रन्थि रिवोन्नतं भवति शल्यम् ॥६॥

स चेद् गृहीते शल्ये तु विवृताक्षो विचेतनः ।
हतवल्लम्बशीर्षश्च निर्विकारो मृतोपमः ॥७॥

न तस्य निर्हरेत् शल्यं निर्हरेत्तु म्रियेत सः ।
विना त्वेतेषु रूपेषु निर्हर्त्तुं समुपाचरेत् ॥८॥

सव्ये पार्श्वे सेवनीं यवमात्रेण मुक्त्वावचारयेत् ।
शस्त्र मश्मरीप्रमाणम् दक्षिणतो वा क्रिया सोकर्यहेतो रित्येके ॥९॥

यथा न भिद्यते न चूर्ण्यते वा तथा प्रयतेत चूर्णं ह्यल्पमप्यवस्थितं पुनः परिवृद्धिमेति ॥१०॥

तस्मात्समस्तामग्रवक्त्रेण आददीत ॥११॥

स्त्रीणां वस्तिपार्श्वगतो गर्भाशयः सन्निकृष्टः तस्मान्नासामुत्संगवच्छस्त्रं पातयेत्, अतोन्यथा खलु आसां मूत्रस्रावी व्रणो भवति, पुरुषस्यापि मूत्रप्रसेकक्षणात् मूत्रकरणम्, अश्मरी व्रणाद्दते भिन्नो वस्तिरेकधा न भवति, द्विधा भिन्नवस्तिराश्मरिको न सिद्ध्यति ॥१२॥

अश्मरीव्रणनिमित्तमेकधा भिन्नवस्ति र्जीवति ॥१३॥

क्रियाभ्यासात् शास्त्रविहितच्छेदात् निस्यन्दपरिवृंहत्वाच्च शल्यस्थैति ॥१४॥

उद्धृतशल्यन्तुष्णोदकद्रोण्यामवतार्य स्वेदयेत् तथा हि वस्तिरस्टजा न पूर्यते, पूर्णे वा क्षीरवृक्षकषायं पुष्पनेत्रेण योजयेत् ॥१५॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षीरवृक्षकषायन्तु पुष्पनेत्रेण योजितम् ।
निर्हरेदश्मरीं तूर्णं रक्तं वस्तिगतञ्च यत् ॥१६॥

मूत्रमार्गविशोधनार्थं चास्मै गुडसौहित्यं वितरेत्, उद्धृत्य चैनं मधुघृताभ्यङ्क्तव्रणं मूत्रविशोधनद्रव्यसिद्धां उष्णां सघृतां यवागूं पाययेदुभयकालं, त्रिरात्रादूर्ध्वं गुडप्रगाढेन पयसा मृद्वोदनमल्पं भोजयेत् दशरात्रमसृग्विशुद्ध्यर्थं व्रणक्लेदनार्थञ्च ॥१७॥

दशरात्रादूर्ध्वं फलाम्लैः जांगलरसै रुपाचरेत्, ततोदशरात्रं चैनमप्रमत्तः स्वेदयेत् स्नेहेन द्रव्यस्वेदेन वा, क्षीरिवृक्षकषायेण चास्य व्रणं प्रक्षालयेत् रोध्रमधुक-मंजिष्ठा-प्रपौण्डरीक-कल्कैर्व्रणं प्रतिग्राहयेत् ॥१८॥

एतेष्वेव हरिद्रायुतेषुतैलंघृतम्वा विपक्वं व्रणाभ्यंजनम्; स्थानशोणितमुत्तरवस्तिभि रुपचरेत्; स्वमार्गमप्रतिपद्यमाने मूत्रे व्रणं यथोक्तेन विधिन दहेदग्निना ॥ १९ ॥

स्वमार्गप्राप्ते मूत्रे चोत्तरवस्त्यास्थापनानुवासनैरुपचरेत्, मधुरकषायैरिति यदृच्छया वा मूत्रमार्गप्रतिपन्नां-अन्तरासक्तां शुक्राश्मरीं शर्करां वा स्रोतसा पहरेत् ॥२०॥

एवञ्चाशक्ये विदार्य वा नाड़ीं शस्त्रेण वड़ीशेनोद्धरेत् रूढ़व्रणश्च अंगनाश्वनगनागरथद्रुमान्नारोहेत् वर्षं नाप्लु प्लवेत भुञ्जीत वा गुरु ॥२१॥ भवति चात्र ।

तंवस्तिभिर्नचारोहेत् वर्षं रूढ़व्रणोऽपि च ।
नगनागाश्ववृक्षस्त्रीरथानाप्सु प्लवेत सः ॥२२॥

मूत्रवह-शुक्रवह-मुष्कस्रोतो मूत्रप्रसेक-सेवनी योनि-गुदवस्तीन् परिहरेत् ॥२३॥

तत्र मूत्रवहछेदान्मरणं मूत्रपूर्णवस्तेः, शुक्रवहछेदान्मरणं क्लैब्यं वा मुष्कस्रोत उपघाताद् ध्वजभंगः मूत्रप्रसेकक्षणना न्मूत्रक्षरणम् सेवनीयोनिच्छेदाद्रुजाप्रादुर्भावः वस्तिगुदविद्धलक्षण मवक्ष्यते ॥२४॥

भवतश्चात्र ।

मर्माण्यष्टावसम्बुद्ध्य स्रोतोजानि शरीरिणाम् ।
व्यापादयेद्बहून्मर्त्या ञ्छस्त्रकर्मापटुर्भिषक् ॥२५॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सेवनी शुक्रहरणी स्रोतसी फलयो गुदम्।
मूत्रसेकं मूत्रवहं मूत्रवस्तिस्तथाष्टमः ॥२६॥

इतिशल्यतन्त्रसमुच्चयेत्रिंशोऽध्यायः।

अथैकत्रिंशोऽध्यायः॥

अथातो भगन्दरविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

वातपित्तश्लेष्मसन्निपातागन्तुनिमित्ताः शतपोनकोष्ट्रग्रीवपरिस्रावि-शम्बूकावर्तोन्मार्गिणो यथासंख्यं पञ्च भगन्दरा भवन्ति ॥२॥

ते तु भगगुदवस्तिप्रदेशदारणाच्च भगन्दरा इत्युच्यन्ते, अपक्काः पिड़काः पक्कास्तु भगन्दराः ॥३॥

तेषान्तु पूर्वरूपाणि कटीकपालवेदना गुदकण्डूर्दाहः। शोफश्च गुदस्य भवति ॥४॥

तत्रापथ्यसेविनां वायुः प्रकुपितः सन्निवृत्तः स्थिरीभूतो गुदमभितो गुले द्व्यंगुले वा मांसशोणितेऽदुष्यारुणवर्णां पिड़कां जनयति, सास्य तोदादीन् वेदनाविशेषान् जनयति अप्रतिक्रियमाणाच्च पाकमुपैति ॥५॥

मूत्राशयाभ्यासगतत्वाच्च व्रणः प्रक्लिन्नः शतपोनकवदणुमुखै-श्छिद्रैरापूर्यते तानि च छिद्राणि अजस्रं चाच्छं फेनानुविद्धमधिक-मास्रावं स्रवति व्रणश्च ताड्यते भिद्यते सूचीभिरिव निस्तुद्यते गुदं चावदीर्यते वातमूत्रपुरीषरेतसामप्यागमश्च तैरेव छिद्रैर्भवति तं भगन्दरं शतपोनकमित्याचक्षते ॥६॥

पित्तं तु प्रकुपितं अनिलेनाधः प्रेरितं पूर्ववदवस्थितं रक्तां तन्वीं उच्छ्रितामुष्ट्रग्रीवाकारां पिड़कां जनयति सास्य चोषादीन्वेदनाविशेषान् जनयति अप्रतिक्रियमाणा च पाकमुपैति ॥७॥

व्रणश्चाग्निक्षाराभ्यामिव पाप्च्यते दंदह्यते दुर्गन्धमुष्णमास्रावं स्रवति उपेक्षितश्च वातमूत्रपुरीषरेतांसि विस्रजति व्रणमुखात् तं भगन्दरमुष्ट्रग्रीवमित्याचक्षते ॥८॥

श्लेष्मा तु प्रकुपितः समीरणेनाधः प्रेरितः पूर्ववदवस्थितः मुक्ताव-भासां स्थिरां कण्डूमतीं पिड़कां जनयति सास्य कण्ड्वादी न्वेदना-विशेषाञ्जनयति अप्रतिक्रियमाणा च पाकमुपैति ॥९॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्रणश्च कठिनः संरम्भी कण्डूप्रायः पिच्छिलमजस्रमास्रावं स्रवति उपेक्षितश्च वातमूत्रपुरीषरेतांसि विस्रंसयति तेनैव व्रणच्छिद्रेण तं परिस्राविणमाचक्षते ॥१०॥

वायुः प्रकुपितः प्रकुपितौ पित्तश्लेष्माणौ परिगृह्याधोगत्वा पूर्ववदवस्थितः पादांगुष्ठप्रमाणां सर्वलिंगां पिड़कां जनयति, सास्यतीव्रदाहकण्डूवादीन्वेदनाविशेषाञ्जनयति ॥११॥

अप्रतिक्रियमाणा च पाकमुपैति व्रणश्च नानाविधवर्णमास्रावं स्रवति पूर्णनदीशम्बूकावर्तवच्चात्रसमुत्तिष्ठन्ति वेदनाविशेषास्तं भगन्दरं शम्बूकावर्तमित्याचक्षते ॥१२॥

मूढ़ेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदावगाढ़ पुरीषोन्मिश्रमपानेनाधः प्रेरितमसम्यगागतं गुदं क्षिणोति तत्र क्षतनिमित्तः कोथ उपजायते ॥१३॥

तस्मिंश्च क्षते पूयरुधिरावकीर्णे मांसकोथे भूमाविव जलप्रक्लिन्नायां क्रिमयः संजायन्ते ते भक्षयन्तो गुदमनेकधा पार्श्वतो दारयन्ति तस्य तै र्मार्गैः कृमिकृतैः वातमूत्रपुरीषरेतांस्यभिनिस्सरन्ति तं भगन्दरमुन्मार्गिणं माचक्षते ॥१४॥

भवन्तिचात्र ।

उत्पद्यतेऽल्परुक्शोफाः शीघ्रं चाप्युपशाम्यति ।
पाय्वन्तदेशे पिडका सा ज्ञेया न्या भगन्दरात् ॥१५॥
पायोः स्याद्व्यंगुले देशे गूढ़मूला सरुग्ज्वरा ।
भागन्दरी तु विज्ञेया पिड़कातो विपर्ययात् ॥१६॥
यानयानान्मलोत्सर्गात् कण्डूरुग्दाहशोफवान् ।
पायु र्भवेत्ततः कट्यां पूर्वरूपे भगन्दरे ॥१७॥
घोराः साधयितुं दुःखाः सर्व एव भगन्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः ॥१८॥
वातमूत्रपुरीषाणि कृमयःशुक्रमेव च ।
भगन्दरात्प्रस्रवन्ति यस्य तं परिवर्जयेत् ॥१९॥

इतिशल्यतन्त्रसमुच्चयेत्रयोविंशोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ द्वात्रिंशोऽध्यायः

अथातो भगन्दरचिकित्सितं व्याख्यास्यामः ॥१॥

पञ्च भगन्दरा व्याख्याता स्तेष्वसाध्याः सम्बूकावर्तः । शल्यनिमित्तश्चेति शेषाः कृच्छ्रसाध्याः ॥२॥

तत्र भगन्दरपिडकोपद्रुतमातुरम तर्पणादिविरेचनान्तेनैकादशविधेनोपक्रमेणोपक्रमेतापक्वपिडकम् ॥३॥

पक्वेषु चोपस्निग्धमवगाहस्विन्नं शय्यायां निवेश्याशयमिव यन्त्रयित्वा भगन्दरं समीक्ष्य पराचीनमर्वाचीनम्वा ततः प्रणिधायैषणीं उन्नम्य साशयमुद्धरेत् शस्त्रेण ॥४॥

अन्तर्मुखे चैवं सम्यग्यन्त्रं प्रणिधाय प्रवाहमाणस्य भगन्दर-मुखमासाद्यैषणीं दत्वा शस्त्रं पातयेत् आसाद्य वाग्निस्तारं चेत्येतत्सामान्यं सर्वेषु विशेषतस्तु ॥५॥

नाड्यन्तरे व्रणान्कुर्यात् भिषक् तु शतपोनके ।
तत स्तेषूपरूढेषु शेषा नाडी रुपाचरेत् ॥६॥
गतयोऽन्योन्यसम्बद्धा वाह्याश्छेद्या स्त्वनेकधा
नाडीरनभिसम्बद्धा यश्छिनत्त्येकधा भिषक् ॥७॥
सकुर्याद्विवृतं जन्तो व्रणं गुदविदारणम् ।
तस्य तद्विवृतं मार्गं विण्मूत्रमनुगच्छति ॥८॥
आटोपगुदशूलञ्च करोति पवनो भृशम् ।
तत्राधिगततन्त्रोऽपिभिषक् मुह्यदेसंशयम् ॥९॥
तस्मान्न विवृतः कार्यः व्रणस्तु शतपोनके ।
व्याधौ तत्र वहुच्छिद्रे भिषजा वै विजानता ॥१०॥
अर्द्धलांगलकश्छेदः कार्यः लांगलकोऽपि वा ।
सर्वतोभद्रको वापि कार्यो गोतीर्थकोऽपि वा ॥११॥
द्वाभ्यां समाभ्यां पार्श्वाभ्यां छेदो लांगलको मतः ।
ह्रस्व मेकतरं यच्च सोऽर्धलांगलको मतः ॥१२॥
सेवनीं वर्जयित्वा तु चतुर्द्धा दारिते गुदे ।
सर्वतोभद्रकं छेदमाहु श्छेदविदो जनाः ॥१३॥ तन्त्रान्तरे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लांगलं हलं अर्द्ध लांगल इव अर्द्ध लांगलकः सर्वतोभद्रस्त्वासन-विशेषः पर्यंकिकाकारसदृशो वा गोतीर्थकः गच्छतो गोर्मूत्रसदृशः अथवा गोतीर्थं गोयेनि रुच्यते तदाकारो गोतीर्थकः अथवा गोतीर्थं निपानं येन गावः पिवन्ति तत्खुरांकितवच्छेदविशेषः ॥

पार्श्वागतेन छिद्रेण छेदोगोतीर्थकोमतः ॥१४॥ नि० स०

सर्वतः स्रावमार्गांस्तु दहेद्वैद्यस्तथाग्निना ।
सुकुमारस्य भीरोर्हि दुष्करः शतपोनकः ॥१५॥
रुजास्रावापहं तत्र स्वेदमाशु प्रयोजयेत् ।
स्वेदद्रव्यैर्यथादिष्टैः कुशरापायसादिभिः ॥१६॥
ग्राम्यानूपौदकैर्मांसैर्लावाद्यैर्वैकिरेण वा ।
वृक्षादनीमथैरण्डं विल्वादिञ्चगणं तथा ॥१७॥
कषायं सुकृतं कृत्वा स्नेहकुम्भे निषेचयेत् ।
नाडीस्वेदेन तेनास्य तं व्रणं स्वेदयेद्भिषक् ॥१८॥
तिलैरण्डातसीमाषयवगोधूमसर्षपान् ।
लवणान्यम्लवर्गं च स्थाल्यामेवोपसाधयेत् ॥१९॥
आतुरं स्वेदयेत्तेन तथा सिद्ध्यति कुर्वतः ।
स्विन्नं च पाययेदेनं कुष्ठं च लवणानि च ॥२०॥
ततो मधुकतैलेन तस्य सिंचेद् भिषक् व्रणम् ।
परिषिञ्चेद्गुदं चास्य तैलैर्वातरुजापहैः ॥२१॥
विधिनानेन विण्मूत्रं स्वमार्गमधिगच्छति ।
अन्येश्चोपद्रवा स्तीव्राः सिद्ध्यन्त्यत्र न संशयः ॥२२॥
शतपोनक आख्यात उष्ट्रग्रीवे क्रियांशृणु ।
अथोष्ट्रग्रीवमेषित्वा छित्वा क्षारं निपातयेत् ॥२३॥
पूतिमांसव्यपोहार्थं अग्निरत्र न पूजितः ।
अथैनं घृतसंसृष्टै स्तिलैः पिष्टैः प्रलेपये ॥२४॥
बंधं ततोऽनुकुर्वीत परिषेकन्तु सर्पिषा ।
तृतीये दिवसे मुक्त्वा यथास्वं शोधयेद् भिषक् ॥२५॥
ततः शुद्धं विदित्वा तु रोपयेच्च यथाक्रमम् ।
उत्कृत्यास्रावमार्गन्तु परिस्राविणि बुद्धिमान् ॥२६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षारेण वा स्रावगतिं दहेद् हुतवहेन वा।
मुखोष्णेनाणुतैलेन सेचयेद् गुदमण्डलम् ॥२७॥
उपनाहाः प्रदेहाश्च मूलक्षारसमन्विताः।
वामनीयैषधैः कार्याः परिषेकाश्च मात्रया ॥२८॥
मृदुभूतं विदित्वैनं क्षाल्पस्रावरुगन्वितम्।
गतिमन्विष्य शस्त्रेण छिन्द्यात् खर्जूरपत्रकम् ॥२९॥
चन्द्रार्धचन्द्रवक्त्रं च सूचीमुखमवाङ्मुखम्।
छित्वाग्निना दहेत्सम्यक् चैवं क्षारेण वा पुनः ॥३०॥
ततः संशोधनैरेवं मृदुपूर्वं विशोधयेत्।
बहिरन्तर्मुखश्चापि शिशो यस्य भगन्दरः ॥३१॥
तस्याहितं विरेकाग्निशस्त्रक्षारावचारणम्।
यद्यन्मृदु च तीक्ष्णं च तत्तत्तस्यावचारयेत् ३२॥
आरग्वधनिशाकालाचूर्णं क्षौद्रघृताप्लुतम्।
अग्रवर्तिप्रणिहितं व्रणानां शोधनं हितम् ॥३३॥
योगोऽयं नाशयत्याशु गतिं मेघमिवानिलः।
आगन्तुजे भिषङ् नाडीं शस्त्रेणोत्कृत्य यत्नतः ॥३४॥
जाम्बवाष्ठेनाग्निवर्णेन तप्तया वा शलाकया।
दहेद्यथोक्तं मतिमान् तं व्रणं सुसमाहितः ॥३५॥
कृमिघ्नं च विधिं कुर्यात् शल्यानयनमेव च।
प्रत्याख्यायैव चारभ्यो वर्ज्यश्चापि त्रिदोषजः ॥३६॥
एतत्कर्म समाख्यातं सर्वेषामनुपूर्वशः।
एषान्तु शस्त्रपतनाद्वेदना यत्र जायते ॥३७॥
तत्राणुतैलेनोष्णेन परिषेकः प्रशस्यते।
वातघ्नौषधसम्पूर्णां स्थालीं छिद्रशरावि काम् ॥३८॥
स्नेहाभ्यक्तगुदस्तस्यां मध्यासीत सवाप्यिकाम्।
नाड्या वास्याहरेत् स्वेदं शयानस्य रुजापहम् ॥३९॥
उष्णोदकेऽवगाह्यो वा तथा शाम्यति वेदना ॥
कदलीमृगलोपाकप्रियकाजिनसम्भृतान् ॥४०॥
कारयेदुपनाहाँश्च शाल्वणादि र्विचक्षणः ॥
कटुत्रिकं वचाहिंगु लवणान्यथ दीप्यकम् ॥४२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाययेच्चाम्लकौलत्थं सुरासौवीरकादिभिः ॥
ज्योतिष्मती लाङ्गलकी श्यामादन्तीतृवृत्तिलाः ॥४३॥
कुष्ठं शताह्वा गोलोमी तिल्वको गिरिकर्णिका ॥
कासीसं काञ्चनक्षीयौ वर्गः शोधन इष्यते ॥४४॥
तृवृत्तिला नागदन्ती मञ्जिष्ठा पयसा सह ॥
उत्सादनं भवेदेतत् सैंधवक्षौद्रसंयुतम् ॥४५॥
रसांजनं हरि. द्वे मंजिष्ठा निम्वपल्लवाः ॥
तृवृत्तेजोवतीदन्तीकल्को नाड़ीव्रणापहः ॥४६॥
कुष्ठं तृवृत्तिलादन्तीमागध्यः सैंधवं मधु ॥
रजनी त्रिफला तुत्थं हितं स्याद्व्रणरोपणम् ॥४७॥
मागध्यो मधुकं रोध्रं कुष्ठमेलाहरेणवः ॥
समंगा धातकी चैव सारिवा रजनीद्वयम् ॥४८॥
प्रियंगवः सर्जरसः पद्मकं पद्मकेशरम् ॥
सुधां वचां लांगलकीं मधुच्छिष्टं ससैंधवम् ॥४९॥
एतत्संभृत्य सम्भारान् तैलं धीरो विपाचयेत् ॥
एतै गण्डमालासु मण्डलेष्वथ मेहिषु ॥५०॥
रोपणार्थं हितं तैलं भगन्दरविनाशनम् ॥
न्यग्रोधादिगणश्चैव हितः शोधनरोपणे ॥५१॥
तैलं घृतम्वा तत्पक्वं भगन्दरविनाशनम् ॥
तृवृद्दन्तीहरिद्रार्कमूलं लोहाश्वमारकौ ॥५२॥
विडंगसारं त्रिफला स्नूह्यर्कपयसी मधु ॥
मधूच्छिष्टसमायुक्तं स्तैलमेतैर्विपाचयेत् ॥५३॥
भगन्दरविनाशार्थमेतद्योज्यंविशेषतः ॥
चित्रकार्कौ तिवृत्पाठे मलयं हयमारकम् ॥५४॥
सुधां वचां लाङ्गलकीं सप्तपर्णं सुवर्चिकाम् ॥
ज्योतिष्मतीं च सभृत्य तैलं धीरो विपाचयेत् ॥५५॥
एतद्घि स्यन्दनं तैलं भृशं दद्याद्भगन्दरे ॥
शोधनं रोपणं चैव सवर्णकरणं तथा ॥५६॥
द्विव्रणीयमवेक्षेत व्रणावस्थासु बुद्धिमान् ॥
छिद्रादूर्ध्वं हरेद्यन्त्रं मर्शयन्तस्य यन्त्रवित् ॥५७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततो भगन्दरे दद्यादेतदर्धेन्दुसन्निभम् ॥
व्यायामं मैथुनं कोपं पृष्ठयानं गुरूणि च ॥५८॥
सम्वत्सरं परिहरेदुपरूढव्रणो यदि ॥

इति शल्यतन्त्रसमुच्चये द्वात्रिंशोऽध्यायः

त्रयस्त्रिंशोऽध्यायः

अथातः उदराणां चिकित्सितं व्याख्यास्यामः ॥१॥

प्लीहोदरिणः स्निग्धस्विन्नस्य दध्ना भुञ्जतः वामबाहो कूर्पराभ्यन्तरतः सिरां विध्येत् विमर्दयेत्पाणिना प्लीहानम् रुधिरस्यन्दनार्थं ततः संशुद्धदेहः समुद्रयुक्तिकाक्षारं पयसा पाययेत हिंगुसौवर्चिकाक्षारेण स्रुतेन, पलाशक्षारेण वा यवक्षारं, पारिजातकेक्षुरकापामार्गक्षारम्वा तैलसंसृष्टं, शोभांजनकपाठं पिप्पलीसैंधवचित्रकयुक्तं, पूतिकरंजक्षारम्वाम्लस्रुतं विडंगलवणपिप्पलीप्रगाढम् ॥२॥

यकृदाल्येऽप्येष एव क्रियाविभागः, विशेषतस्तु दक्षिणबाहौ सिराव्यधः ॥३॥

मणिबंधं सकृन्नाम्य वामांगुष्ठसमीरिताम् ।
दहेत्सिरां शरेणाशु प्लीहघ्नो वैद्यः प्रशान्तये ॥४॥

वद्धगुदे परिस्रावणि च स्निग्धस्विन्नस्याभ्यक्तस्य अधो नाभेर्वामतश्चतुरंगुलमपहाय रोमराज्या, उदरं पाटयित्वा चतुरंगुलप्रमाणानि अन्त्राणि निष्कृष्य निरीक्ष्य वद्धगुदस्यान्त्रप्रतिरोधकरं चाश्मानं वालम्बापेक्ष्य मलजातम्वा, ततो मधुसर्पिर्भ्यामभ्यज्यान्त्राणि यथास्थानं स्थापयित्वा बाह्यं व्रणमुदरस्य सीव्येत् ॥५॥

परिस्रावणि चाप्येवमेव शल्यमुद्धृत्यान्त्रस्रावान् संशोध्य तच्छिद्रमन्त्रं समाधाय कालपिपीलिकाभिर्दंशयेत् दष्टे च तासां कायानपहरेत् नशिरांसि, तत पूर्ववत् सीव्येत् संधानं च यथोक्तं कारयेत् ॥६॥

यष्टिमधुकमिश्रया च कृष्णामृदालिप्य बंधेनोपचरेत् ततो निवातागारं प्रवेश्याचारिकमुपदिशेत ॥७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वासयेच्चैनम् तैलद्रोण्यां सर्पिर्द्रोण्यांम्वा पयोवृत्तिमिति ॥८॥

उदकोदरिणस्तु वातहरतैलाभ्यक्तगात्रस्य उष्णोदकस्विन्नस्य स्थितस्याजानुफलके समेस्थाने आप्तैः, सुपरिगृहीतस्य आक्रम्य परिवेष्टितस्याधोनाभेः वामत श्चतुरंगुलमपहाय रोमराज्या व्रीहिमुखेनांगुष्ठोदरपरिमाणमवगाढं विध्येत् ॥९॥

तत्र त्रप्वादीनामन्यतमस्य नाड़ीं द्विद्वारां पक्वनाड़ीम्वा संयोज्य दोषोदकं मधसिञ्चेत् ॥१०॥

ततो नाडीमपहृत्य तैललवणेनाभ्यज्य व्रणबंधेनोपचरेत्, नचैकस्मिन् दिवसे सर्वदोषोदकमवसिञ्चेत्, सहसाह्यपहृते तृष्णाज्वरांगमर्दातीसारश्वासपाददाहा उत्पद्येरन्नापूर्यते वा भृशतर मुदरमसञ्जात प्राणस्येति ॥११॥

तस्मात् तृतीयचतुर्थपञ्चमषष्ठाष्टमदशमद्वादशरात्रीणामन्यतममन्तरीकृत्य दोषोदकमल्पाल्पमवसिञ्चेत् ॥१२॥

निस्रुते च दोषोदके गाढतरम् चाविककौशेयचर्मणोन्यतमेन परिवेष्टयेदुदरं तथा नाध्मापयति वायुः षण्मासांश्च पयसा भोजयेत् जांगलरसेन वा तत्र त्रीन्मासानर्द्धोदकेन पयसा फलाम्लेन जांगलरसेन वा, अवशिष्टं मासत्रयमन्नं लघुहितम्वा सेवेत; एवं सर्वतरेणागदो भवति ॥१३॥

॥ भवति चात्र ॥

आस्थापने चैव विरेचने च पाने तथाहारविधिक्रियासु ।
सर्वोदरिभ्यः कुशलैः प्रयोज्यं क्षीरं शृतं जांगलजो रसो वा ॥१४॥

इति शल्यतन्त्रसमुच्चये त्रयस्त्रिंशोऽध्यायः

अथ चतुस्त्रिंशोऽध्यायः

अथ मूढ़गर्भविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

ग्राम्यधर्म-यान-वाहनाध्वगमन-प्रस्खलन-प्रपतन-प्रपीड़न-धावनाभिघात-विषम-शयनासनोपवास-वेगघातातिरुक्ष-कटुतिक्त-भोजनशोकातिहारसेवनातिसारवमनविरेचनप्रखोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैः बन्धना न्मुच्यतेगर्भः फलमिव वृन्तबंधनादभिघातविशेषैः ॥२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स विमुक्तबंधनो गर्भाशयमतिक्रम्य यकृत्प्लीहान्त्रविवरैरवसृंसमानः कोष्ठसंक्षोभमापादयति ॥३॥

तस्या जठरसंक्षोभात् वायुरपानो मूढः पार्श्ववस्तिशीर्षोदरयोनिशूलानाहमूत्रसंगानामन्यतममापाद्य गर्भं च्यावयति तरुणं शोणितस्रावेण ।४॥

तमेव कदाचिद्विवृद्धमसम्यगागतमपत्यपथमनुप्राप्तमनिरस्यमानं विगुणापानसंमोहितं गर्भं मूढगर्भमित्याचक्षते ॥५॥

ततः स कीलः प्रतिखुरो वीजकः परिघ इति तत्र ऊर्ध्ववाहुशिरःपादो योनिमुखं निरुणद्धि कील इव स कीलः, निःसृतहस्तपादशिरः कायसंगी प्रतिखुरः, यस्तु निर्गच्छत्येकशिरो भुजः स वीजकः; परिघ इव योनिमुखमावृत्य तिष्ठेत् सः परिघः इति चतुर्विधो भवतीत्येके भाषन्ते ॥६॥

तत्तु न सम्यक्, कस्मात् मूढो यदा विगुणानिलप्रपीडितोऽपत्यपथमनेकधा प्रतिपद्यते तदा संख्या हीयते ॥ ७ ॥

तत्र कश्चिद्, द्वाभ्यां योनिमुखं प्रतिपद्यते, कश्चित् आभुग्नैकसक्थिरेकेन, कश्चिदाभुग्नसक्थिशरीरः स्फिग्देशेन आगतः तिर्यक् कश्चिदुरःपार्श्वपृष्ठानामन्यतमेनं योनिद्वारं पिधायावतिष्ठते, अन्तःपार्श्वापवृतशिरः कश्चिदेकेन वाहुना, कश्चिदाभुग्नशिरो वाहुद्वयेन, कश्चिदाभुग्नमध्यो हस्तपादशिरोभ्यः, कश्चिदेकेन सक्थ्ना योनिमुखमभिप्रतिपद्यते, अपरेण पायुमित्यष्टधा मूढगर्भगतिरुद्दिष्टा समासेन ॥८॥

तत्र द्वावन्त्यावसाध्यौ मूढगर्भौ शेषानपि विपरीतेन्द्रियार्थाक्षेपकयोनिभ्रंशसंवरणमक्कलश्वासकासभ्रमनिपीड़ितान् परिहरेत् ॥ ९ ॥

भवन्ति चात्र ।

कालस्य परिणामेन मुक्त वृन्ताद् यथाफलम् ।
प्रपद्यते स्वभावेन नान्यथा पतिं फलम् ॥१०॥

एवं कालप्रकर्षेण मुक्तो नाड़ीविवंधनात् ।
गर्भाशयस्थो यो गर्भो जननाय प्रपद्यते ॥११॥
कृमिवाताभिघातैस्तु तदेवोपद्रुतं फलम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पतत्यकालेऽपि यथा तथा स्याद् गर्भविच्युतिः ॥१२
आचतुर्थात्ततो मासात् प्रसवेद् गर्भविच्युतिः ।
ततः स्थितशरीरस्य पातः पञ्चमषष्ठयोः ॥१३॥
प्रविद्ध्यति शिरो या तु नताङ्गी निरपत्रपा ।
नीलोद्धतशिरा हन्ति सा गर्भं स च तां तथा ॥१४॥
गर्भास्पन्दनमादीनां प्रणाशः श्यावपाण्डुता ।
भवत्युच्छ्वासमृतित्वं शूलं चान्तर्मृते शिशौ ॥१५॥
मानसागन्तुभि र्मातुरुपतापैः प्रपीडितः ।
गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीडितः ॥१६॥
वस्तिद्वारे विपन्नायाः कुक्षिः प्रस्पन्दते यदि ।
जन्मकाले ततः शीघ्रंपाटयित्वोद्धरेच्छिशुम् ॥१७॥

इति शल्यतन्त्रसमुच्चये चतुस्त्रिंशोऽध्यायः ।

अथ पञ्चत्रिंशोऽध्यायः ॥

अथातो मूढगर्भचिकित्सितंव्याख्यास्यामः ॥१॥

नातः कष्टतममस्ति यथा मूढगर्भशल्योद्धरणम् अत्र हि योनियकृत्प्लीहान्त्रविवरगर्भाशयानां मध्ये कर्म कर्त्तव्यं स्पर्शेन उत्कर्षणापकर्षणस्थानापवर्तनोत्कर्तनभेदनछेदनपीड़नर्जुकरणदारणानि च, एकहस्तेन गर्भं गर्भिणीं चाहिंसता, तस्मादधिपति-मापृच्छ्य परंच यत्नमास्थायोपक्रमेत ॥२॥

तत्र समासेनाष्टधामूढगर्भगतिरुद्दिष्टा, स्वभावगताः अपि त्रयश्चोत्संगा भवन्ति शिरसो वैगुण्यात् अंशयो र्जघनस्य वा ॥३॥

मृते च गर्भे उत्तानाया आभुग्नसक्थ्या वस्त्राधारकोन्नमितकट्या धन्वननगवृत्तिका-शाल्मली-मृत्स्न-घृताभ्यां भ्रक्षयित्वा हरतं योनौ प्रवेशयेत् गर्भमुपहरेत् ॥४॥

तत्र सक्थिभ्यामागतं अनुलोममेवांछेत्, एकसक्थ्ना प्रपन्नस्येतरसक्थि प्रसार्योपहरेत् ॥५॥

स्फिग्देशेनागतस्य स्फिग्देशं प्रपीड्य ऊर्ध्वमुत्क्षिप्य सक्थिनी प्रसार्य्योपहरेत्, तिर्यगागतस्य परिघस्येव तिरश्चीनस्य पश्चादर्धमूर्ध्वमुत्क्षिप्य पूर्वार्धमपत्यपथमानीय प्रत्यार्जवमपहरेत् ॥६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अंसंप्रपीड्यर्ध्वमुत्क्षिप्य शिरोऽपत्यपथमानीय अपहरेत् वाहुद्वय-प्रतिपन्नस्योर्ध्वमुत्क्षिप्य अंसौ शिरोऽनुलोम-मानीयापहरेत्, द्वावन्त्या-वसाध्यौ, एवमशक्ये शस्त्र-मवचारयेत् ॥७॥

सचेतनञ्च शस्त्रेण न कथंचन दारये ॥
दार्यमाणो हि जननी मर्भकं चैव घातयेत् ॥८॥

ततः स्त्रियमाश्वास्य मण्डलाग्रेण अंगुलिशस्त्रकेण वा शिरो विदार्य शिरः कपालान्याहृत्य शंकुना गृहीत्वोरःसि कक्षायां वा पहरेत्, अभिन्ने शिरसि चाक्षिकूटे गण्डे वा, अंससंसक्तस्यांसदेशे वाहुं छित्त्वा, दृतिभिवाततं वातपूर्णोदरं वा विदार्य निरस्य अन्त्राणि शिथलीभूत-मुद्धरेत्, जघनसक्तस्य वा जघनकपालानि ॥९॥

यद्यद्यदङ्गं हि गर्भस्य तस्य स्वजति तं भिषक् ॥
सम्यग् विनिर्हरेत् छित्त्वा रक्षेन्नारीं च यत्नतः ॥१०॥
गर्भस्य गतयश्चित्रा जायन्तेऽनिलकोपतः ॥
तत्रानल्पमतिः वैद्यो वर्तेत विधिपूर्वकम् ॥११॥
नोपेक्षेत मृतंगर्भं मुहूर्तमपि पंडितः ॥
सह्याशु जननीं हन्ति निरुच्छ्वासं पशुं यथा ॥
वृद्धिपत्रं हि तीक्ष्णाग्रं नारीं हिन्स्यात्कदाचन ॥१३॥
अथापतन्तीमपरां पातयेद् विधिवद्भिषक् ॥
हस्तेनापहरेद्वापि पार्श्वाभ्यां परिपीड्य वा ॥१४॥
धुनुयाच्च मुहुर्नारीं पीड़येद्वांसपिंडिकाम् ॥
तैलाक्तयोनेरेवं तां पातयेन्मतिमान्भिषक् ॥१५॥
एवं निहृतशल्यान्तु सिञ्चेदुष्णेन वारिणा ॥
ततोऽभ्यक्तशरीरायाः योनौ स्नेहं निधापयेत् ॥१६॥

इति शल्यतन्त्रसमुच्चये पञ्चत्रिंशोऽध्यायः

अथ षट्त्रिंशोऽध्यायः

अथातो विद्रधीविज्ञानीयमध्यायं व्याख्यास्यामः ॥ १ ॥
सर्वामरगुरुः श्रीमान् निमित्तान्तरभूमिपः ।
शिष्यायोवाचनिखिलमिदं विद्रधिलक्षणम् ॥ २ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

त्वग्रक्तमांसमेदांसि प्रदुष्यास्थिसमाश्रिताः ॥
दोषाः शोथं शनैर्घोरं जनयन्त्युच्छ्रिताभृशम् ॥ ३ ॥
महामूलं रुजावन्तं वृतं चाप्यथवायतम् ।
तमाहुः विद्रधिं धीराः विज्ञेयः स च षड्विधः ॥ ४ ॥
पृथग्दोषैः समस्तैश्च क्षतेनाप्यसृजा तथा ।
षण्णामपि हि तेषान्तु लक्षणम् संप्रवक्ष्यते ॥ ५ ॥
कृष्णोऽरुणो वाविषमो भृशमत्यर्थवेदनः ।
चिरोत्थानप्रपाकश्च विद्रधि र्वातसम्भवः ॥ ६ ॥
पक्वोडुम्बरसंकाशः श्यावो वा ज्वरदाहवान् ।
चिरोत्थानप्रपाकश्च विद्रधिः पित्तसंभवः ॥ ७ ॥
शरावसदृशः पाण्डुः शीतस्तब्धोऽल्पवेदनः ।
चिरोत्थानप्रपाकश्च सकण्डूः श्लेष्मसंभवः ॥ ८ ॥
नानावर्णरुजास्रावः घाटालो विषमो महान् ।
विषमं पच्यते चापि विद्रधिः सान्निपातिकः ॥ ९ ॥
तैस्तैर्भावैरभिहते क्षतेवाऽपथ्यसेविनः ।
क्षतोष्मा वायुविसृतः सरक्तं पित्तमीरयेत् ॥१०॥
ज्वरः तृष्णा च दाहश्च जायते तस्य देहिनः ।
एष विद्रधिरागन्तु पित्तविद्रधिलक्षणः ॥११॥
कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाकरः ॥
उक्ता विद्रधयो ह्येते तेष्वसाध्यस्तु सर्वजः ॥१२॥
आभ्यन्तरानतस्तूर्ध्वं विद्रधीन् परिचक्षते ॥
गुर्वसात्म्यविरुद्धान्नशुष्कदुर्जरभोजनात् ॥१३॥
अतिव्यवायव्यायामवेगाघातविदाहिभिः ॥
पृथक् सम्भूय वा दोषाः कुपिता गुल्मरुपिणम् ॥१४॥
वल्मीकवत्समुनद्धमन्तः कुर्वन्ति विद्रधिम् ॥
गुदे वस्तिमुखे नाभ्यां कुक्षौ वंक्षणयो स्तथा ॥१५॥
वृक्कयो र्प्लीह्नि यकृति हृदये क्लोम्नि वा तथा ।
तेषां लिंगानि जानीयाद् बाह्यविद्रधिलक्षणैः ॥१६॥
अत्रापि पूर्ववत सौम्य ! पक्वापक्व विनिर्दिशेत् ।
अधिष्ठानविशेषेण लिंगं शृणु विशेषतः ॥१७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुदे वातनिरोधस्तु वस्तौ कृच्छ्रात्पमूत्रता ॥
नाभ्यां हिक्का तथाटोपः कुक्षौ मारुतकोपनम् ॥१८॥
कटीपृष्ठग्रहस्तीव्रः वंक्षणेऽत्थे तु विद्रधौ ॥
वृक्कयोः पार्श्वसंकोचः प्लीहन्युच्छ्वासावरोधनम् ॥१९॥
सर्वाङ्गग्रहस्तीव्रो हृदि शूलश्च दारुणः ॥
श्वासो यकृति तृष्णा च पिपासा क्लोमजेऽधिका ॥२०॥
आमो वा यदि वा पक्वो महान्वा यदि चेतरः ॥
सर्वोममोत्थितश्चापि विद्रधिः कष्ट उच्यते ॥२१॥
नाभेरुपरिजाः पक्वाः यात्यूर्ध्वमितरेत्वधः ।
जीवत्यधः निस्रुतेषु स्रुतेषूर्ध्वं न जीवति ॥२२॥
हृन्नाभिवस्तिवर्ज्या ये तेषु भिन्नेषु वाह्यतः ।
जीवेत्कदाचित्पुरुषो नेतरेषु कदाचन ॥२३॥
स्त्रीणामपप्रजातानां प्रजानां तथाऽहितैः ।
दाहज्वरकरो घोरो जायते रक्तविद्रधिः ॥२४॥
अपि सम्यक् प्रजातानामसृक् कायादनिस्रुतम् ।
रक्तजं विद्रधिं कुर्यात् कुक्षौ मक्कलसंज्ञितम् ॥२५॥
सप्ताहान्नोपशान्तश्चेत् ततोऽसौ संप्रपच्यते ।
विशेषं संप्रवक्ष्यामि स्पष्टं विद्रधिगुल्मयोः ॥२६॥
तुल्यदोषसमुत्थानाद्विद्रधे गुल्मकस्य च ।
कस्मान्न पच्यते गुल्मो विद्रधिःपाकमेति च ॥२७॥
न निबन्धोऽस्ति गुल्मानां विद्रधिः सनिबन्धनः ।
गुल्माकाराः स्वयं दोषाः विद्रधिर्मांसशोणिते ।२८॥
विवरानुचरो ग्रन्थिरप्सु बुद्बुदको यथा ।
एवं प्रकारो गुल्मस्तु तस्मात्पाकं न गच्छति ॥२९॥
मांसशोणितबाहुल्यात् पाकं गच्छति विद्रधिः ।
मांसशोणितहीनत्वाद् गुल्मः पाकं न गच्छति ॥
गुल्मस्तिष्ठति दोषे स्वे विद्रधिर्मांसशोणिते ।
विद्रधिः पच्यते तस्माद् गुल्मश्चापि न पच्यते
हृन्नाभिवस्तिजः पक्वो वर्ज्यो यश्च त्रिदोषजः ।
अथ मज्जपरीपाको घोरः समुपजायते ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोऽस्थिमांसनिरोधेन द्वारं न लभते यदा ।
ततः स व्याधिना तेन ज्वलनेनेव दह्यते ।
अस्थिगज्जोष्मणा तेन शीर्यते दह्यमानवत् ।
विकारः शल्यभूतोऽयं क्लेशयेदातुरं चिरम् ॥
अथास्य कर्मणा व्याधिर्द्वारं तु लभते यदा ।
ततो मेदःप्रभं स्निग्धं शुक्लं शीतमथो गुरु ॥
भिन्नेऽस्थ्नि निःस्रवेत् पूयमेतदस्थिगतं विदुः ।
विद्रधिं शास्त्रकुशलाः सर्वदोषरुजावहम् ।

इति शल्यतन्त्रसमुच्चये षट्त्रिंशोऽध्यायः

अथसप्तत्रिंशोऽध्यायः

अथातो विद्रधिचिकित्सितं व्याख्यास्यामः ॥ १ ॥
उक्ता विद्रधयः षड् ये तेष्वसाध्यस्तु सर्वजः ।
शेषेष्वामेषु कर्तव्या त्वरितं शोफवत् क्रिया ॥ २ ॥
वातघ्नमूलकल्कैस्तु घृततैलवसायुतैः ।
सुखोष्णो वहलो लेपः प्रयोज्यो वातविद्रधौ ॥ ३ ॥
सानूपौदकमांसस्तु काकोल्यादिः सतर्पणः ।
स्नेहाम्लसिद्धो लवणः प्रयोज्यश्चोपनाहने ॥ ४ ॥
वेसवारैः सकृशरैः पयोभिः पायसैस्तथा ।
स्वेदयेत्सततं चापि निर्हरेच्चापि शोणितम् ॥ ५ ॥
स चेदेवमुपक्रान्तः पाकायाभिमुखो यदि ।
तं पाचयित्वा शस्त्रेण भिन्द्याद् भिन्नं च शोधयेत् ॥ ६ ॥
पञ्चमूलकषायेण प्रक्षाल्य लवणोत्तरैः ।
तैलैर्भद्रादिमधुकसंयुक्तैः प्रतिपूरयेत् ॥ ७ ॥
वैरेचनिकयुक्तेन त्रैवृतेन विशोध्यच ।
पृथक्पर्ण्यादिसिद्धेन त्रैवृतेनैव रोपयेत् ॥ ८ ॥
पैत्तिकं शर्करालाजामधूकैः सारिवायुतैः ।
प्रदिह्यात्क्षीरपिष्टैर्वा पयस्यैशीरचन्दनैः ॥ ९ ॥
काक्यैःशीतकषायैर्वा क्षीरैरिक्षुरसैस्तथा ।
घृतनीयघृतैर्वापि सेचयेत्शर्करायुतैः ॥ १० ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रिवृद्धरीतकीनां च चूर्णं लिह्यान्मधुद्रुतम् ।
जलौकोभि र्हरेच्चास्टक् पक्वं चापाट्य बुद्धिमान् ॥११॥
क्षीरिवृक्षकषायेण प्रक्षाल्यैादकजेन वा ।
तिलैःसयष्टिमधुकैः सक्षौद्रैः सर्पिषायुतैः ॥१२॥
उपदिह्य प्रतनुना वाससा वेष्टयेद्व्रणम् ।
प्रपौण्डरीकमंजिष्ठा मधुकोशीरपद्मकैः ॥१३॥
सहरिद्रैः कृतं सर्पिः सक्षीरं व्रणरोपणम् ।
क्षीरशुक्ला पृथक्पर्णी समंगारोध्रचन्दनैः ॥१४॥
न्यग्रोधादिप्रवालेषु तेषां त्वक्त्वथवा कृतम् ।

करंजादिघृतम् ।

नक्तमालस्य पत्राणि तरुणानि फलानि च ॥१५॥
सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा ।
द्वे हरिद्रे मधुच्छिष्टं मधुकं तिक्तरोहिणी ॥१६॥
प्रियंगुः कुशमूलञ्च निचुलस्य त्वगेव च ।
मंजिष्ठा चन्दनोशीरमुत्पलं सारिवा तृवृत् । १७॥
एतेषां कार्षिकै र्भागै र्घृतप्रस्थं विपाचयेत् ।
दुष्टव्रणप्रशमनं नाड़ीव्रणविशोधनम् ॥१८॥
सद्यश्छिन्नव्रणानां च करंजाद्यमिदं शुभम् ।
दुष्टव्रणाश्च ये केचित् ये चोत्स्टष्टक्रिया व्रणाः ॥१९॥
नाड्यो गम्भीरिका याश्च सद्यश्छिन्ना स्तथैव च ।
अग्निक्षारकृता श्चैव ये व्रणा दारुणा स्तथा ॥२०॥
करंजाद्येन हविषा प्रशाम्यन्ति न संशयः ।
इष्टिकासिकता-लोह-गोशकृत्तुषपांशुभिः ॥२१॥
मूत्रैरुष्णैश्च सततं स्वेदयेत् श्लेष्मविद्रधिम् ।
कषायपानै र्वमनै रालेपैरुपनाहनैः ॥२२॥
हरेद्दोषान भीक्ष्णं च अलाव्वास्टक् तथैव च ।
आरग्वधकषायेण पक्वं चापाट्य धावयेत् ॥२३॥
हरिद्रातृवृताशक्तुतिलै र्मधुसमायुतैः ।
पूरयित्वा व्रणं सम्यक् वर्ध्नीया त्कीर्तितं यथा ॥२४॥
तथा कुलत्थिकादन्तीतृवृच्छ्यामार्कतिल्वकैः ।
कुर्यात्तैलं सगोमूत्रं हितं तत्र ससैंधवम् । २५॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पित्तविद्रधिवत्सर्वा क्रिया निरवशेषतः ।
विद्रध्योः कुशलः कुर्याद्रक्तागन्तुनिमित्तयोः ॥२६॥
वरुणादिगणक्वाथ मपक्वेऽभ्यन्तरे स्थिते ।
ऊषकादिप्रतीवापं पिवेद्विद्रधिशान्तये ॥२७॥
एभिरेव गणैः सार्द्धं संसिद्धं स्नेहसंयुतम् ।
कार्यमास्थापनं क्षिप्रं तथैवाप्यनुवासनम् ॥२८॥
पानालेपनभोज्येषु मधुशिग्रुद्रुमोऽपि वा ।
दत्तावापो यथादोषमपक्वं हंति विद्रधिम् ॥२९॥
तोयधान्याम्लमूत्रैस्तु पेयो वापि सुरादिभिः ।
यथादोषगणक्वाथैः पिवेद्वापि शिलाजतु ॥३०॥
प्रधानं गुग्गुलुं चापि शुंठीं च सुरदारु च
स्नेहोपनाहौ कुर्याच्च सदा चाप्यनुलोमनः ॥३१॥
यथोद्दिष्टां सिरां विध्येत् कफजे विद्रधौ भिषक् ।
रक्तपित्तानिलोत्थेषु केचिद्वाहौ वदन्ति तु ॥३२॥
पक्वं वा बहिरुन्नद्धं भित्त्वा व्रणवदाचरेत् ।
स्नेतेषूर्ध्वमधो वापि मैरेयाम्लसुरासवैः ॥३३॥
पेयो वरुणकादिस्तु मधुशिग्रुद्रुमोऽपि वा ।
शिग्रुमूलजले सिद्धं ससिद्धार्थकमोदनम् ॥३४॥
यवकोलकुलत्थानां यूषैर्भुञ्जीत मानवः ।
प्रातः प्रातश्च सेवेत मात्रया तैल्वकं घृतम् ॥३५॥
वृतादिगणक्वाथसिद्धं वाप्युपशान्तये ।
नोपगच्छेद् यथा पाकं प्रयतेत तथा भिषक् ॥३६॥
पर्य्यागते विद्रधौ तु सिद्धिर्नैकान्तिकी स्मृता ।
प्रत्याख्याय तु कुर्वीत मज्जजातं हि विद्रधिम् ॥३७॥
स्नेहस्वेदोपपन्नानां कुर्याद्रक्तावसेचनम् ।
विद्रध्युक्तां क्रियां कुर्यादपक्वे वास्थि तु भेदयेत् ॥३८॥
निःशल्यमथ विज्ञाय कर्तव्यं व्रणशोधनम् ।
धावेत्तिक्तकषायेण तिक्तं सर्पिस्तथा हितम् ॥३९॥
यदि मज्जपरिस्रावो न निवर्तेत देहिनः ।
कुर्यात्संशोधनीयानि कषायादीनि बुद्धिमान् ॥४०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रियंगुश्रातकीरोध्रकट्फलं तिनि सैंधवम्
एतै स्तैलं विपक्तव्यं विद्रधित्रणरोपणम् ॥४१॥

हिध्माश्वासादिभिः यकृति विद्रधिं ज्ञात्वा त्रिकूर्चकं तत्र प्रयुञ्ज्यात् पूर्वं बलसत्त्ववर्द्धिनीं सुरां पाययित्वा चाग्रोपहरणीयोक्तं सम्भार मुपकल्प्य सत्येनासत्येन वा वचसा रोगिणमाश्वास्य सर्वविघ्नविनाशकमीश्वरं मनसा ध्यात्वा वैद्यगुणयुक्तः क्षीप्रहस्तो धीरः स्थिरचित्तो बहुशो दृष्टकर्मा भिषक् शस्त्रगुणोपेतं त्रिकूर्चकं शस्त्रं परिगृह्य, सवेदनं शोथयुतं सुलोहितं चर्म भित्त्वा चान्तः प्रवेशयेदाशु, यथा विद्रधि र्भिद्यते ॥४२॥

ततः सत्वरमेव शस्त्रं बहिर्नयेत्, परंच यत्नमास्थाय नाड़ीमपहाय तथाकार्यं यथान्तरनिलो न विशेत्; ततः शस्त्रपातवेदनातुरं रोगिणं समाश्वास्यापसव्येन पार्श्वेन शाययेत्,तत्रातसीकल्कं सक्षीरं साज्यं प्रलेपयेत् ततः परं क्षीरै र्मांसरसै रुपक्रमेत् ॥४३॥

इति शल्यतन्त्रसमुच्चये सप्तत्रिंशोऽध्यायः

अथाष्टात्रिंशोऽध्यायः

अथातो विसर्प-नाड़ी-स्तनरोग-निदानं व्याख्यास्यामः ॥१॥
त्वङ्मांसशोणितगताः कुपितास्तु दोषाः ।
सर्वाङ्गसारिणमिहास्थितमात्मलिङ्गं ॥
कुर्वन्ति विस्तृतमनुन्नतमाशु शोफम् ।
तं सर्वतो विसरणाच्च विसर्पमाहुः ॥२॥
वातात्मको ऽसितमृदुः परुषोऽङ्गमर्दः-
संभेदतोदपवनज्वरलिंगयुक्तः ।
गण्डै र्यदा तु विषमै रतिदूषितत्वाद् ।
युक्तः स एव कथितः खलु वर्जनीयः ॥३॥
पित्तात्मको द्रुतगमिर्ज्वरदाहपाक-
स्फोटप्रभेदबहुलः क्षतजप्रकाशः ॥
दोषप्रवृद्धिहतमांसशिरो यदा स्यात् ।
स्रोतोजकर्दमनिभो न तदा स सिध्येत् ॥४

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्लेष्मात्मकः सरति मन्दमशीघ्रपाकः ।
स्निग्धः सितश्वयथुरल्परुगुग्रकण्डूः ॥
सर्वात्मकस्त्रिविधवर्णरुजोऽवगाढ़ः ॥
पक्वो न सिध्यति च मांसशिराप्रणाशात् ५॥
सद्यः क्षतव्रणमुपेत्य नरस्य पित्तं ।
रक्तं च दोषबहुलस्य करोति शोफम् ॥
श्यावं सलोहितमतिज्वरदाहपाकम् ।
स्फोटैः कुलत्थसदृशैरसितैश्च कीर्णम् । ६॥
सिद्ध्यन्ति वातकफपित्तकृता विसर्पाः ।
सर्वात्मकः क्षतकृतश्च न सिद्धिमेति ॥
पैत्तानिलावपि च दर्शितपूर्वलिंगौ ।
सर्वेच मर्मसु भवन्ति हि कृच्छ्रसाध्याः ॥ ७ ॥
शोफं न पक्वमिति पक्वमुपेक्षतेऽज्ञो ।
यो वा व्रणं प्रचुरपूयमसाधुवृत्तः ॥
अभ्यन्तरं प्रविशति प्रविदार्य तस्य ।
स्थानानि पूर्वविहितानि ततः स पूयः ॥ ८ ॥
तस्यातिमात्रगमनाद्गतिरित्यतश्च ।
नाडीव यद्वहति तेन मता तु नाड़ी ॥
दोषैस्त्रिभि र्भवति सा पृथगेकशश्च ।
सम्मूर्च्छितैरपिच शल्यनिमित्ततोऽन्या ॥९ ॥
तत्रानिलात् परुषसूक्ष्ममुखी सशूला ।
फेनानुविद्धमधिकं स्रवति क्षपासु ।
तृट्तापतोदसदनज्वरभेदहेतुः ॥
पीतं स्रवत्यधिकमुष्णमहस्सु चापि ॥१०॥
ज्ञेया कफाद् बहुघनार्जुनपिच्छिलास्रा ।
रात्रिस्तु तिः स्तिमितरुक् कठिना सकण्डुः ॥
दोषद्वयाभिहितलक्षणदर्शनेन ।
तिस्रो गती र्व्यतिकरप्रभवास्तु विद्यात् ॥११॥
दाहज्वरश्वसनमूर्छनवक्त्रशोषाः ।
यस्यां भवन्त्यभिहितानि च लक्षणानि ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तामादिशेत् पवनपित्तकफप्रकोपात् ॥
घोरामशुद्धयकरीमिव कालरात्रिम् ॥१२॥
नष्टं कथंचिदनुमार्गमुदीरितेषु ।
स्थानेषु शल्यमचिरेण गतिं करोति ॥
सा फेनिलं मथितमच्छमसृग्विमिश्रं ।
चोष्णं स्रवेत सहसा सरुजा तु नित्यम् ॥१३॥
यावत्यो गतयो यैश्च कारणैः संभवन्तिहि ।
तावन्तः स्तनरोगाः स्युः स्त्रीणां तैरेवहेतुभिः ॥१४॥
धमन्यः सम्वृतद्वाराः कन्यानां स्तनसंश्रिताः ।
दोषाविसरणात् तासां न भवन्ति स्तनामयाः ॥१५॥
तासामेव प्रजातानां गर्भिणीनां च ताः पुनः ।
स्वभावादेव विवृता जायन्ते सम्भवन्त्यतः ॥१६॥
सक्षीरो वाप्यदुग्धो वा प्राप्य दोषः स्तनौ स्त्रियाः ॥
रक्तं मासं च संदुष्य स्तनरोगाय कल्पते ॥१७॥
पञ्चानामपि तेषान्तु हित्वा शोणितविद्रधिम् ।
लक्षणानि समानानि वाह्यविद्रधिलक्षणैः ॥१८॥

इति शल्यतन्त्रसमुच्चये ऽष्टत्रिंशोऽध्यायः

अथैकोनचत्वारिंशोऽध्यायः

अथातो विसर्पनाड़ीस्तनरोगचिकित्सितं व्याख्यास्यामः ॥ १ ॥
साध्या विसर्पा स्त्रय आदितो ये ।
न सन्निपातक्षतजौ हि साध्यौ ॥
साध्येषु तत्पथ्यगणैर्विदध्यात् ।
घृतानि सेकांश्च तथोपदेहान् ॥ २ ॥
मुस्ता शताह्वा सुरदारु कुष्ठं ।
वाराहिकुस्तुम्बुरुकृष्णगंधाः ॥
वातात्मके चोष्णगणाः प्रयोज्याः ।
सेकेषु लेपेषु तथाश्रृतेषु ॥ ३ ॥
यत्पञ्चमूलं खलु कण्टकाख्यं ।
अल्पं महच्चाप्यथ वह्निजं च ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust, Funding IKS-MoE-Grant-2

तत्रोपयोज्यं भिषजा प्रदेहे ।
सेके घृते चापि तथैव तैले ॥ ४ ॥
कसेरुशृङ्गाटक पद्म गुंद्रा ।
सशैवलाः सोत्पलकर्दमाश्च ॥
वस्त्रान्तराः पित्तकृते विसर्पे ।
लेपा विधेयाः सघृताः सुशीताः ॥ ५
ह्रीवेरलामज्जकचन्दनानि ।
स्रोतोजमुक्तामणिगैरिकाश्च ॥
क्षीरेण पिष्टाः सघृताः सुशीताः ।
लेपाः प्रयोज्या स्तनवः सुखाय ६ ॥

प्रपौण्डरीकं मधुकं पयस्या मंजिष्ठिका पद्मकचन्दने च ।
सुगंधिका चेति सुखाय लेपाः पैत्ते विसर्पे भिषजा प्रयोज्या ॥७॥
न्यग्रोधवर्गैः परिषेचनच्च घृतं च कुर्यात् स्वरसेन तस्य ।
शीतैः पयोभिश्च मधूदकैश्च सशर्करै रिक्षुरसैश्च सेकान ॥८॥

गौर्यादिघृतम्

घृतस्य गौरीमधुकारविन्दरोध्राम्बुराजादनगैरिकेषु ।
तथार्षभे पद्मकसारिवासु काकोलिमेदाकुमुदोत्पलेषु ॥ ९ ॥
सचन्दनायां मधुशर्करायां द्राक्षास्थिराप्रश्निशताह्वयासु ।
कल्कीकृतासूदकमत्र दत्त्वा न्यग्रोधवर्गस्य तथा स्थिरादेः ॥१० ।
गणस्य विल्वादिकपञ्चमूल्या चतुर्गुणं क्षीरमथापि तद्वत् ।
प्रस्थं विपक्वं परिषेचनेन पैत्तीर्निहन्यात्तु विसर्पनाड़ी ॥११॥
विस्फोटदुष्टव्रणशीर्षरोगान् पाकं तथास्यस्य निहन्तिपानात् ।
ग्रहार्दिते शोषिणि चापि वाले घृतं हि गौर्यादिकमिष्टमेतत् ॥१२॥
अजाश्वगंधा सरला सकाला सैकैषिका चाप्यथवाजशृङ्गी ।
गोमूत्रपिष्टो विहितः प्रदेहो हन्याद्विसर्पं कफजं सशीघ्रम् ॥१३ ।
कालानुसार्यागुरुचोचगुंजा रास्नावचाशीतशिवेन्द्रपर्ण्यः ।
पालिंदिमुंजातमहीकदम्बा हिता विसर्पेषु कफात्मकेषु ॥१४॥

गणस्तु योज्यो वरुणप्रवृत्तः ।
क्रियासु सर्वासु विचक्षणेन ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संशोधनं शोणितमोक्षणं च ।
श्रेष्ठं विसर्पेषु चिकित्सितं हि ॥१५॥
सर्वा श्च पक्वान् परिशोध्य धीमान् ।
व्रणक्रमेणोपचरेद्यथोक्तम् ।
नाड़ी त्रिदोषप्रभवा न सिध्येत् शेषा श्चतस्रः प्रतियत्नसाध्याः ॥१६॥
तत्रानिलोत्थामुपनाह्य पूर्व- ।
मशोषतः पूयगतिं विदार्य ॥
तिलै रपामार्गफलै श्च पिष्टं ।
ससैंधवै र्वन्धनमत्र कुर्यात् ॥१७॥
प्रक्षालने चापि सदा व्रणस्य ।
योज्यं महद्यत् खलु पञ्चमूलम् ॥
हिस्रां हरिद्रां कटुकां वलाञ्च ।
गोजिह्विकां चापि सविल्वमूलाम् ॥१८॥
संहृत्य तैलं विपचेद् व्रणस्य संशोधनं पूरणरोपणञ्च ।
पित्तात्मिकां प्रागुपनाह्य धीमान् ।
उत्कारिकाभिः सपयोघृताभिः ॥१९॥
निपात्य शस्त्रं तिलनागदन्ती ।
यष्ट्याह्वकल्कैः प्रतिपूरयेत्ताम् ॥
प्रक्षालने चापि ससोमनिम्बा निशा प्रयोज्या कुशलेन नित्यम् ॥२०॥
श्यामा त्रिभण्डी त्रिफला-सुसिद्ध हरिद्रयो रोध्रकवृक्षयोश्च ।
घृतं सदुग्धं व्रणतर्पणेन हन्याद्गतिं कोष्ठगतापि या स्यात् ॥२१॥
नाडीं कफोत्था मुपनाह्य सम्यक् कुलत्थ-सिद्धार्थकशकृतुकिण्वैः ।
मृदुकृतामेष्य गतिं विदित्वा निपातये च्छस्त्रमशेषकारि ॥२२॥
दद्याद् व्रणे निम्वतिला न्सुपिष्टान् सुराष्ट्जासैंधवसंप्रयुक्तान् ।
प्रक्षालने चापि करंज-निम्ब-जात्यर्क-पीलु-स्वरसाः प्रयोज्याः ॥२३॥
सुवर्चिका-सैंधव-चित्रकेषु निकुम्भतालीतल-रूपीकासु ।
फलेष्वपामार्गभवेषु चैव कुर्यात्समूत्रेषु हिताय तैलम् ॥२४॥
नाडीं तु शल्यप्रभवां विदार्य निर्हृत्य शल्यं प्रविशोध्य मार्गम् ।
संशोधयेत क्षौद्रघृतप्रगाढै स्तिलै स्ततो रोपणमस्य कुर्यात् ॥२५॥
कुम्भीक-खर्ज्जूर-कपित्थ-विल्व-वनस्पतीनां च शलाटुवर्गे ।
कृत्वा कषायं विपचेत्तु तैलं चावाप्य मुस्तासरलाप्रियंगूः ॥२६॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुगंधिकामोचरसाहिपुष्पं रोध्रं विदध्यादथ धातकीञ्च ।
एतेन शल्यप्रभवा च नाड़ी रोहेद् व्रणो वा सुखमाशु चैव ॥२७॥

कृशदुर्बलभीरुणां नाड़ी मर्माश्रिता च या ।
क्षारसूत्रेण तां छिंद्यान्नतु शस्त्रेण बुद्धिमान् ॥२८॥
एषणया गतिमन्विष्य क्षारसूत्रानुसारिणीम् ।
सूचीं निदध्याद् गत्यन्ते तथान्यम्याशु निर्हरेत् ॥२९॥
सूत्रस्यान्तं समानीय गाढं बंधं समाचरेत् ।
ततः क्षारवलं वीक्ष्य सूत्रमन्यत्प्रवेशयेत् ॥३०॥
क्षाराक्तं मतिमा न्वैद्यो यावन्न क्लिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्यो वैद्येन जानता ॥३१॥
अर्बुदादिषु चोत्क्षिप्य मूले सूत्रं निधापयेत् ।
सूचीभि र्यववक्त्राभि राचितं वा समन्ततः ॥३२॥
मूले सूत्रेण बध्नीयात् छिन्ने चोपचरेत् व्रणम् ।

या द्विव्रणीयेऽभिहिता स्तु वर्त्म स्ताः सर्वनाडीषु भिषक् विदध्यात् ।
धोएटाफलत्वग्लवणानि लाक्षा-पूगीफलं याऽलवणं च पत्रम् ॥३३॥
स्नुह्यर्कदुग्धेन च कल्क एष वर्तीकृतो हन्त्यचिरेण नाड़ीः ।
विभीतकाम्रास्थिवटप्रवाला हरेणुका शंखिनीबीजमस्य ॥३४॥
वाराहिकंन्दश्च तथा प्रदेयो नाड़ीषु तैलेन च मिश्रयित्वा ॥३५॥
धुस्तूरजं मदनकोद्रवजञ्च बीजं कोशातकी शुकनसा मृगभोजनी च ।
अंकोटबीजकुसुमं गतिषु प्रयोज्यं लाक्षोदकाहृतमलासु विकृत्य चूर्णम् ।३६।
तथा च गोमांसमसी हिताय कोष्ठाश्रितस्यादरतो दिशन्ति ।
वर्तीकृतं माक्षीकसम्प्रयुक्तं नाडीघ्नमुक्तं लवणोत्तमं वा ॥३७॥
दुष्टव्रणे यद्विहितन्तु तैलं तत्सर्वनाड़ीषु भिषग् विदध्यात् ।
चूर्णीकृतै रथ विमिश्रितमेभिरेव तैलं प्रयुक्तमचिरेण गतिं निहन्ति ॥३८॥
एष्वेव मूत्रसहितेषु विधाय तैलं तत्साधितं गतिमपोहति सप्तरात्रात् ।
पिण्डीतकस्य तु वराहविभावितस्य मूलेषु कंदशकलेषु च सैवहेषु ॥३९॥
तैलं कृतं गतिमपोहति शीघ्रमेतत् ।

कन्देषु चामरवरायुधसाह्वयेषु ॥
भल्लातकार्कमरिचै र्लवणोत्तमेन ।
सिद्धं विडंगरजनीद्वयचित्रकैश्च ॥४०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यान्मार्कवस्य च रसेन निहन्ति तैलं नाडीं कफानिलकृतामपचीं व्रणांश्च
स्तन्ये गते विकृतमाशु भिषक् तु धात्रीं ।
पीतां घृतं परिणतेऽहनि वामयेत्तु ॥४१॥
निम्बोदकेन मधुमागधिकायुतेन वान्तागतेऽहनि च मुद्गरसाशना स्यात् ।
एवं त्र्यहं चतुरहं षड्हं वमेद्वा सर्पिः पिबेत् त्रिफलया सह संयुतम्वा ॥४२॥
भार्गीं वचामतिविषां सुरदारुपाठां मुस्तादिकं मधुरसां कटुरोहिणीं च ।
धात्रीपिबेत्तु पयसः परिशोधनार्थमारग्वधादिषु वरं मधुना कषायम् ॥४३॥
सामान्यमेतदुपदिष्टमतो विशेषात् दोषान्न्यथोनिपतितान् शमयेद्यथास्वं ॥४४॥
रोगं स्तनोत्थितमवेक्ष्य भिषग्विदध्यात् यद्विद्रधावभिहितं बहुशो विधानम् ।
सम्पच्यमानमपि तं तु विनोपनाहैः सम्भोजनेन खलु पाचयितुं यतेत ॥४५॥
शीघ्रं स्तनो हि मृदुमांसतयोपनद्धः सर्वं प्रकोपमुपयात्यवदीर्यते च ।
पक्वे च दुग्धहरिणीः परिहृत्य नाडीः कृष्णं च चूचुकयुगं विदधीत शस्त्रम् ॥४६॥
आमे विदाहिनि तथैवगते च पाके धात्र्याः स्तनौ सततमेव च निर्दृहीतं ॥४७॥

इति शल्यतन्त्रसमुच्चयेचैकोनचत्वारिंशोऽध्यायः

चत्वारिंशोऽध्यायः

अथातो ग्रंथ्यपच्यर्बुदगलगण्डविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

वातादयो मांसमसृक् प्रदुष्टाः ।
संदुष्य मेदश्च कफानुविद्धम् ॥
वृत्तोन्नतं विग्रथितं च शोफम् ।
कुर्वन्त्यतोग्रन्थिरितिप्रदिष्टः ॥२॥

आयम्यते व्यथ्यत एतितोदं प्रत्यस्यते कृत्यत एतिभेदम् ।
कृष्णो मृदु र्वस्ति रिवाततश्च भिन्नः स्रवेच्चानिलजो ऽस्रमच्छम् ॥३॥
दन्दह्यते धूप्यति चोष्मवांश्च पाप्यते प्रज्वलतीव चापि ।
रक्तः सपीतो ऽप्यथवापि पित्ताद् भिन्नः स्रवेदुष्णमतीव चास्रम् ॥४॥
शीतो विवर्णोऽल्परुजो ऽतिकण्डूः पाषाणवत्संहननोपपन्नः ।
चिराभिवृद्धिश्च कफप्रकोपाद् भिन्नः स्रवेदघ्नमतीव चास्रम् ॥५॥
शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महानल्परुजो ऽतिकण्डुः ।
मेदः कृतो गच्छति चाल्प भिन्ने पिण्याकसर्पिः प्रतिमं तु मेदः ॥६॥
व्यायामजातै रवलस्य तैस्तै राक्षिप्य वायु र्हि शिराप्रतानम् ।
सम्पीड्य संकोच्य विशोष्य चापि ग्रंथिं करोत्युन्नतमाशु वृत्तम् ॥७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रंथिः सिराजः स तु कृच्छ्रसाध्यः भवेद्यदि स्यात्सरुज श्चलश्च ।
अरुक् स एवाप्यचलो महांश्च मर्मोत्थितश्चापि विवर्जनीयः ॥८॥
हन्वस्थि-कक्षा-चुक-वाहु-संधि-मन्या-गलेष्वपचितं तु मेदः ।
ग्रंथिं स्थिरं वृत्तमथायतं वा स्निग्धं कफश्चाल्परुजं करोति ॥९॥
तं ग्रंथिभि श्चामलकास्थिमात्रै र्मत्स्यांडजालप्रतिमैस्तथान्यैः ।
अनन्यवर्णैं रुपचीयमानं चयप्रकर्षादपचीं वदन्ति १०॥
कण्डूयुता स्तेऽल्परुजः प्रभिन्नाः स्रवन्ति नश्यन्ति भवन्ति चान्ये ।
मेदः कफाभ्यां खलुरोग एष सुदुस्तरो वर्षगणानुवंधी ॥११॥
गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमभि प्रदुष्य ।
वृत्तं स्थिरं मंदरुजं महान्त मनल्पमूलं चिरवृद्ध्यपाकम् ॥१२॥
कुर्वन्ति मांसोच्छ्रमत्यगाधं तदर्बुदं शास्त्रविदो वदन्ति ।
वातेन पित्तेन कफेन चापि रक्तन मांसेन च मेदसा वा ॥१३॥
तज्जायते तस्य च लक्षणानि ग्रंथेः समानानि सदा भवंति ।
दोषः प्रदुष्टः रुधिरं शिरास्तु संपीड्य संकोच्य गतस्तु पाकम् ॥१४॥
सास्रावमुन्नह्यति मांसपिण्डं मांसांकुरैराचितमाशुवृद्धिम् ।
स्रवत्यजस्रं रुधिरं प्रदुष्टमसाध्यमेतद् रुधिरात्मकं तु ॥१५॥
रक्तक्षयोपद्रवपीडितत्वात् पाण्डुं भवेदर्बुदपीडितस्तु ।
मुष्टिप्रहारादिभिरर्दितेऽङ्गे मांसं प्रदुष्टं जनयेद्धि शोथम् ॥१६॥
अवेदनं स्निग्धमनल्पवर्णमपाकमश्मोपममप्रचाल्यम् ।
प्रदुष्टमांसस्य नरस्य वाढ़मेतद् भवे न्मांसपरायणस्य ॥१७॥
मासार्बुदं त्वेतदसाध्यमुक्तं साध्येष्वपीमानि विवर्जयेत्तु ।
संप्रस्तुतं मर्मणि यच्चजातं स्रोतस्सु वा यच्च भवेदचाल्यम् ॥१८॥
यज्जायतेऽन्यत् खलु पूर्वजाते ज्ञेयं तदध्यर्बुदमर्बुदज्ञैः ।
यद् द्वन्दजातं युगपत् क्रमाद्वा द्विरर्बुदं तच्च भवेदसाध्यम् ॥१९॥
न पाकमायान्ति कफाधिकत्वा न्मेदोहुरुत्वाच्च विशेषतस्तु ।
दोषस्थिरत्वात् ग्रथनाच्च तेषां सर्वार्बुदान्येव निसर्गतस्तु ॥२०॥
वातः कफश्चैव भृशं प्रवृद्धौ मन्ये तु संश्रित्य तथैव मेदः ।
कुर्वन्ति गण्डं क्रमशः स्वलिंगैः समन्वितं तं गलगण्डमाहुः ॥२१॥
तोदान्वितः कृष्णसिरावनद्धः श्यावोऽरुणो वा पवनात्मकस्तु ।
मेदोऽन्वित श्चोपचित च कालाद् भवेदतिस्निग्धतरोऽरुजश्च ॥२२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पारुष्ययुक्तश्चिरवृद्ध्यपाको यदृच्छया पाकमियात्कदाचित् ।
वैरस्यमास्यस्य च तस्य जन्तो र्भवेत्तथातालुगलप्रशोषः ॥२३॥
स्थिरः सवर्णोऽल्परुगुग्रकण्डुः शीतो महांश्चापि कफात्मकस्तु ।
चिराभिवृद्धिं कुरुते चिराद्धा प्रपच्यते मन्दरुजः कदाचित् ॥२४॥
माधुर्यमास्यस्य च तस्य जन्तो र्भवेत्तथा तालुगलप्रलेपः ।
स्निग्धो मृदुः पाण्डुरनिष्टगंधो मेदःकृतो नीरुगथातिकण्डूः ॥२५॥
प्रलम्बतेऽलाबुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः ।
स्निग्धास्यता तस्य भवेच्च जन्तो र्गलेन शब्दं कुरुते च नित्यम् ॥२६॥
कृच्छ्रात् श्वसन्तं मृदुसर्वगात्रं संवत्सरातीतमरोचकार्तम् ।
क्षीणं च वैद्यो गलगण्डिनं तं भिन्नस्वरं चैव विवर्जयेत्तु ॥२७॥

निबद्धः श्वयथु र्यस्य मुष्कवल्लम्बते गले ।
महान्वा यदि वा ह्रस्वस्तं गण्डमिति निर्दिशेत् ॥२८॥

इति शल्यतन्त्रसमुच्चये चत्वारिंशोऽध्यायः

अथैकचत्वारिंशोऽध्यायः

अथातो ग्रन्थ्यपच्यर्बुदगलगण्डचिकित्सितंव्याख्यास्यामः ॥१॥
ग्रन्थिष्वथामेषु भिषग् विदध्यात् शोफक्रियायां विहितं विधिज्ञः ।
क्षेद् बलं चापि नरस्य नित्यं तद्रक्षितं व्याधिबलं निहन्ति ॥२॥
घृतं पिबेत्सर्पिरथो द्वयं वा दत्वा वसां वा तृवृतं पिबेद्वा ।
अपेहिवातादशमूलसिद्धं वैद्य श्चतुःस्नेहमथो द्वयं वा ॥३॥
हिस्रा थरोहिण्यमृता च भार्गी श्योनाकबिल्वागुरुकृष्णगंधाः ।
गोजी च पिष्टा सहतालपत्र्या ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥४॥
स्वेदोपनाहान् विविधांश्च कुर्या त्तथा प्रसिद्धानपरांश्च लेपान् ।
विदार्य वा पक्वमपोह्य पूयं प्रक्षाल्य बिल्वार्कनरेन्द्रतोयैः ॥५॥
तिलैः सपञ्चांगुलपत्रमिश्रैः संशोधयेत् क्षौद्रघृतप्रयुक्तैः
शुद्धं व्रणं वाप्युपरोपयेयु स्तैलेन रास्नासरलान्वितेन ॥६॥
विडंगयष्टिमधुकामृताभिः सिद्धेन वा क्षीरसमन्वितेन ।
जलौकसः पित्तकृते हितास्तु क्षीरोदकाभ्यां परिषेचनं च ॥७॥
काकोलीवर्गस्य च शीतलानि पिबेत्कषायाणि सशर्कराणि ।
द्राक्षारसेनेक्षुरसेन वापि चूर्णं पिबेच्चापि हरीतकीनां ॥८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मधूकजम्ब्वर्जुनबेतसानां त्वग्भिः प्रदेहानवचारयेच्च ।
सशर्करैर्वा तृणशून्यकन्दैर्दिह्यादभीक्ष्णं मुचकुन्दजैर्वा ॥९॥
विदार्य वा पक्वमपोह्य पूयं धावेत्कषायेण वनस्पतीनां ।
तिलैः सयष्टिमधुकैर्विशोध्य सर्पिः प्रयोज्यं मधुरैर्विपक्वं ॥१०॥
हृतेषु दोषेषु यथानुपूर्व्या ग्रंथौ भिषक् श्लेष्मसमुत्थिते तु ।
स्विन्नस्य विम्लापनमेव कुर्यात् अंगुष्ठलोहोपलवेणुदण्डैः ॥११॥
विकंकतारग्वधकाकणन्ति-काकादनीतापसवृक्षमूलैः ॥
आलेपयेत् पिण्डफलार्कभार्गी-करंजकालामदनैश्च विद्वान् ॥१२॥
अमर्मयातं शममप्रयातमपक्वमेवापहरेद्विदार्य ॥
दहेत् स्थिते वासृजि सिद्धकर्मा सद्यःक्षतोक्तं च विधिं विदध्यात् ॥१३॥
या मांसकन्द्यः कठिना वृहत्य स्तास्वेव योज्यश्च विधि विधिज्ञैः ॥
शस्त्रेण वा पाट्य विपक्वमाशु प्रक्षालयेत् पथ्यतमैः कषायैः ॥१४॥

शस्त्रेणवापाट्य इति ग्रन्थिरोगेषु तत्स्थानमापाट्य लसीकाग्रंथि निस्कास्य च निम्नलिखितविधिभिः कर्म कुर्यादिति ।

संशोधनै स्तं च विशोधयेयुः क्षारोत्तरैः क्षौद्रघृतप्रगाढैः ॥
शुद्धे च तैलमवचारणीयम् विडंगपाठारजनीविपक्वम् ॥१५॥
भेदः समुत्थे तिलकल्कदिग्धं दत्त्वोपरिष्टाद् द्विगुणं पटान्तं ॥
हुताशतप्तेन मुहुः प्रमृज्यात् लोहेन धीमान्दहनं हिताय ॥१६॥
प्रलिप्य दार्वीमथ लाक्षया वा प्रतप्तया स्वेदनमस्य कुर्यात् ॥
निपात्य वा शस्त्रमपोह्य मेदो दहेत्सुपक्वं त्वथवा विदार्य ॥१७॥
प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः सुवर्चिकाद्यैर्हरितालमिश्रैः ।
ससैंधवैः क्षौद्रघृतप्रगाढैः क्षारोत्तरै रेनमभिप्रशोध्य ॥१८॥
तैलं विदध्याद् द्विकरंजगुंजावंशत्वलेखेङ्गदमूश्रसिद्धम् ॥
जीमूतकैः कोशवतीफलैश्च दन्तीद्रवन्तीतृवृतासु चैव ॥१९॥
सर्पिःकृतं हन्त्यपचीं प्रवृद्धां द्विधाप्रवृत्तन्तदुदारवीर्यम् ॥
निर्गुण्डीजातिवरिहिष्ठयुक्तं जीमूतकं माक्षिकसैंधवाढ्यम् ॥२०॥
अभिप्रतप्तं वमनं प्रगाढं दुष्टापचीपूत्तममादिशन्ति ॥
कैटर्यविम्वीकरवीरसिद्धं तैलं हितं मूर्धविरेचनञ्च ॥२१॥
शाखोटकस्य स्वरसेन सिद्धं तैलं हितं नस्यविरेचनेषु ।
मधूकसारश्च हितोऽवपीडे फलानि शिग्रोःखरमंजरीर्वा ॥२२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रंथीनमर्मप्रभवानपक्कान् उद्धृत्य चाग्निं विदधीत पश्चात् ।
क्षारेण वापि प्रतिसारयेत्तु संलिख्य शस्त्रेण यथोपदेशम् ॥२३॥
पार्ष्णिं प्रति द्वादशचांगुलानि मीत्वेन्द्रवस्तिं परिवर्ज्य धीमान् ।
विदार्य मत्स्याण्डनिभानि वैद्यो निष्कृष्य जालान्यनलं विंदध्यात् ॥२४॥
आगुल्फकर्णात्सुमितस्य जन्तो स्तस्याष्टभागं खलकाद् विभज्य ।
घोणर्जुवेधः सुरराजवस्ते हित्वाक्षिमात्रं त्वपरे वदन्ति ॥२५॥

मणिबंधोपरिष्टा द्वा कुर्याद्रेखात्रयं भिषक् ।
अंगुल्यन्तरितं सम्यगपचीनां निवृत्तये ॥२६॥

चूर्णस्य काले प्रचलाककाकगोधाद्विकूर्मप्रभवां मसीन्तु ।
दद्याच्च तैलेन सहैंगुदीनां यद्वच्यते श्लीपदीनां च तैलम् ॥२७॥
विरेचनं धूममुपाददीत भवेच्च नित्यं यवमुद्गभोजी ।
कर्कारुकैर्वारुकनारिकेलपियालपंचांगुलवीजचूर्णैः ॥२८॥
वातार्बुदं क्षीरघृतांम्बुसिद्धैरुष्णैः सतैलैः रुपनाहयेत्तु ।
कुर्याच्च मुख्यान्युपनाहनानि सिद्धैश्च मांसैरथ वेसवारैः ॥२९॥
स्वेदं विदध्यात् कुशलस्तु नाड्यां शृंगेण रक्तं वहुशो हरेच्च ।
वातघ्ननिर्यूहपयोऽम्लभागैः सिद्धं शताख्यं तृवृतं पिवेद्वा ॥३०॥
स्वेदोपनाहा मृदवस्तु पथ्याः पित्तार्बुदे कायविरेचनं च ।
विघृष्य चोडुम्बरशाकगोजीपत्रैः मृशं क्षौद्रयुतैः प्रलिम्पेत् ॥३१॥
श्लक्ष्णीकृतैः सर्जरसप्रियंगूपत्तंगरोध्रांजनयष्टिकाह्वैः
विस्राव्य चारग्वधगोजीसोमा श्यामा च येाज्या कुशलेन लेपे ॥३२॥
श्यामागिरिह्वांजनकीरसेषु द्राक्षारसे सप्तलिकारसे च ॥
घृतं पिवेत् क्लीतकसंप्रसिद्धं पित्तार्बुदीतजठरी च जन्तुः ॥३३॥
शुद्धस्य जन्तोः कफजेऽर्बुदे तु रक्तेऽवसिक्ते तु ततोऽर्बुदं तत् ॥
द्रव्याणि यान्यूर्ध्वमधश्च दोषान् हरन्ति तैः कल्ककृतैः प्रदिह्यात् ॥३४॥
कपोतपारावतविड्विमिश्रैः स कांस्यनीलैः शुकलांगलाख्यैः ॥
मूत्रैस्तुकाकादनी मूलमिश्रैः क्षारप्रदिग्धै रथवा प्रदिह्यात् ॥३५॥
निष्पावपिण्याककुलत्थकल्कैर्मासप्रगाढै र्दधिमस्तुयुक्तैः ॥
लेपं विदध्यात् कृमयो यथात्र मूर्छन्ति मुञ्चंत्यथमक्षिकाश्च ॥३६॥
अल्पावशिष्टे कृमिभिः कृते च लिखेत्ततोऽग्निं विदधीत पश्चात् ॥
यदल्पमूलं त्रपुताम्रसीसपट्टैः समावेष्टय तदायसैर्वा ॥३७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षाराग्निशस्त्राण्यसकृद् विदध्यात् प्राणानहिंसन् भिषगप्रमत्तः ॥
आस्फोतजातीकरवीरपत्रैः कषायमिष्टं व्रणशोधनार्थम् ॥३८॥
शुद्धे च तैलं विदधीत भार्गी-विडंगपाठात्रिफलाविपक्वम् ॥
यदृच्छया चोपगतानि पाकं पाकक्रमेणोपचरेद्विधिज्ञः ॥३९॥
मेदोऽर्बुदं स्विन्नमथो विदार्य विशोध्य सीव्येद् गतरक्तमाशु ॥
ततोहरिद्रागृहधूमरोध्रपतंगचूर्णैः समनःशिलाळैः ॥४०॥
व्रणं प्रतिग्राह्य मधुप्रगाढैः करंजतैलं विदधीत शुद्ध ॥
सशेषदोषाणि हि येऽर्बुदानि करोति तान्याशु पुनर्भवन्ति ॥४१॥
तस्मादशेषाणि समुद्धरेत्तु हन्युःसशेषाणि यथा हि वह्निः ।
संस्वेद्य गण्डं पवनोत्थमादौ नाड्यानिलघ्नौषधपत्रभंगैः ॥४२॥
अम्लैः समूत्रैर्विविधैः पयोभिरुष्णैः सतैलैः पिशितैश्च विद्वान् ।
विस्रावयेत् स्विन्नमतन्द्रितश्च शुद्धं व्रणं चाप्युपनाहयेत्तु ॥४३॥
शणातसीमूलकशिग्रुकिण्वप्रियालमज्जानुयुतैस्तिलैस्तु ।
कालामृताशिग्रुपुनर्नवार्कगजादिनामाकरहाटकुष्ठैः ॥४४॥
एकैषिकावृक्षक-तिल्वकैश्च सुराम्लपिष्टैः रसकृद् विदिह्यात् ।
तैलं पिवेच्चामृतवल्लिनिम्बहंसाह्वयावृक्षकपिप्पलिभिः ॥४५॥
सिद्धं वलाभ्यां च सदेवदारु हिताय नित्यं गलगण्डरोगे ।
स्वेदोपनाहैः कफसम्भवं तु संस्वेद्य विस्रावणमेव कुर्यात् ॥४६॥
ततोजगंधातिविषाविशल्या विषाणिकाकुष्ठ-शुकाह्वयाभिः ।
पलाशभस्मोदकपेषिताभिः दिह्यात्सगुंजाभि रशीतलाभिः ॥४७॥
दशार्द्धसंख्यैर्लवणैश्च युक्तं तैलं पिवेन् मागधिकादिसिद्धम् ।
प्रच्छर्दनं मूर्धविरेचनं च धूमश्च वैरेचनिको हितस्तु ॥४८॥
पाकक्रमो वापि सदा विधेयो वैद्येन पाकंगतयोः कथंचित् ।
कटुत्रिकत्रैद्रयुताः समूत्राः भक्ष्या यवान्नानि रसाश्च मौद्गाः ॥४९॥
सशृंगवेरः सपटोलनिम्बो हिताय देयो गलगण्डरोगे ।
मेदःसमुत्थे तु यथोपदिष्टां विध्येत् सिरां स्निग्धतनोर्नरस्य ॥५०॥
श्यामासुधालोहपुरीषदन्तीरसांजनैश्चापि हितः प्रदेहः ।
मूत्रेण वालोड्य हिताय सारं प्रातः पिवेत् शालमहीरुहाणाम् ॥५१॥

इति शल्यतन्त्रसमुच्चये, एकचत्वारिंशोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ द्विचत्वारिंशोऽध्यायः

अथातोवृद्ध्युपदंशश्लीपदवृद्धिरंगविज्ञानीयाध्यायं व्याख्यास्यामः १

वातपित्तकफरक्तकारणात् मूत्रमेदसतथान्त्रभेदतः ।
वृद्धयस्त्वभिहिता भिषग्भरै र्लक्षणं शृणुत सौम्य ! विस्तरात् ॥२॥
तासां मूत्रान्त्रजे वृद्धी वातहेतू सदा मते ।
वातकोपे तयोश्चैव कारणं पृथगास्थितम् ॥ ३ ॥
अधःकोपं गतो दोषः फलकोषाभिवाहिनीः ।
प्रपीड्य धमनी वृद्धिं करोति फलकोषयोः ॥ ४ ॥
भविष्यतीनां सन्तानां पूर्वरूपं निशामय ।
मेढ्रमुष्ककटीवस्तिवेदनावातनिग्रहः ॥ ५ ॥
फलकोषाभिशोफश्च सज्वरो विज्वरोऽथवा ।
तत्रानिलपरिपूर्णा वस्तिमिवाततां पारुष्यवतीञ्च ।
वदन्ति वातजां वृद्धिं निमित्तवातरुक्सहिताम्वा ॥ ६ ॥
पक्वोडुम्बरसंकाशां दाहज्वरयुतामपि ।
क्षिप्रोत्थानप्रपाकान्तु पित्तवृद्धिं प्रचक्षते ॥ ७ ॥
कठिनां वेदनाल्पां च शीतां कण्डूमतीं तथा ।
श्लेष्मवृद्धिं विजानीयात् श्लेष्मोपद्रवसंयुताम् ॥
कृष्णस्फोटावृतां पित्तवृद्धिलिंगां च रक्तजाम् ॥ ९ ॥
कण्डूयुतां मृदुस्निग्धां वेदनाल्पान्तथैव च ।
मेदोवृद्धिं तु कफवत् तुल्यां तालफलेन वै ॥१०॥
मूत्रधारणशीलस्य वृद्धि र्भवति मूत्रजा ।
तोयपूर्णादृतिरिव गच्छतः सा तु क्षुभ्यति ॥११॥
वेदनां मूत्रकृच्छ्रस्य श्वयथुं फलकोषयोः ॥
आपादयति तां विद्या न्मूत्रवृद्धिं भिषग्वरः ॥१२॥
वृक्षप्रपतनैश्चापि भाराणां हरणैस्तथा ॥
बलवद्विग्रहै र्वायु र्वेगानां धारणैरणैः ॥१३॥
कुपितस्त्ववले देहे क्षुद्रान्त्रस्यैकदेशकम् ॥
विगुणीकृत्य चादाय संप्राप्य वङ्क्षणन्तु सः ॥१४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थित्वाथ वङ्क्षणं संधिं ग्रंथिरूपेण लम्बते ॥
करोति वेदनां तीव्रामरतिं ज्वरसंयुताम् ॥१५॥
उपेक्ष्यमाणस्य तु चान्त्रवृद्धि माध्मानरुक्स्तम्भवतीं स वायुः ॥
प्रपीडीतोऽन्तः स्वनवान्प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः ॥१६॥
कालान्तरेण रोगोऽयं मुष्कौ प्राप्नोति पूर्ववत् ॥
शोफो दीर्घस्ततोऽपि स्यात् तमसाध्यं विदुर्बुधाः ॥१७॥

उपदंशं प्रस्तोष्यधुना स च पञ्चविधः येन कारणविशेषेणोपदंशः सम्भवति तत्सर्वमाख्यायमानं शृणुत एकमना यूयमिति ॥१८॥

तत्रातिमैथुनात्, अतिब्रह्मचर्यात्, तथा ब्रह्मचारिणीं, चिरोत्सृष्टां रजस्वलां, दीर्घरोमाम्, कर्कशरोमां, संकीर्णरोमां, श्लक्ष्णरोमां, महाद्वारां अप्रियाम्, अकामाम, अपवित्रजलप्रक्षालितयोनिम्, अप्रक्षालितयोनिम्, योनिरोगोपसृष्टां, स्वभावतो वा दुष्टयोनिम्, वियोनिं वा नारोमत्यर्थमुपसेवमानस्य, तथा पशुयोनिमयोनिं, वा चोपसेवमानस्य, अथवा नखदशनविषशूकनिपातनात् बंधनात् हस्ताभिघातात्, अपवित्रतोयधावनादधावनात् अवपीडनात् शुक्रमूत्रवेगविधारणात्, मेढ्रमागम्य प्रकुपिताः दोषाः क्षतेऽक्षते वा श्वयथुमापादयन्ति तमुपदंशमित्याचक्षते । १९।

द्विभिर्दोषैः पृथक् समस्तैः रक्तेन च पञ्चविधः ॥२०॥

तत्र तोदभेदनस्फुटनरुक्षता स्तब्धमेढ्रता परुषशोफता श्यावस्फोटना विविधाश्च वातवेदनाः ॥२१॥

पैत्तिके पक्वोदुम्बरसंकाशः तीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च, श्लैष्मिके श्वयथुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनश्च ॥२२॥

रक्तजे कृष्णस्फोटप्रादुर्भावोऽत्यर्थमसृक्प्रवृत्तिः पित्तलिंगान्यत्यर्थं ज्वरदाहौ शोफश्च याप्यश्चैवं स्यात् कदाचित् ॥२३॥

सर्वजे सर्वलिंगत्वं अवदरणं च शेफसः कृमिप्रादुर्भावो मरणं वेति ॥२४॥

श्लीपदस्य सम्प्राप्तिपूर्वकं वर्णनम् ॥

कुपितास्तु दोषा वातपित्तश्लेष्माणो ऽधःप्रपन्ना वंक्षणोरुजानुजं-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धास्ववतिष्ठमानाः कालान्तरेण पादमाश्रित्य शनैः २ शोफमुपजनयति आदौ च वंक्षणशोथं सज्वरं कृत्वा पश्चात्पादौ प्रसर्पति तत् श्लीपदमाचक्षते ॥२५

तत् त्रिविधं वातपित्तश्लेष्मनिमित्तमिति।

तत्र वातजं खरं कृष्णं परुषमनिमित्तानिलरुजं परिस्फुटति च बहुशः, पित्तजं तु पीतावभासमीषत्मृदुज्वरदाहप्रायं च, श्लेष्मजं तु श्वेतं स्निग्धावभासं मन्दवेदनं भारिकं महाग्रंथिकं कण्टकै रुपचितञ्च, तत्र संवत्सरातीतमतिमहद्वल्मीकमिवजातं वर्जयेत् ॥२६॥

भवन्तिचात्र।

त्रीण्यप्येतानि जानीयात् श्लीपदानि कफोच्छ्रयात् ॥
गुरुत्वञ्च महत्वं च यस्मान्नारित विना कफात् ॥२७॥

पुराणोदकभूयिष्ठाः सर्वर्तुषु च शीतलाः ॥
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः ॥२८॥
पादयो र्हस्तयोश्चापि श्लीपदं जायते नृणाम् ॥

वृद्धिरोगे वंक्षणादेव दोषाः फलकोषवाहिनी धमनीः प्रपीड्य मुष्कयोः शोथं कुर्वन्ति तथा श्लीपदरोगेष्वपि पूर्वं वंक्षणादेव शोथारम्भः पश्चात्पादयोः शोथस्य प्रसरणम् तथा चोपदंशरोगिणामपि प्रायेणाविर्भावेन वृद्ध्युपदंशश्लीपदानन्तरं तदधिकारे समावेशः वृषनस्य उचितः अतो वृषननिदानमपि चात्रैव वक्ष्यामः किन्त्वस्मिन्रोगे रसायनीग्रंथिषु विकारो भवति ॥२९॥

अत्यभिष्यन्दिगुर्वन्नशुष्कपूत्यामिषाशनात् ॥
उपदंशफिरंगाच्च कुप्यत्यन्यतमो मलः ॥३०॥

करोति ग्रंथिवत् शोफं गत्वा वंक्षणसंधिषु ।
ज्वरशूलांगसादाढ्यं तं वृषनमिति निर्दिशेत् ॥३१॥ भा० प्र०

फिरंगंप्रस्तौति।

फिरंगसंज्ञके देशे बाहुल्येनैव यद्भवेत् ।
तस्मात् फिरंग इत्युक्तो व्याधि र्व्याधिविशारदैः ॥३२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गंधरोगः फिरंगोऽयं जायते देहिनां ध्रुवम् ।
फिरंगिणोंगसंसर्गात् फिरंगिण्याः प्रसंगतः ॥३३॥
व्याधिरागन्तुजो ह्येष दोषाणामत्र संक्रमः ।
भवेत्तल्लक्षयेदेषां लक्षणैर्भिषजाम्वरः ॥३४॥
फिरंग द्विविधो ज्ञेयो बाह्य आभ्यन्तरस्तथा ।
बहिरन्तर्भवश्चापि तेषां लिंगानि च ब्रुवे ३५॥
तत्र बाह्यः फिरंगः स्याद् विस्फोटसदृशोऽल्परुक् ।
स्फुटितो व्रणवद्वेद्यः सुखसाध्योऽपि स स्मृतः ॥३६॥
संधिष्वाभ्यन्तरः स स्यादामवात इव व्यथाम् ।
शोथं च जनयेदेष कष्टसाध्यो बुधैः स्मृतः ॥३७॥
काश्यं बलक्षयो नासाभंगो वह्नेश्च मन्दता ।
अस्थिशोषोऽस्थिवक्रत्वं फिरंगोपद्रवा अमी ॥३८॥
बहिर्भवो भवेत्साध्यो नवीनो निरुपद्रवः ।
आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः ॥३९॥
बहिरन्तर्भवोऽजीर्णो क्षीणस्योपद्रवैर्युतः ॥
व्याप्तो व्याधिरसाध्योऽय मित्याहुर्मुनयः पुरा ॥४०॥ भा० प्र०

आमवात इव व्यथामित्युक्ते उपदंशेऽपि आमवातोपद्रवो भवति उपदंशचिकित्सया च शांतिं याति ।४१

इति शल्यतन्त्रसमुच्चये द्विचत्वारिंशोऽध्यायः ।

अथ त्रिचत्वारिंशोऽध्यायः ॥

अथातो वृद्धिचिकित्सितमध्यायं व्याख्यास्यामः ॥१॥
अन्त्रवृद्ध्या विना षड्या वृद्धय स्तासु वर्जयेत् ॥
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम् ॥२॥
अत्यासनं चंक्रमणमुपवासं गुरूणि च ॥
तत्रादितो वातवृद्धौ त्रैवृतस्निग्धमातुरम् ॥३॥
स्विन्नं चैनं यथान्यायं पाययेत विरेचनम् ॥
कोशाम्रातिल्वकैरण्डफलतैलानि वा नरम् ॥४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सक्षीरं वा पिबेन्मासं तैलमेरण्डसम्भवम् ॥
गुग्गुल्वेरण्डजं तैलं गोमूत्रेण पिबेन्नरः ॥५॥
वातवृद्धिं जयत्याशु चिरकालानुबंधिनीम् ॥
ततः कालेऽनिलघ्नानां क्वाथैः कल्कैश्च बुद्धिमान् ॥६॥
निरूहयेन्निरूढं च भुक्तवंतं रसौदनम् ॥
यष्टिमधुकसिद्धेन ततस्तैलेन योजयेत् ॥७॥
स्नेहापनाहौ कुर्याच्च प्रदेहां श्चानिलापहान् ॥
विदग्धां पाचयित्वा वा सेवनीं परिवर्जयेत् ॥८॥
भिद्यातः प्रभिन्नायां यथोक्तं क्रममाचरेत् ॥

पित्तजायामपक्वायां पित्तग्रंथिक्रमोहितः ॥९॥
जलौकोभि र्हरेद्रक्तं वृद्धौ पित्तसमुद्भवे ॥
पित्तग्रन्थिक्रमं कुर्यादामे पक्वे च सर्वदा ॥१०॥

चन्दनं मधुकं पद्ममुशीरं नीलमुत्पलम् ।
क्षीरपिष्टं प्रलेपेन दाहशोथरुजापहम् ॥११॥ भा० प्र०

पक्वां वा भेदयेद्भिन्नां शोधयेत् क्षौद्रसर्पिषा ।
शुद्धायां च भिषक् दद्यात् तैलं कल्कं च रोपणम् ॥१२॥

वृद्धिं कफात्मिकां तूष्णैर्मूत्रपिष्टैः प्रलेपयेत् ।
पीतदारुकषायं च पिबेन्मूत्रेण संयुतम् ॥१३॥
विम्लापनाद्दते चापि श्लेष्मग्रंथिक्रमोहितः ।
त्रिकटुत्रिफलाक्वाथं सक्षारलवणं पिबेत् ॥१४॥

विरेचनमिदं श्रेष्ठं कफवृद्धिविनाशनम् । भा० प्र०
पक्वायां च विभिन्नायां तैलं शोधनमिष्यते ।
सुमनारुष्करांकोलसप्तपर्णेषु साधितम् ॥१५॥

मुहुर्मुहुर्जलौकोभिःशोणितं निर्हरेद् भिषक् ।
पिबेद् विरेचनं चापि शर्कराक्षौद्रसंयुतम् ॥१६॥

शीतमालेपनं शस्तं सर्वं पित्तहरं तथा ।
पित्तवृद्धिक्रमं कुर्यादामे पक्वे च सर्वदा ॥१७॥

मेदःसमुत्थां संस्वेद्य लेपयेत्सुरसादिना ।
शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः ॥१८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्विन्नां चावेष्ट्य पट्टेन समाश्वास्य तु मानवम् ।
रक्षेत्फले सेवनीञ्च वृद्धिपत्रेण दारयेत् ॥१९॥
मेदस्ततः समुद्धृत्य दद्यात्कासीससैंधवे ।
वध्नीयाच्च यथोद्दिष्टं शुद्धं तैलञ्च दापयेत् ॥२०॥
मनःशिलाललवणैः सिद्धमारुष्करेषु च ।
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ॥२१॥
सेवन्याः पार्श्वतोऽधस्ताद् विध्येद् व्रीहिमुखेन तु ।
अथात्र द्विमुखां नाडीं दत्वा विस्रावयेद् भिषक् ॥२२॥
मूत्रं नाडीमथोद्धृत्य कोशबंधमुपाचरेत् ।
शुद्धायां रोपणं देयं वर्जयेदन्त्रहेतुकीम् ॥२३॥
अप्राप्तफलकोशायां वातवृद्धिक्रमोहितः ।
तत्र या वंक्षणस्था तां दहेदर्धेन्दुवक्त्रया ॥२४॥
सम्यङ्मार्गावरोधार्थं कोशप्राप्तां तु वर्जयेत् ।
त्वचं भित्त्वांगुष्ठमध्ये दहेच्चांगविपर्ययात् ॥२५॥

सम्प्रत्यनेनैव बीजभूतेन पादांगुष्ठयोः अंगुरीयकधारणं कुर्वन्ति जानपदा वृद्धाविति ॥२६॥

अनेनैव विधानेन वृद्धौ वातकफात्मिके ।
प्रदहेत्प्रयतः किन्तु शिरावेधोऽधिकस्तयोः ॥२७॥
शंखोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम् ।
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये ॥२८॥

कर्णान्तः सिराव्यधोपदेशात् तत्र छेदनं कारयित्वा कर्णभूषणविशेषं धारयन्त्याधुनिका इति ॥ ९॥

गंधर्वहस्ततैलेन क्षीरेण विहितं शृतम् ।
विशालामूलजं चूर्णं वृद्धिं हन्ति न संशयः ॥३०॥

इतिशल्यतन्त्रसमुच्चये त्रिचत्वारिंशोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ चतुश्चत्वारिंशोऽध्यायः ॥

उपदंशेषु साध्येषु स्निग्धस्विन्नस्य देहिनः।
सिरां विध्येन्मेढ्रमध्ये पातयेद्वा जलौकसः ॥२॥
हरेदुभयतश्चापि दोषानत्यर्थमुच्छ्रितान्।
सद्योऽपहृतदोषस्य रुक्शोफावुपशाम्यतः ॥३॥
यदि वा दुर्बलो जन्तुर्न वा प्रातविरेचनम्।
निरूहेण हरेत्तस्य दोषानत्यर्थमुच्छ्रितान् ॥४॥

अथलेपाः

प्रपौण्डरीकयष्ट्याह्वर्षाभूसुरदारुभिः।
सरलागुरुरास्नाभि र्वातजं सम्प्रलेपयेत् ॥५॥
निचुलैरण्डबीजानि यवगोधूमशक्तवः।
एतैश्च वातजं स्निग्धैः सुखोष्णैः सम्प्रलेपयेत् ॥६॥
प्रपौण्डरीकपूर्वैश्च द्रव्यैः सेकः प्रशस्यते।
गैरिकांजनयष्ट्याह्वसारिवोशीरपद्मकैः ॥७॥
सचन्दनोत्पलैः स्निग्धैः पैत्तिकं सम्प्रलेपयेत्।
पद्मोत्पलमृडालैश्च ससर्जार्जुनवेतसैः ॥८॥
सर्पिःस्निग्धैः समधुकैः पैत्तिकं सम्प्रलेपयेत्।
सेचयेच्च सुशीतेन कषायेण वटादिना ॥९॥
जयाजपाश्वमारार्कशम्याकानां दलैः क्रमात्।
कृतं प्रक्षालनं क्वाथं मेढ्रपाके प्रयोजयेत् ॥१०॥
शालाश्वकर्णाजकर्णधवत्वग्भिः कफोत्थितम्॥
सुरापिष्टाभिरुष्णाभिः सतैलाभिः प्रलेपयेत् ॥११॥
रजन्यतिविषामुस्तासुरसासुरदारुभिः॥
सपत्रपाठापत्तुरै रथवा संप्रलेपयेत् ॥१२॥
सुरसादिकषायेण व्रणं प्रक्षालयेन्नरः॥
तथारग्वधतोयेन पूर्ववत्परिषेचयेत् ॥१३॥
एवं संशोधनालेप-सेकशोणितमोक्षणैः॥
प्रतिकुर्यात् क्रियायोगै स्तथादुष्टव्रणादितैः ॥१४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नायाति च यथापाकं प्रयतेत तथा भिषक् ॥
विदग्धैस्तु सिरास्नायुत्वङ्मांसैः क्षीयते ध्वजः ॥१५॥
शस्त्रेणोपचरेच्चापि पाकमागतमाशु वै ॥
तदापोह्य तिलैः सर्पिःक्षौद्रयुक्तैः प्रलेपयेत् ॥१६

करवीरस्य पत्राणि जात्यारग्वधयोस्तथा ॥
प्रक्षालने प्रयोज्यानि वैजयन्त्यर्कयोरपि ॥१७॥

रोध्रं रसाजनं दार्वी हरितालं मनःशिलाम् ॥
सैराष्ट्रीं गैरिकं तुत्थं पुष्पकासीसमेव च ॥१८॥

हरेणुकैले च तथा सूक्ष्मचूर्णानि कारयेत् ॥
तच्चूर्णं क्षौद्रसंयुक्तमुपदंशेषु पूजितम् ॥१९॥

जम्ब्वाम्रसुमनानिम्बश्वेताकाम्बोजिपल्लवाः ॥
शल्लकीवदरीबिल्वपलाशतिनिशत्वचः ॥२०॥

क्षीरिणाञ्च त्वचो योज्या क्वाथे त्रिफलया सह ।
तेन क्वाथेन नियतं व्रणं प्रक्षालयेत् भिषक् ॥२१॥

अस्मिन्नेव कषाये तु तैलं धीरो विपाचयेत् ।
गोजीविडंगयष्टिभिः सर्वगंधैश्च संयुतम् ॥२२॥

एतत्सर्वोपदंशेषु श्रेष्ठं रोपणमिष्यते ॥
आगाख्धूमो रजनी सुराक्लिन्नं च तैस्त्रिभिः ॥२३॥

भागवृद्ध्या पचेत्तैलं कण्डूशोथरुजापहम् ।
शोधनं रोपणं चैव सवर्णकरणं परम् ॥२४॥

सर्जिकातुत्थकासीसं शैलेयं च रसांजनम् ।
मनः शिलासमैश्चूर्णं दुष्टव्रणविशोधनम् ॥२५॥

गुंद्रान् दग्ध्वा कृतं भस्म हरितालं मनःशिला ।
उपदंशविसर्पाणामेवत् शान्तिकरम्परम् ॥२६॥

बंधूकदलचूर्णेन दाड्रिमत्वग्रजोऽथवा ।
गुण्डनं मेहने शस्तं लेपः पूगफलेन वा ॥२७॥

दहेत्कटाहे त्रिफलां सा मसीमधुसंयुता ।
उपदंशे प्रलेपोऽयं सद्यो रोपयति व्रणम् ॥२८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मार्कवस्त्रिफलादन्ती ताम्रचूर्णमयोरजः ।
उपदंशे निहन्त्येष वृक्षमिन्द्राशनि यथा ॥२९॥
उपदंशद्वयेऽप्येतां प्रत्याख्यायाचरेत् क्रियाम् ।
तयोरेव च या योग्या वीक्ष्य दोषबलाबलम् ॥३०॥
उपदंशे विशेषेण शृणु भूयस्त्रिदोषजे ।
दुष्टव्रणविधिं कुर्यात् कुथितं मेहनं त्यजेत् ॥३१॥
जाम्बोष्ठेनाग्निवर्णेन तप्तया वा शलाकया ।
सम्यग्दग्धं च विज्ञाय मधुसर्पिः प्रयोजयेत् ॥३२॥
शुद्धे च रोपणं दद्यात् कल्कं तैलञ्च रोपणम् ।
यस्य लिंगस्य मासन्तु शीर्यते मुष्कशेफतः ॥३३॥
तिक्तकोशातकीलम्बबीजं नागरसाधितम् ।
उपदंशहरं तैलं दुष्टव्रणमनेकधा ॥३४॥
घृतानि यानि वक्ष्यामि कुष्ठे नाडीव्रणे व्रणे ॥
उपदंशे प्रयोज्यानि तानि वैद्येन जानता । ३५॥

क्रमप्राप्तं लिंगार्शोलक्षणं चिकित्सितं वक्ष्यामः ॥

अंकुरैरिव संजातै उपर्य्युपरि संस्थितैः ॥
क्रमेण जायते वर्ति स्ताम्रचूडशिखोपमा ॥३६॥
कोशस्याभ्यन्तरे संधौ सर्वसंधिगतापि वा ॥
लिंगवर्ति रितिख्याता लिंगार्श इति चापरे ॥३७॥
क्षारेण प्रदहेत् छित्वा लिंगवर्तिमशेषतः ॥
व्रणवच्चाचरेत्सम्यक् लेपचूर्णैरुपद्रवान् ॥३५॥
स्वर्जिकां तुत्थशैलेयमंजनं सरसांजनम् ।
मनः शिलाले च समं चूर्णं मांसांकुरापहम् ॥३९॥

लिंगार्शो ऽनन्तरं क्रमप्राप्तं अर्शस्सु क्षाराग्निशस्त्रविधानं वक्ष्यामः चतुर्विधोऽर्शसां साधनोपायः—तद्यथा, तत्राचिरकालजातानि अल्पदोषलिंगोपद्रवाणि भेषजसाध्यानि, मृदुप्रसृतावगाढानि उच्छ्रितानि क्षारकर्मणा, कर्कशस्थिरपृथुकठिनानि वह्निना, तनुमूलानि उच्छ्रितानि क्लेदवन्ति च शस्त्रेण, तत्र भेषजसाध्यानामर्शसाम् चाद्यानां भेषजं भवति, क्षाराग्निशस्त्रसाध्यानां तु विधानमुच्यमानं चोपधारय ।४०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र बलवन्तं ह्यातुरम् दुर्नामभिरुपद्रुतं चोपस्निग्धं परिस्विन्नम् वातवेदनाभिवृद्धिशान्त्यर्थं स्निग्धमुष्णमल्पमन्नं द्रवप्रायं भुक्तवन्तं चोपवेश्य सम्वृते शुचौ देशे साधारणे व्यभ्रे समे काले फलके शय्यायां वा प्रत्यादित्यगुदमन्यस्योत्संगे निषण्णपूर्वकायं चोत्तानं किञ्चिदुन्नत-कटिकं वस्त्रकम्बलोपविष्टं यन्त्रशाटकेन परिक्षिप्तग्रीवासक्थं परि-कर्मिभिः सुपरिगृहीतम् स्थिरशरीरं कृत्वा ततोऽस्मिन् घृताभ्यक्तं यन्त्रमृज्वगुमुखं पायौ शनैः शनै प्रवाहमाणस्य प्रणिधाय प्रविष्टेचार्शो-वीक्ष्य शलाकयोत्पीड्य पिचुवस्त्रयोरन्यतरेण प्रमृज्य क्षारं पातयेत् पातयित्वा च पाणिना यन्त्रद्वारं पिधाय वाक्च्छतमात्रमुपेक्षेत ततः प्रमृज्य क्षारवलं व्याधिबलं चावेक्ष्य पुनरालेपयेत् ॥४१॥

अथार्शः पङ्कजाम्बवसंकाशमभिसमीक्ष्यावसन्न मोपन्नतमुपावर्तयेत्, क्षारं प्रक्षालयेत् धान्याम्लेन दधिमस्तुशुक्तफलाम्लै वा, ततो यष्टीमधुक-मिश्रेण रुर्पिषा निर्वाप्य यन्त्रमपनीयोत्थाप्य च रोगिणम्; शीताभि-रद्भिः परिषिंचेदशीताभिरित्येके ॥४१॥

ततो निर्वातमागारं प्रवेश्य आचारिकमुपदिशेत् सावशेषं पुनर्दहेत्, एवं सप्तरात्रात् एकैकमुपक्रमेत् तत्र बहुषु पूर्वं दक्षिणं साधयेत्, दक्षिणाद्वामं, वामात् पृष्ठजं, ततोऽजमिति ॥४२॥

तत्र वातश्लेष्मनिमित्तानि अग्निक्षाराभ्यां साधयेत् क्षारेणैव मृदुना पित्तरक्तनिमित्तानि, तत्र वातानुलोम्यमन्नरुचिः अग्निदी-प्तिर्लाघवं बलवर्णोत्पत्तिः मनस्तुष्टिरिति सम्यग्दग्धलिंगानि, अतिदग्धे तु गुदावदरणम् दाहो मूर्च्छा ज्वरः पिपासा शोणितातिप्रवृत्ति-स्तन्नि-मित्ता श्चोपद्रवा भवन्ति, श्यावाल्पव्रणता करदूरनिलवैगुण्यं करणा प्रसादो व्याधेरशान्तिर्हीनदग्धे ॥४३॥

महान्ति प्राणवतश्छित्वा दहेत् निर्गतानि चात्यर्थं दोषपूर्णानि यन्त्राद् विना स्वेदावगाहाभ्यंगोपनाहविस्रावणालेपक्षारा श्चशस्त्र-रुपाचरेत्, प्रवृत्तरक्तानि च रक्तपित्तविधानेन, भिन्नपुरीषाणि च अतिसारविधानेन, बद्धवर्चांसि स्नेहपानविधानेनोदावर्तविधानेन वा, एष सर्वस्थानगतानामर्शसां दहनकल्पः ॥४४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसाद्य च दर्वीकूर्चकशलाकानामन्यतमेन क्षारं पातयेत् भ्रष्टगुदस्य तु विना यन्त्रेण क्षारादिकर्म प्रयुञ्जीत, ततः स्निग्धमग्निदीपनमशोघ्नं सृष्टमूत्रपुरीषं च तदुपसेवेत, परं च यत्नमास्थाय गुदे क्षाराग्निशस्त्राण्यवचारयेत् तद् विभ्रमाद्धि षाण्डयशोफदाहमदमूर्च्छाटोपानाहातिसारप्रवाहणानि भवन्ति मरणमिति ।

इति शल्यतन्त्रासमुच्चये चतुश्चत्वारिंशोऽध्यायः

अथ पञ्चचत्वारिंशोऽध्यायः

अथातो श्लीपदव्रणकिरंगचिकित्सितमध्यायं व्याख्यास्यामः ॥१॥
स्नेहस्वेदोपपन्ने तु श्लीपदेऽनिलजे भिषक् ।
कृत्वा गुल्फोपरि सिरां विध्येत्तु चतुरंगुले ॥२॥
समाप्यायितदेहं च वस्तिभिः समुपाचरेत् ।
मासमेरण्डजं तैलं पिबेन्मूत्रेण संयुतम् ॥३॥
पयसौदनमश्नीयात् नागरक्वथितेन च ।
घृतञ्चोपयुञ्जीत शस्तो दाहस्तथाग्निना ॥४॥
गुल्फस्याधः सिरां विध्येत् श्लीपदे पित्तसम्भवे ।
पित्तघ्नीं च क्रियां कुर्यात् पित्तार्बुदविसर्पवत् ॥५॥
सिरां सुविदितां विध्येदंगुष्ठे श्लैष्मिके भिषक् ।
मधुयुक्तानि चाभीक्ष्णं कषायाणि पिबेन्नरः ॥६॥
पिबेद्वाप्यभयाकल्कं मूत्रेणान्यतमेन वा ।
कट्फलामृतां शुण्ठीं विडंगं दारुचित्रकम् ॥७॥
हितं वा लेपने नित्यं भद्रदारुसचित्रकम् ।
विडंगमरिचार्केषु नागरे चित्रकेऽथवा ॥८॥
भद्रदार्वेलुकाख्ये च सर्वेषु लवणेषु च ।
तैलं पक्त्वा पिबेद्वापि यवान्नञ्च हितं सदा ॥९॥
पिबत्सर्षपतैलम्वा श्लीपदानां निवृत्तये ।
पूतीकरंजपत्राणां रसं चापि यथाबलम् ॥१०॥
अनेनैव विधानेन पुत्रजीवकजं रसम् ।
प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित् ॥११॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

केवुकाकन्दनिर्यासं लवणं त्वथ पाकिमम् ।
रसं दत्वाथ पूर्वोक्तं पेयमेतद् भिषग्जितम् ॥१२॥
काकादनीं काकजंघां वृहतीं कण्टकारिकाम् ।
कदम्बपुष्पीं मंदारीं लंबां शुकनशां तथा ।१३॥
दग्ध्वा मूत्रेण तद्भस्म स्रावयेत् क्षारकल्पवित् ।
तत्र दद्यात् प्रतीवापं काकोडुम्बरिकारसम् ॥१४॥
मदनाच्च फलात्क्वाथं शुकाख्यास्तरसं तथा ।
एषः क्षारस्तु पानीयः श्लीपदं हन्ति सेवितः ॥१५॥
अपचीं गलगण्डं च ग्रहणीदोषमेव च ॥
भक्तस्यानशनं चैव हन्यात् सर्वविषाणि च ॥१६॥
एष्वेव तैलं संसिद्धं नस्याभ्यंगेषु पूजितम् ।
एतानेवामयान् हन्ति ये च दुष्टव्रणा नृणाम् ॥१७॥
द्रवन्तीं त्रिवृतां दन्तीं नीलीं श्यामान्तथैव च ।
सप्तलां शंखिनीं चैव दग्ध्वा मूत्रेण गालयेत् ॥१८॥
दद्याच्च त्रिफलाक्वाथमेष क्षारस्तु साधितः ।
अधोगच्छति पीतस्तु पूर्वैश्चाप्याशिषः समा ॥१९॥

अथ श्लीपदस्थानोत्पन्नत्वात् श्लीपदानन्तरं व्रध्नचिकित्सामाह ।

भ्रष्टश्चैरण्डतैलेन सम्यक् कल्कोऽभयाभवः ।
कृष्णासैंधवसंयुक्तो व्रध्नरोगहरः परः ॥२०॥
अजाजीहपुषा कुष्ठं पञ्चकं बदरान्वितम् ।
काञ्जिकेन तु सम्पिष्टं तल्लेपो व्रध्नजित्परः ॥२१॥ भा० प्र०
यदि नैवं शमं गच्छेत् पाचयेत्तं तु पूर्ववत् ।
पक्वं च भेदयेद् भिन्नं शोधयेद्रोपयेत्तथा ॥२२ तन्त्रान्तरतः

फिरंगरोग उपदंशभेदः उपदंशस्य चोपद्रवः व्रध्नव्याधि रतो व्रध्नचिकित्सानन्तरं फिरंगचिकित्सामुच्यते ।

फिरंगसंज्ञकं रोगं रसः कर्पूरसंज्ञकः ।
अवश्यं नाशयेदेतदूचुः पूर्वचिकित्सकाः ॥२३॥
लिख्यते रसकर्पूरप्रासने विधिरुत्तमः ।
अनेन विधिना खादेन्मुखे शोथं न विन्दति ॥२४॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोधूमचूर्णं सन्नीय निदध्यात्सूक्ष्मकूपिकाम् ।
तन्मध्ये निक्षिपेत् सूतं चतुर्गुंजामितं भिषक् ॥२५॥
ततस्तु गुटिकां कुर्याद् यथा न दृश्यते बहिः ।
लवंगसूक्ष्मचूर्णेन गुटिकामवधूलयेत् ॥२६॥
दन्तस्पर्शो यथा न स्यात्तथा तामम्भसा गिलेत् ।
ताम्बूलं भक्षयेत्पश्चात् शाकाम्ललवणां स्त्यजेत् ॥२७॥ भा० प्र०

वयन्तु क्षीरसन्तानिकया किलाटेन च रसकर्पूरसेवनमितिये सम्प्रदायं प्रशंसन्त्याधुनिकास्तं मन्यामहे ॥२८॥

चोपचीनीभवं चूर्णं शाणमानं समाक्षिकम् ।
फिरंगव्याधिनाशाय भक्षयेल्लवणं त्यजेत् ।२९॥
लवणं यदि वा त्यक्तुं न शक्नोति यदा जनः ।
सैंधवं स हि भुञ्जीत मधुरं परमं हितम् ॥३०॥

सर्वव्रणहरोरसः

पारदः कर्षमात्रः स्यात्तावन्मात्रन्तु गंधकम् ।
तावन्मात्रस्तु खदिरस्तेषां कुर्यात्तु कज्जलीम् ॥३१॥
रजनीकेशरच्युष्यो जीरयुग्मं यवानिका ।
चन्दनद्वितयं कृष्णा वांसी मांसी च पत्रकम् ॥३२॥
अर्द्धकर्षमितं चूर्णं मिश्रयित्वा च निक्षिपेत् ।
तत्सर्वं मधुसर्पिर्भ्यां द्विपलाभ्यां पृथक् २ ॥३३॥
मर्दयेदथ तत्खादेत् चार्द्धकर्षमितं नरः ।
व्रणः फिरंगरोगोत्थस्तस्यावश्यं प्रणश्यति ॥३४॥
अन्योऽपि चिरजातोऽपि प्रशाम्यति न संशयः ।
एतद् भक्षयतः शोथो मुखस्यांतर्न जायते ॥३५॥
वर्जयेदत्र लवणमेकविंशतिवासरान् ।
दुष्टव्रणानां सर्वेषां शान्ति र्भवति सेवनात् ॥३६॥

इति शल्यतन्त्रसमुच्चये पञ्चचत्वारिंशोऽध्यायः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथषट्चत्वारिंशोऽध्यायः

अथातः क्षुद्ररोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥१॥

अजगल्लीलक्षणम् ॥१॥

स्निग्धाः सवर्णा ग्रथिता नीरुजा ग्रंथिसन्निभाः ।
कफवातोत्थिता ज्ञेया वालानामजगल्लिका ॥२॥

यवप्रख्यालक्षणम् ॥२॥

यवाकारा सुकठिना ग्रथिता मांससन्निभाः ॥
पिडका श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते । ३॥

अंधालजीलक्षणम् ॥३॥

घनामबक्कां पिडकामुन्नतां परिमण्डलाम् ।
अंधालजीमल्पपूयां तां विद्यात् कफवातजां ॥४॥

विवृतालक्षणम् ॥४॥

विवृतास्यां महादाहां पक्वोडुम्बरसन्निभाम् ।
विवृतामिति तां विद्यात् पित्तोत्थां परिमण्डलां ॥५॥

कच्छपीलक्षणम् ॥५॥

ग्रंथयः पञ्च वा षड् वा दारुणाः कच्छपोन्नताः ।
कफानिलाभ्यामुद्भूता विद्यात्तां कच्छपीमिति ॥६॥

वल्मीकलक्षणम् ॥६॥

पाणिपादतले संधौ ग्रीवायामूर्ध्वजत्रुणि ।
ग्रंथि र्वल्मीकवच्चस्तु शनैः समुपचीयते ॥७॥
तोदक्लेदपरीदाहकंडूमद्भि र्व्रणैर्वृतः ।
व्याधि र्वल्मीक इत्येष कफपित्तानिलोद्भवः ॥ ८ ॥

इन्द्रवृद्ध्यापनसीपाषाणगर्दभलक्षणम् ॥७-८-९॥

पद्मपुष्करवन्मध्ये पिडकाभिः समाचिताम् ।
इन्द्रवृद्धान्तु तां विद्यात् वातपित्तोत्थितां भिषक् ॥ ९ ॥
कर्णोपरि समन्ताद्वा पृष्ठे वा पिडकोग्ररुक् ।
शालूकवत्पनसिकां तां विद्यात् श्लेष्मवातजाम् ॥१०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation; Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हनुसंधौ समुद्भूतं शोफमल्परुजं स्थिरम् ।
पाषाणगर्दभं विद्याद् वलासपवनात्मकम् ॥११॥

जालगर्दभकक्षाग्निरोहिणी विस्फोटलक्षणं ॥१०-११-१२-१३

विसर्पवत्सर्पति यो दाहज्वरकरस्तनुः ।
अपाकः श्वयथुः पित्तात्सज्ञेयो जालगर्दभः ॥१२॥
बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपात्सम्भूतां कक्षामिति विनिर्दिशेत् ॥१३॥
कक्षाभागेषु ये स्फोटा जायन्ते मांसदारणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ॥१४॥
सप्ताहाद् द्वादशाद्वाह्या पक्षाद्वा घ्नन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सन्निपाततः ॥१५॥
अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्ततः ।
क्वचित्सर्वत्र वा देहे विस्फोटा इति ते स्मृताः ॥१६॥

अनुशयी वदारिकाशर्करार्बुदलक्षणम् ॥१४-१५-१६-

गम्भीरामल्पसंरम्भां सवर्णामुपरि स्थिताम् ।
कफादन्तःप्रपाकान्तु विद्यादनुशयीं भिषक् ॥१७॥
विदारीकन्दवद्वृत्तां कक्षावंक्षणसंधिषु ।
रक्तां विदारिकां विद्यात् सर्वजां सर्वलक्षणाम् ॥१८॥
प्राप्य मांससिरास्नायूः श्लेष्मामेदस्तथानिलः ।
ग्रथिं करोति भिन्नोऽसौ मधुसर्पिर्वसानिभम् ॥१९॥
स्रवत्यास्रावमत्यर्थं तत्र वृद्धिंगतोऽनिलः ।
मांसं विशोष्य ग्रथितां शर्करामुपपादयेत् ॥२०॥
दुर्गंधं क्लिन्नमत्यर्थं नानावर्णं ततः सिराः ।
स्रवन्ति सहसा रक्तं तद्विद्यात् शर्करार्बुदम् ॥२१॥

कदरजतुमणिमषकन्यच्छलक्षणम् ॥१७-१८-१९-२०

शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः ।
मेदोरक्तानुगैश्चैव दोषैर्वा जायते नृणाम् ॥२२॥
सकीलः कठिनो ग्रंथि र्निम्नमध्योन्नतोऽपि वा ।
कोलमात्रः सरुक् स्रावो जायते कदरस्तु सः ॥२३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नीरुजं सममुत्सन्नं मण्डलं कफरक्तजम् ।
सहजं रक्तमीषच्च श्लक्ष्णं जतुमणिं विदुः ॥२४॥
अवेदनं स्थिरं चैव यस्य गात्रेषु दृश्यते ।
माषवत्कृष्णमुत्सन्नमनिलान्मषकं दिशेत् ॥२५॥
मण्डलं महदल्पं वा श्यामं वा यदि वा सितम् ।
सहजं नीरुजं गात्रे न्यच्छमित्यभिधीयते ॥२५॥

तिलकालकपरिवर्तिकयोर्लक्षणम् ॥२१-२२

कृष्णानि तिलमात्राणि नीरुजानि समानि च ।
वातपित्तकफोच्छोषात्तान् विद्यात्तिलकालकान् ॥२६॥
मर्दनात्पीड़नाच्चापि तथैवाप्यभिघाततः ।
मेढ्रचर्म यदा वायु र्भजते सर्वत श्चरन् ॥२७॥
तदा वातोपसृष्टं च चर्म प्रति निवर्तते ।
मणेरधस्तात्कोशश्च ग्रंथिरूपेण लम्बते ॥२८॥
सवेदनः सदाहश्च पाकं च व्रजति क्वचित् ।
मारुतागन्तुसम्भूतां विद्यात्तां परिवर्तिकाम् ॥२९॥

अवपाटिकानिरुद्धप्रकशयोर्लक्षणम् ॥ २३-२४

अल्पीयःखां यदा हर्षाद्गलां गच्छेत् स्त्रियं नरः ।
हस्ताभिघातादथवा चर्मण्युद्वर्तिते बलात् ॥३०॥
मर्दनात्पीड़नाद्वापि शुक्रवेगविघाततः ।
यस्यावपाट्यते चर्म तां विद्यादवपाटिकां ॥३१॥
वातोपसृष्टमेवं तु चर्म संश्रयते मणिम् ।
मणिश्चर्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च ॥३२॥
निरुद्धप्रकशे तस्मिन्मन्दधारमवेदनम् ।
मूत्रं प्रवर्तते जन्तो र्मणि र्न च विदीर्यते ॥३३॥
निरुद्धप्रकशं विद्याद्गूढां चावपाटिकाम् ।

सन्निरुद्धदाहिपूतनयोर्लक्षणम् ॥ २५-२६

वेगसंधारणाद्वायु र्विहतो गुदमाश्रितः ।
निरुणद्धि महत्स्रोतः सूक्ष्मद्वारं करोति च ॥३४॥
मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति ।
सन्निरुद्धगुदं व्याधिमेनं विद्यात् सुदारुणम् ॥३५॥

RajGuru Math,, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शकृन्मूत्रसमायुक्ते ऽधौते ऽपाने शिशो र्भवेत् ।
स्विन्नस्याक्ष्याध्यमानस्य कण्डूं रक्तकफोद्भवा ॥३६॥
कण्डूयनात् ततः क्षिप्रं स्फोटाः स्रावश्च जायते ।
एकीभूतं व्रणै र्घोरं तं विद्याद्हिमूतनम् ॥३७॥

वृषणकच्छगुदभ्रंशयोर्लक्षणम् ॥ २७-२८

स्नानोत्सादनहीनस्य मलो वृषणसंस्थितः ।
प्रक्लिद्यते यदा स्वेदात्कण्डूं जनयते तदा ॥३८॥
तत्र कण्डूयनात् क्षिप्रं स्फोटाः स्रावश्च जायते ।
प्राहु र्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम् ॥३९॥
प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः ।
रुक्षदुर्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥४०॥

इति शल्यतन्त्रसमुच्चये षट्चत्वारिंशोऽध्यायः ।

अथ सप्तचत्वारिंशोऽध्यायः

अथातः क्षुद्ररोगचिकित्सितमध्यायंव्याख्यास्यामः ॥१॥
तत्राजगल्लिकामामां जलौकोभिरुपाचरेत् ।
शुक्तिस्वर्जीयवक्षारकल्कै श्चालेपयेद् भिषक् ॥
श्यामालांगलकीपाठाकल्कैर्वापि विचक्षणः ।
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत् ॥३॥
अधालजीं यवप्रख्यां पनसीं कच्छपीं तथा ।
पाषाणगर्दभं चैव पूर्वं स्वेदेन योजयेत् ॥४॥
मनःशिलातालकुष्ठदारुकल्कैः प्रलेपयेत् ।
परिपाकगतान् भित्वा व्रणवत्समुपाचरेत् ॥५॥
विवृतामिन्द्रवृद्धां च गर्दभीं जालगर्दभम् ।
इरिवेल्लां गंधनाम्नीं कक्षां विस्फोटकां स्तथा ॥६॥
पित्तजस्य विसर्पस्य क्रियया साधयेद् भिषक् ।
रोपयेत् सर्पिषा पक्वान् सिद्धेन मधुरौषधैः ॥७॥
विदारिकां समभ्यज्य स्विन्नां विम्लाप्य लेपयेत् ।
नगवृत्तिकवर्षाभू-विल्वमूलैः सुपेषितैः ॥८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्रणभावगतायाम्वा कृत्वा संशोधनक्रियाम् ।
रोपणार्थं हितं तैलं कषायमधुरैः कृतम् ॥९॥
प्रच्छानै वा जलौकोभिः स्राव्याऽपक्वा विदारिका ।
अजकर्णैः सपालाशै र्मूलकल्कै प्रलेपयेत् ॥१०॥
पक्वां विदार्य शस्त्रेण पटोलपिचुमन्दयोः ।
कल्केन तिलयुक्तेन सर्पिर्मिश्रेण लेपयेत् ॥११॥
वद्ध्वा च क्षीरवृक्षस्य कषायैः खदिरस्य च ।
व्रणं प्रक्षालयेत् शुद्धां स्ततस्तां रोपयेत्पुनः ॥१२॥
मेदोऽर्बुदविधानेन साधयेच्छर्करार्बुदम् ।
उद्धृत्य दग्ध्वा स्नेहेन जयेत्कदरसंज्ञितम् ॥१३॥
इन्द्रलुप्ते सिरां मूर्ध्नि स्निग्धस्विन्नस्य मोक्षयेत् ।
कल्कैः समरिचै र्दिह्याच्छालिकासीसतुत्थकैः ॥१४॥
जतुमणिं समुत्कृत्य मधकं तिलकालकम् ।
क्षारेण प्रदहेद् युक्त्या वन्हिना वा शनैः शनैः ॥१५॥
न्यच्छे व्यंगे सिरामोक्षो नीलिकायां च शस्यते ।
यथान्यायं यथाभ्यासं लालट्यादि सिराव्यधः ॥१६॥
परिवृत्तिं घृताभ्यक्तां सुस्विन्नामुपनाहयेत् ।
त्रिरात्रं पञ्चरात्रं वा वातघ्नैः शाल्वणादिभिः ॥१७॥
ततोऽभ्यज्य शनैश्चर्म चानयेत् पीड़येन्मणिम् ।
प्रविष्टे च मणौ चर्म स्वेदयेदुपनाहनैः ॥१८॥
निरुद्धप्रकशे नाड़ीं लौहीमुभयतो मुखीम् ।
दारवीं वा जतुकृतां घृताभ्यक्तां प्रवेशयेत् ॥१९॥
परिषेके वसामज्ज शिशुमारवराहयोः ।
चक्रतैलं तथा योज्यं वातघ्नद्रव्यसंयुतम् ॥२०॥
न्यहात् न्यहात् स्थूलतरां सम्यग् नाडीं प्रवेशयेत् ।
स्रोतोविवर्द्धयेदेवं स्निग्धमन्नं च भोजयेत् ॥२१॥
भित्त्वा वा सेवनीं मुक्त्वा सद्यः क्षतवदाचरेत् ।
सन्निरुद्धगुदं रोगं वल्मीकमग्निरोहिणीम् ।
प्रत्याख्याय यथायोगं चिकित्सितमथाचरेत् ॥२२॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विसर्पोक्तेन विधिना साधयेदग्निरोहिणीम् ।
सन्निरुद्धगुदे योज्या निरुद्धप्रकशक्रिया ॥२३॥
शस्त्रेणोत्कृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत् ।
विधानेनार्बुदोक्तेन शोधयित्वा च रोपयेत् ॥२४॥
वल्मीकन्तु भवेद्यस्य नातिवृद्धमर्मजम् ।
तत्र संशोधनं कृत्वा शोणितं मोक्षयेद् भिषक् ॥२५॥
कुलत्थिकाया मूलैश्च गुडूच्या लवणेन च ।
आरेवतस्य मूलैश्च दन्तीमूलैस्तथैव च ॥२६॥
श्यामामूलैः सपललैः शक्तुभिश्चः प्रलेपयेत् ।
मुस्निग्धैश्च सुखोष्णैश्च भिषक् तमुपनाहयेत् ॥२७॥
पक्वं वा तद्विजानीयात् गतीः सर्वा यथाक्रमम् ।
अभिज्ञाय ततश्छित्वा प्रदहेन्मतिमान् भिषक् ॥२८॥
संशोध्य दुष्टमांसानि क्षारेण प्रतिसारयेत् ।
व्रणं विशुद्धं विज्ञाय रोपयेद् मतिमान् भिषक् ॥२९॥
सुमनाग्रंथयश्चैव भल्लातकमनःशिले ।
कालानुसारी सूक्ष्मैला चन्दनागुरुणी तथा ॥३०॥
एतैः सिद्धं निम्बतैलं वल्मीके रोपणं हितम् ।
पाणिपादोपरिष्टात्तु छिद्रैर्बहुभि रावृतम् ॥३१॥
वल्मीकं यत् सशोफं स्याद्वज्यँ तत्तु विजानता ।
पटोलपत्रत्रिफलारसांजनविपाचितम् ।
पीतं घृतं नाशयति तत् कृच्छ्रामप्यहिपूतनाम् ॥३३॥
त्रिफलाकोलखदिरकषायं व्रणरोपणम् ।
कासीसरोचनातुत्थहरितालरसांजनैः ॥३४॥
लेपोऽम्लपिष्टो वदरीत्वग् वा सैंधवसंयुतः ।
चिकित्सेन्मुष्ककच्छुं चाप्यहिपूतनपानवत् ॥३५॥
गुदभ्रंशे गुदं स्विन्नं स्नेहाभ्यक्तं प्रवेशयेत् ।
कारयेद् गोफणाबंधं मध्यछिद्रेण चर्मणा ॥३६॥
विनिर्गमार्थं शकृतो वायोश्चाधः प्रवृत्तये ।
क्षीरं महापञ्चमूलं मूषिकां चान्त्रवर्जिताम् ॥३७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततस्तस्मिन् पचेत्तैलं वातघ्नौषधसंयुतम् ।
गुदभ्रंशमिदं कृच्छ्रं पानाभ्यंगात्प्रसाधयेत् ॥३८॥
इति शल्यतन्त्रसमुच्चये सप्तचत्वारिंशोऽध्यायः

अथाष्टचत्वारिंशोऽध्यायः

अथातः शूकदोषविज्ञानीयमध्यायं व्याख्यास्यामः ॥ ॥
लिंगवृद्धिमिच्छतामक्रमप्रवृत्तानां शूकदोषनिमित्ता ।
दश चाष्टौ च व्याधयो जायन्ते तद्यथा ॥२॥
गौरसर्षपतुल्या तु शूकदुर्भुग्नहेतुका ।
पिड़का कफरक्ताभ्यां ज्ञेया सर्षपिका बुधैः ॥३॥
कठिना विषमैरन्तै र्मारुतस्य प्रकोपतः ।
शूकैस्तुविषसंयुक्तैः पिड़काऽष्ठीलिका भवेत् ॥४॥
शूकैर्यत्पूरितं शश्वद् ग्रथितं नाम तत्कफात् ।
कुम्भीका रक्तपित्तोत्था जाम्ववास्थिनिभाऽशुभा ॥५॥
अलजीलक्षणैर्युक्तामलजीं च वितर्कयेत् ।
मृदितं पीड़ितं यच्च संरब्धं वातकोपतः ॥६॥ .
पाणिभ्यां भृशसंमूढ़े संमूढ़पिड़का भवेत् ।
दीर्घा वह्यश्च पिड़का दीर्यन्ते मध्यतस्तु याः ॥७॥
सोऽवमन्थः कफास्टग्भ्यां वेदनारोमहर्षकृत् ।
पित्तशोणितसम्भूता पिड़का पिड़काचिता ॥८॥
पद्मपुष्करसंस्थाना ज्ञेया पुष्करिकेति सा ।
जनयेत्स्पर्शहानिन्तु शोणितं शूकदूषितम् ॥९॥
मुद्गमाषोपमा रक्ता पिड़का रक्तपित्तजा ।
उत्तमैषा तु विज्ञेया शूकाजीर्णनिमितजा ॥१०॥
छिद्रैरणुमुखै र्लिङ्गं चितं यस्य समन्ततः ।
वातशोणितजो व्यधिर्विज्ञेयः शतपोनकः ॥११॥
पित्तरक्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहवान् ।
कृष्णस्फोटैः सरक्तैश्च पिडकाभिश्च पीडितम् ॥१२॥
यस्य वास्तुरुजश्चोग्रा ज्ञेयं तच्छोणितार्बुदम् ।
मांसदोषेण जानीयादर्बुदं मांससम्भवम् ॥१३॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शीर्यन्ते यस्यमांसानि यस्य सर्वाश्च वेदनाः।
विद्यात्तं मासपाकन्तु सर्वदोषकृतं भिषक् ॥१४॥
विद्रधिं सन्निपातेन यथोक्तमभिनिर्दिशेत्।
कृष्णानि चित्राण्यथवा शूकानि सविषाणि वा ॥१५॥
पातितानि पचन्त्याशु मेदं निरवशेषतः।
कालानि भूत्वा मांसानि शीर्यन्ते यस्य देहिनः ॥१६॥
सन्निपातसमुत्थानं तं विद्यात्तिलकालकम्।
तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः ॥१७॥
विद्रधिस्तु न सिद्ध्यन्ति ये च स्यु स्तिलकालकाः

इति शल्यतन्त्रेऽष्टचत्वारिंशोऽध्यायः

अथैकोनपञ्चाशत्तमोऽध्यायः

अथातो शूकदोषचिकित्सितमध्यायं व्याख्यास्यामः ॥१॥
संलिख्य सर्षपीं सम्यक् कषायैरवचूर्णयेत्।
कषायेष्वेव तैलं च कुर्वीत व्रणरोपणम् ॥२॥
अष्ठीलिकां जलौकोभि ग्राहयेत्कुशलो भिषक्।
तथा चानुपशाम्यन्तीं कफग्रंथिवदुद्धरेत् ॥३॥
स्वेदयेद्ग्रथितं शश्व न्नाड़ीस्वेदेन बुद्धिमान्।
सुखोष्णै रुपनाहैश्च सुस्निग्धै रुपनाहयेत् ॥४॥
कुम्भीकां पाकमापन्नां भिंद्याच्छुद्धां तु रोपयेत्।
तैलेन त्रिफलारोध्रतिन्दुकाम्रातकेन च ॥५॥
ग्राहयित्वा जलौकोभिरलजीं सेचयेत्ततः।
कषायैस्तेषु सिद्धं च तैलं रोपणमि यते ॥६॥
वलातैलेन कोष्णेन मृदितं परिषेचयेत्।
मधुरैः सर्पिषा स्निग्धैः सुखोष्णै रुपनाहयेत् ॥७॥
संमूढ़पिड़कां क्षिप्रं जलौकोभिरुपाचरेत्।
भित्त्वा पर्यागतां चापि लेपयेत् क्षौद्रसर्पिषा ॥८॥
अवमंथे गते पाकं भिन्ने तैलं विधीयते।
धवाश्वकर्णपत्तंग सल्लकीतिन्दुकीकृतम् ॥९॥
क्रियां पु ष्करिकायां तु शीतां सर्वां प्रयोजयेत्।
जलौकोभिर्हरेच्चास्टक् सर्पिषा चावसेचयेत् ॥१०॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्पर्शहान्यां हरेच्चास्टक् प्रदिह्यान्मधुरैरपि ।
क्षीरेक्षुरससर्पिर्भिः सेचयेच्च सुशीतलैः ॥११॥
पिड़कामुत्तमाख्यां च वड़िशेनोद्धरेद् भिषक् ।
उद्धृत्य मधुसंयुक्तैः कषायैरवचूर्णयेत् ॥१२॥
रसक्रिया विधातव्या लिखिते शतपोनके ।
पृथक्पर्ण्यादिसिद्धं च देयं तैलमनन्तरम् ॥१३॥
क्रियां कुर्यात् भिषक् प्राज्ञ स्त्वक्पाकस्य विसर्पवत् ॥
रक्तविद्रधिवच्चापि क्रिया शोणितजेऽर्बुदे ॥१४॥
कषायकल्कसर्पींषि तैलं चूर्णं रसक्रिया ।
शोधनं रोपणं चैव व्रीव्रीव्यावचारयेत् ॥१५॥
यथास्वं सर्पिषः पानं पथ्यं चापि विरेचनम् ।
हितः शोणितमोक्षश्च यच्चापि लघुभोजनम् ॥१६॥
अर्बुदं मांसपाकं च विद्रधिस्तिलकालकम् ।
प्रत्याख्याय प्रकुर्वीत भिषक् सम्यक् प्रतिक्रियाम् ॥१७॥

इति शल्यतन्त्रसमुच्चये एकोनपञ्चाशत्तमोऽध्यायः ।

अथ पंचाशत्तमोऽध्यायः

अथातः प्रत्येकमर्मनिर्देशमध्यायं व्याख्यास्यामः ॥१॥

सप्तोत्तरं मर्मशतम् तानि मर्माणि पञ्चात्मकानि भवन्ति, तद्यथा मांसमर्माणि, शिरामर्माणि, स्नायुमर्माणि, अस्थिमर्माणि, संधिमर्माणि चेति ॥ २ ॥

न खलु मांसशिरास्नायुसंध्यस्थिव्यतिरेकेणान्यानि मर्माणि भवन्ति यस्मान्नोपलभ्यन्ते ॥ ३ ॥

तत्रैकादश मांसमर्माणि, एकचत्वारिंशत् शिरामर्माणि, सप्तविंशतिः स्नायुमर्माणि, अष्टावस्थिमर्माणि, विंशतिः संधिमर्माणि चेति ॥ ४ ॥

तेषामेकादशैकस्मिन् सक्थ्नि भवन्ति, एतेनेतरसक्थि बाहू च व्याख्यातौ, उदरोरसो द्वादश, चतुर्दश पृष्ठे, ग्रीवां प्रत्यूर्ध्वं सप्तत्रिंशत् ॥ ५ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र सक्थिमर्माणि, क्षिप्रतलहृदय-कूर्च-कूर्चशिरो-गुल्फेन्द्रवस्ति-जान्वाण्यूर्वी-लोहिताक्षाणि विटपञ्चेति, एतेनेतरं सक्थि व्याख्यातम् ॥ ६ ॥

उदरोरसोस्तु गुदवस्ति-नाभि-हृदयस्तनमूल-स्तनरोहितापलापान्य पस्तम्भौचेति ॥ ७ ॥

पृष्ठमर्माणि तु कटीकतरुणकुकुन्दर-नितम्ब-पार्श्वसंधि-बृहत्यंस-फलकान्यंसौ चेति ॥ ८ ॥

बाहुमर्माणि तु क्षिप्र-तलहृदय-कूर्च-कूर्चशिरोमणिबंधेन्द्रवस्ति-कूर्परण्यूर्वी लोहिताक्षाणि कक्षधरं चेति एतेनेतरौ बाहु व्याख्यातः ॥९॥

जत्रुण ऊर्ध्वं मर्माणि चतस्रो धमन्योऽष्टौ मातृका द्वे कृकाटिके द्वे विधुरे द्वौ फणौ द्वावपांगौ द्वावावर्तौ द्वावुत्क्षेपौ द्वौ शंखावेका स्थपनी पञ्च सीमन्ता श्चत्वारि शृङ्गाटकानि चैकोऽधिपतिः ॥१०॥

अथ मर्मजातीन्व्याख्यास्यामः ।

तत्र तलहृदयेन्द्रवस्तिगुदस्तनरोहितानि मांसमर्माणि, नीलधमनीमातृकाशृङ्गाटकापांगस्थपनीफणस्तनमूलापलापापस्तम्भहृदयनाभि पार्श्वसंधिबृहतीलोहिताक्षोर्व्यः शिरामर्माणि, यद्यपि वाग्भटे धमनी-मर्म पृथगेव पठ्यते सुश्रुते तु शिरामर्मस्वेव धमनीमर्मणामन्तर्भावः वयन्तु सुश्रुतपद्धतिमवलम्ब्य वदयामः, आणिविटपकक्षधरकूर्च-कूर्च शिरो क्षिप्रांसविधुरोत्क्षेपाः स्नायुमर्माणि, कटीकतरुणनितम्बांसफलक शंखा श्चास्थिमर्माणि, जानुकूर्परसीमन्ताधिपतिगुल्फमणिबंधकु कुन्दरावर्तकृकाटिकाश्चेति संधिमर्माणि ॥११॥

अधुना सद्योमारकादिभेदेन पुनः पञ्चविकल्पानि । तद्यथा सद्यः प्राणहराणि, कालान्तरप्राणहराणि विशल्यघ्नानि, वैकल्यकराणि, रुजा-कराणिचेति १२॥

अथसद्यःप्राणहराणि ।

सद्यः प्राणहराण्याहु र्मर्माण्येकोनविंशतिः ।
मर्मदेशास्त्रयस्त्रिंशत्, स्युः कालान्तरमारकाः ॥१३

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति हि ।
ममाँष्टकं रुजाकारि विशल्यघ्नं त्रिकं मतम् ॥१४॥

अथसद्यः प्राणहराणि मर्माणि

शृङ्गाटकान्यधिपतिः शंखौ कंठशिरा गुदम् ।
हृदयं वस्तिनाभी च घ्नन्ति सद्योहतानि तु ॥१५॥

अथकालान्तरप्राणहराणि मर्माणि ।

वक्षोमर्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः ।
कटीकतरुणे संधी पार्श्वजौ वृहती च या ॥१६॥
नितम्बाविति चैतानि कालान्तरहराणि तु ।

विशल्यघ्नानि

उत्क्षेपौ स्थपनी चैव विशल्यघ्नानि निर्दिशेत् ॥१७॥

वैकल्यकराणि ।

लोहिताक्षाणि जानूर्वीकुर्चाः विटपकुर्पराः ॥
कुकुन्दरे कक्षधरे विधुरे सकृकाटिके ॥१८॥
अंसांसफलकापांगा नीले मन्ये फणे तथा ।
वैकल्यकरणान्याहुश्चावर्तौ द्वौ तथैव च ॥१९॥

रुजाकराणि ।

गुल्फौ द्वौ मणिबंधौ द्वौ द्वे द्वे कूर्चशिरांसि च ।
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान् ॥२०॥
क्षिप्राणि विद्धमात्राणि घ्नन्ति कालान्तरेण च ।

मर्माणि नाम मांससिरास्नायवस्थिसंधिसन्निपातास्तेषु स्वभावत एव विशेषेण प्राणास्तिष्ठन्ति तस्मा न्मर्मस्वभिहताँस्तांस्तान् भावाना पद्यन्ते ॥२१॥

तत्र सद्यःप्राणहराणि आग्नेयानि अग्निगुणेषु आशु क्षीणेषु क्षपयन्ति, कालान्तरप्राणहराणि सौम्याग्नेयानि अग्निगुणेषु त्वाशु क्षीणेषु क्रमेण च सोमगुणेषु कालान्तरेण क्षपयन्ति, विशल्यघ्नराणि वायव्यानि, शल्यमुखेन निरुद्धो यावदन्तर्वायुः तिष्ठति तावज्जीवति, उद्धृतमात्रे तु शल्ये मर्मस्थानाश्रितो वायु र्निष्क्रामति, तस्मात्सशल्यो जीवति उद्धृतशल्यो म्रियते, वैकल्यकराणि सौम्यानि, सोमो हि स्थिरत्वात

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शैत्याच्च प्राणावलम्बनं करोति रुजाकराणि अग्निवायुगुणभूयिष्ठानि विशेषतश्च अग्निवायू रुजाकरौ पाञ्चभौतिकीश्च रुजामाहुरेके ॥२२॥

केचिदाहुः मांसादीनां पञ्चानामपि विवृद्धानाम् समस्तानां च समवायात् सद्यः प्राणहराणि; एकहीनानामल्पानांवा कालान्तर-प्राणहराणि, द्विहीनानांविशल्यप्राणहराणि, त्रिहीनानां वैकल्यकराणि, एकस्मिन्नेव रुजाकराणि चेति, यतश्चैवमतोऽस्थिविद्धेष्वपि शोणितागमनं भवति ॥२३॥

चतुर्विधा यास्तु शिराः शरीरे,
प्रायेण ता मर्मसु संनिविष्टाः ।
स्नाय्वस्थिमांसानि तथैव संधीन्,
सन्तर्प्य देहं प्रतिपालयन्ति ॥२४॥

ततः क्षते मर्मणि ताः प्रवृद्धः,
समन्ततो वायुरभिस्तृणोति ।
विवर्द्धमानस्तु स मातरिश्वा,
रुजः सुतीव्राः प्रतनोति काये ॥२५॥

रुजाभिभूतं तु पुनः शरीरं,
प्रलीयते नश्यति चास्य संज्ञा ।
अतो हि शल्यं विनिहर्त्तुमिच्छन्,
मर्माणि यत्नेन परीक्ष्य कर्षेत् ॥२६॥

तत्र सद्यप्राणहरमन्ते विद्धं कालान्तरेण मारयति, कालान्तर-प्राणहरमन्ते विद्धं वैकल्यमापादयति, विशल्यप्राणहरमन्ते विद्धं वैकल्यकरम्, वैकल्यकरम् त्वन्ते विद्धं क्लेशयति रुजां च करोति, रुजाकरमतीववेदनं भवति ॥२७॥

तत्र सद्यःप्राणहरादिभेदेन पञ्चधा भिन्नानां मर्मणां मर्यादा ।

तत्र सद्यःप्राणहराणि सप्तरात्राभ्यन्तरान्मारयंति कालान्तरप्राण-हराणि पक्षान् मासाद्वा, तेष्वपि तु क्षिप्राणि कदाचिदाशु मारयन्ति, विशल्यप्राणहराणि वैकल्यकराणि च कदाचिदत्यभिहतानि मार-यन्ति ॥२८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत ऊर्ध्वं प्रत्येकशो मर्मस्थानानि चानुव्याख्यास्यामः ॥

तत्र पादांगुष्ठांगुल्योर्मध्ये क्षिप्रं नाम मर्म तत्र विद्धस्याक्षेपकेण मरणम्, मध्यमांगुलीमानुपूर्व्या मध्ये पादतलस्य तलहृदयं नाम तत्रापि रुजाभिर्मरणम्; क्षिप्रस्योपरिष्टात् उभयतः कूर्चौ नाम, तत्र पादस्य भ्रमणवेपने भवतः, गुल्फसंधेरध उभयतः कूर्चशिरो नाम तत्र रुजा-शोफौ, पदजंघयोः संधाने जंघास्थ्यनुजंघास्थिप्रवर्द्धनकौ गुल्फौ नाम तत्र रुजः स्तब्धपादता खंजता वा; पार्ष्णिं प्रति त्रयोदशांगुले जंघा-मध्ये इन्द्रवस्ति र्नाम तत्र शोणितक्षयेण मरणम्, तथाचोक्तं सुश्रुते ग्रंथिषु चाग्निकर्मणि तन्त्रान्तरे

त्रयोदशांगुले पार्ष्णिप्रतिकालान्तरासृहृत् ॥२६॥

जंघोर्वोः संधाने जानु नाम तत्र खंजता, जानुन उर्ध्वमुभयतस्त्र्य-ंगुलमाणिर्नाम तत्र शोफाभिवृद्धिः स्तब्धसक्थिता च, ऊरुमध्ये ऊर्वी नाम तत्र शोणितक्षयात् सक्थिशोषः, ऊर्व्या ऊर्ध्वमधो वंक्षणसंधेः ऊरुमूले लोहितार्द्धं नाम तद्व लोहितक्षयेण पक्षाघातः; वंक्षणवृषणयो-रन्तरे विटपं नाम तत्र षांड्यमल्पशुक्रता वा भवति एवमेतानि चैकादश सक्थिमर्माणि व्याख्यातानि एतेनेतरं सक्थि व्याख्यातम् ॥३०॥

बाहौ तु विशेषः यानि सक्थ्नि गुल्फजानुविटपानि तानि बाहौ मणिबंधकूर्परकक्षधराणि; यथा वंक्षणवृषणयो रन्तरे विटपमेवं बाह्वः कक्षयो र्मध्ये कक्षधरम् तस्मिन् विद्धे त एवं उपद्रवाः विशेषतस्तु मणिबंधे कुण्ठता कूर्पराख्ये कुणिः कक्षधरे पक्षाघातः एवमेतानि चतुश्चत्वारिंशत् शाखासु मर्माणि व्याख्यातानि ॥३१॥

अत ऊर्ध्वं मुदरोरसो र्मर्मस्थानान्यनुव्याख्यास्यामः । तत्र वात-वर्चोनिरसनं स्थूलान्त्रप्रतिबद्धं गुदं नाम मर्म तत्र सद्योमरणं, अल्पमांसशोणितोऽभ्यन्तरतः कट्यां मूत्राशयो वस्ति र्नाम तत्रापि सद्योमरणम्, अश्मरीव्रणाहते तत्राप्युभयतो भिन्ने न जीवति एकतो भिन्ने मूत्रस्रावीव्रणो भवति, स तु यत्नेन चोपक्रान्ते रोहति; पक्वा-माशययो र्मध्ये नाभिर्नाम, तत्रापि सद्य एव मरणम्, स्तनयो र्मध्यम-धिष्ठायोरसिचामाशयोर्ध्वद्वारं पुरतः सत्त्वरजस्तमसामधिष्ठानं पुण्डरी-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

काकारं चतुष्प्रकोष्ठयुक्तं हृदयं नाम तत्रापि सद्योमरणम्, स्तनयोरधस्ताद् द्व्यंगुलमुभयतः स्तनमूले नाम मर्मणि तत्र कफपूर्णकोष्ठतया कासश्वासाभ्यां मरणम् स्तनचूचुकयोरूर्ध्वं द्व्यंगुलमुभयतः स्तनरोहितौ नाम, तत्रलोहितपूर्णकोष्ठतया कासश्वासाभ्यां च म्रियते; उभयोरसोः नाड्यौ वातवहे अपस्तम्भौ नाम, तत्र वातपूर्णकोष्ठतया कासश्वासाभ्यां मरणम्; एवमेतानि उदरोरसो द्वादश मर्माणि व्याख्यातानि ॥ ३२ ॥

अत ऊर्ध्वं पृष्ठमर्माणि अनुव्याख्यास्यामः— तत्र पृष्ठवंशमुभयतः प्रतिश्रोणिकाण्डमस्थिना कटीकतरुणे नाम मर्मणी तत्र शोणितक्षयात् पाण्डु र्विवर्णो हीनरूपश्च म्रियते; पार्श्वयो र्जघनवहिर्भागे उपविशतः पुरुषस्यभारधारणमूले कुकुन्दरे नाम मर्मणी, तत्र स्पर्शाज्ञानमधः काये चेष्टोपघातश्च;

श्रोणिकाण्डयोरुपर्याश्यां च्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम; तत्राधःकायशोषो दौर्बल्याच्च मरणम्; अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययो स्तिर्यगूर्ध्वं च जघनात् पार्श्वसंधी नाममर्मणि, तत्रलोहितपूर्णकोष्ठतया म्रियते; स्तनमूलादृजूभयतः पृष्ठवंशस्य बृहती नाम, तत्र शोणितातिप्रवृत्ति-निमित्तैरुपद्रवै र्म्रियते; पृष्ठोपरि पृष्ठवंशमुभयत स्त्रिकसम्बद्धे अंसफलके नाम, तत्र बाह्वोः स्वापशोषौ; बाहुमूर्धग्रीवामध्ये अंसपीठस्कंधनिबंधनावंसौ नाम, तत्र स्तब्धबाहुता; एवमेतानि चतुर्दश पृष्ठमर्माणि व्याख्यातानि ॥३३॥

अत ऊर्ध्वं ऊर्ध्वजत्रुगतानि मर्माणि व्याख्यास्यामः—तत्र कण्ठनाड़ीमुभयत श्चतस्रो धमन्यो द्वे नीले द्वे च मन्ये व्यत्यासेन, तत्र मूकता स्वरवैकृतमरसग्राहिता च; ग्रीवायानुभयतश्चतस्रः शिरा मातृकाः, तत्र सद्योमरणम्; शिरोग्रीवयोः संधाने कृकाटिके नाम तत्र चलमूर्धता; कर्णपृष्ठतोऽधः संश्रिते विधुरे नामनि तत्र बाधीर्य्यम्; घ्राणमार्गमुभयतः स्रोतोमार्गप्रतिबद्धे अभ्यन्तरतः फणे नामनि तत्र गंधाज्ञानम्; भ्रूपुच्छान्तयोरधोऽक्ष्णो र्बाह्यतोऽपांगौ नाम, तत्रांध्यं दृष्ट्युपघातो

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा; भ्रुवोरुपरिनिम्नयो रावर्त्तौ नाम, तत्रांध्यं दृष्ट्युपघातो वा; भ्रुवोः पुच्छान्तयोरुपरि कर्णललाटयोर्मध्ये शंखौ नाम, तत्र सद्योमरणम्; शंखयोरुपरि केशान्ते उत्क्षेपौ नाम, तत्र सशल्यो जीवेत् पाकात्-पतितशल्यो वाजीवेदनुद्धृतशल्यश्च भ्रुवोर्मध्ये स्थपनी नाम, तत्रोत्क्षेपवत्परिणामः; पञ्चसंधयः शिरसि विभक्ताः सीमन्ता नाम, तत्रोन्मादभयचित्तनाशै र्मरणम्; घ्राण श्रोत्राक्षिजिह्वास्पर्शनानां शिराणां मध्ये शिरासन्निपातः शृंगाटकानि तानि चत्वारि मर्माणि तत्रापि सद्योमरणम्; मस्तकाभ्यन्तरोपरिष्टात् शिरासंधिसन्निपातो रोमावर्तोऽधिपतिः, तत्रापि सद्योमरणम्; एवमेतानि सप्तत्रिंशदू-र्ध्वजत्रुगतानि मर्माणि व्याख्यातानि ॥३४॥

भवन्तिचात्र

ऊर्व्यः शिरांसि विटपे च सकक्षपार्श्वे ।
एकैकमंगुलमिता स्तनमूलपूर्वम् ॥
विद्ध्यंगुलद्वयमितं मणिबंधगुल्फम् ।
नीएयेव जानुसपरं सह कूर्पराभ्याम् ॥३५॥
हृद्वस्तिकूर्चगुदनाभि वदन्ति मूर्ध्नि,
चत्वारि पञ्च च गले दश यानि च द्वे ।
तानि स्वपाणितलकुंचितसम्मितानि,
शेषाण्यवेहि परिविस्तरतोऽगुलार्द्धम् ॥३६॥
एतत्प्रमाणमभिवीक्ष्य गदन्ति तज्ज्ञाः,
शस्त्रेण कर्मकरणं परिहृत्य मर्म ;
पार्श्वाभिघातितमपीह निहन्ति मर्म,
तस्माद्धि मर्मसदनं परिवर्जनीयम् ॥३७॥
छिन्नेषु पाणिचरणेषु शिरा नराणाम्,
संकोचमियु अस्टगल्पमतो निरेति ।
प्राप्यामितव्यसनमुग्रमतो मनुष्याः,
संछिन्नशाखतरुवन्निधनं न यान्ति ॥३८॥
क्षिप्रेषु तत्र सतलेषु हतेषु रक्तम्,
गच्छत्यतीव पवनश्च रुजं करोति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं विनाशमुपयान्ति हि तत्र विद्धाः,
वृक्षा इवायुधविघातनिकृत्तमूलाः ॥३६॥
तस्मात्क्षयो रभिहतस्य च पाणिपादम्,
छेतव्यमाशु मणिबंधनगुल्फदेशे ।
मर्माणि शल्यविषयार्थमुदाहरन्ति,
यस्माच्च मर्मसु हता न भवन्ति सद्यः ॥४०॥
जीवन्ति तत्र यदि वैद्यगुणेन केचित्ते प्राप्नुवन्ति विकलत्वमसंशयं हि ।
संभिन्नजर्जरितकोष्ठशिरःकपालाः,
जीवन्ति शस्त्रविहतैश्च शरीरदेशैः ।
छिन्नैश्च सक्थिभुजपादकरैरशेषैः,
येषां न मर्मपतिता विविधाः प्रहाराः ॥४१॥
सोममारुततेजांसि रजःसत्वतमांसि च ॥
मर्मसु प्रायशः पुसां भूतात्मा चावतिष्ठते :
मर्मस्वभिहता स्तस्मान्न जीवन्ति शरीरिणः ॥४२॥
इन्द्रियार्थेष्वसम्प्राप्ति र्मनोबुद्धिविपर्य्ययः ।
रुजश्च विविधास्तीव्रा भवन्त्याशुहरे हते ॥४३॥
हते कालान्तरघ्ने तु ध्रुवो धातुक्षयो नृणां ।
ततो धातुक्षयाद् जन्तुः वेदनाभिश्च नश्यति ॥४४॥
हते वैकल्यजनने केवलं वैद्यनैपुणात ।
शरीरं क्रियया युक्तं विकलत्वमवाप्नुयात् ॥४५॥
विशल्यघ्नेषु विज्ञेयं पूर्वोक्तं यच्च कारणम् ।
रुजाकराणि मर्माणि क्षतानि विविधा रुजः ॥
कुर्वन्त्यन्ते च वैकल्यं कुवैद्यवशगो यदि ॥४६॥
छेदभेदाभिघातेभ्यो दहनाद्दारणादपि ।
उपघातं विजानीयान्मर्मणां तुल्यलक्षणम् ॥४७॥
मर्माभिघातः स्वल्पोऽपि प्रायशो बाधतेतराम् ।
रोगा मर्माश्रितास्तद्वत् प्रक्रान्ता यत्नतोऽपि च ॥४८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मर्माण्यधिष्ठाय हि ये विकाराः,
मूर्च्छन्ति काये विविधा नराणां ।
प्रायेण ते कृच्छ्रतमा भवन्ति,
नरस्य यत्नैरपि साध्यमानाः ।४६।।

इति शल्यतन्त्रसमुच्चये पञ्चाशत्तमोऽध्यायः ।



श्रीजगदम्बार्पणमस्तु

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

शरीर के अन्तर्गत मर्मों की व्यवस्था

(४४) शाखा-गत मर्मों की व्यवस्था

संख्या	नाम	परिमाण (नाप)	स्थान निर्देश	प्रकार	निर्माण
४	क्षिप्र	अर्द्धांगुल	पादकी तथा हस्तकी अंगुष्ठ और अंगुली के मध्य	कालान्तर प्राणहर	स्नायु मर्म
४	तल हृदय	अर्द्धांगुल	मध्यमांगुली के सामने पादतल तथा हस्ततल के मध्य	,,	मांसमर्म
४	कूर्च	चार अंगुल	क्षिप्र के ऊपर दोनों ओर	वैकल्यकर	स्नायु मर्म
४	कूर्चशिर	एक अंगुल	गुल्फ तथा मणिबंध के नीचे दोनों ओर	रुजाकर	,,
२	गुल्फ	दो अंगुल	प्रसिद्ध (पैर तथा जंघाकी जोड़)	रुजाकर	संधिमर्म
२	मणिबंध	,, ,,	कर प्रकोष्ठ की संधि	,,	,,
४	इन्द्रवस्ति	अर्द्धांगुल	पार्ष्णी से ऊपर बारह अंगुल	कालान्तर प्राणहर	मांसमर्म
२	जानु	तीन अंगुल	जंघा और उसकी संधि	वैकल्यकर	संधिमर्म
२	कूर्पर	,, ,,	प्रगण्ड और प्रकोष्ठ की संधि	वैकल्यकर	,,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संख्या	नाम	परिणाम (नाप)	स्थान निर्देश	प्रकार	निर्माण
४	आणि	अर्द्धांगुल	जानु के तीन अंगुल ऊपर	वैकल्यकर	स्नायुमर्म
४	ऊर्वी	एक अंगुल	ऊरु मध्य में	,,	शिरामर्म
४	लोहितान्त	अर्द्धांगुल	बंधण संधि के नीचे ऊरुमूल में	,,	,,
२	विटप	एक अंगुल	बंधण वृषण के मध्य	वैकल्यकर	स्नायुमम
२	कक्षधर	,,	वक्ष और कक्ष के मध्य	,,	,,

१२—१ अंगुल प्रमाण

६— २ अंगुल प्रमाण

४ ३ अंगुल प्रमाण

२६—४ अंगुल प्रमाण

५६ ½ अंगुल प्रमाण

१०७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१२) उदर और उरस में रहनेवाले मर्मों की व्यवस्था

संख्या	नाम	परिमाण (नाप)	स्थान निर्वेश	प्रकार	निर्माण
१	गुद	चार अंगुल	स्थूलान्त्र में बंधा हुआ	सद्यः प्राणहर	मांसमर्म
१	वस्ति	,, ,,	कटि के भीतर	,, ,,	स्नायु मर्म
१	नाभि	,, ,,	पक्वाशय आमाशय के मध्य	,, ,,	शिरामर्म
१	हृदय	,, ,,	उरस में दोनों स्तनों के मध्य	,, ,,	शिरामर्म
२	स्तनमूल	दो अंगुल	स्तनों के नीचे दो अंगुल	कालान्तर प्राणहर	,, ,,
२	स्तनरोहित	दो अंगुल	स्तनों के ऊपर दो अंगुल	,, ,,	मांसमर्म
२	अपलाप	अर्द्धांगुल	अंसकूट के नीचे पार्श्व के ऊपर वहिर्भाग में	,, ,,	शिरामर्म
२	अपस्तम्भ	,, ,,	उरस के दोनों तरफ वातवहा नाड़ी	,, ,,	,, ,,

४४—शाखागत मर्म
३७—ऊर्ध्वजत्रुगत मर्म
१२—उदर और उरसगत मर्म
१४—पृष्ठगत मर्म
१०७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

❀ (३७) ऊर्ध्व जत्रुगत मर्मों की व्यवस्था ❀

संख्या	नाम	परिमाण (नाप)	स्थान निर्देश	प्रकार	निर्माण
२	नीला	चार अंगुल	कंठनाड़ी के दोनों ओर	वैकल्यकर	शिरामर्म
२	मन्या	,, ,,	,, ,, ,, ,,	,,	,,
८	मातृका	,, ,,	ग्रीवा के दोनों ओर	सद्यः प्राणहर	,,
२	कृकाटिका	अर्द्धांगुल	शिर ग्रीवा की संधि	वैकल्यकर	संधिमर्म
२	विधुर	,,	कर्णपीठ के नीचे	,,	स्नायुमर्म
२	फण	,,	नासामार्ग के दोनों ओर	,,	शिरामर्म
२	अपांग	,,	भ्रूपुच्छ के नीचे आंख के बाहर	,,	,,
२	आवर्त	,,	भ्रू के ऊपर नीचेवाला गर्त	,,	संधिमर्म
२	उत्क्षेप	,,	शंख के ऊपर केशान्त	विशल्यघ्न	स्नायुमर्म
२	शंख	,,	कर्ण ललाट के मध्य	सद्यः प्राणहर	अस्थिमर्म

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

संख्या	नाम	परिमाण (नाप)	स्थान निर्देश	प्रकार	निर्माण
१	स्थपनी	अर्द्धांगुल	भ्रूमध्य	विशल्यघ्न	शिरामर्म
५	सीमन्त	चार अंगुल	शिर में विभङ्ग	कालान्तर प्राणहर	संधिमर्म
४	शृंगाटक	,, ,,	घ्राण श्रोत्र अक्षि जिह्वा के भीतर	सद्यः प्राणहर	शिरामर्म
१	अधिपति	अर्द्धांगुल	शिखा के स्थान पर	,, ,,	संधिमर्म

११—मांसमर्म
४१—शिरामर्म
२७—स्नायुमर्म
८—अस्थिमर्म
२०—संधिमर्म
१०७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१४) पृष्ठ मर्मों की व्यवस्था

संख्या	नाम	परिमाण (नाप)	स्थान निर्देश	प्रकार	निर्माण
२	कटीकतरुण	अर्द्धांगुल	पृष्ठवंश के दोनों तरफ श्रोणी के प्रति	कालान्तर प्राणहर	अस्थिमर्म
२	कुकुन्दर	,,	पृष्ठवंश के दोनों तरफ श्रोणी के नीचे	वैकल्यकर	संधिमर्म
२	नितम्ब	,,	आशय को ढांकने वाला	कालान्तर प्राणहर	अस्थिमर्म
२	पार्श्वसंधि	,,	जघन से तिरछे ऊपर	,,	शिरामर्म
२	बृहती	,,	स्तनमूल से सीधे पृष्ठवंश की ओर	,,	,,
२	अंसफलक	,,	प्रसिद्ध	वैकल्यकर	अस्थिमर्म
२	अंस	,,	अंसपीठ और स्कंध बांधनेवाला	,,	स्नायुमर्म
१०७	कुल संख्या				

१९—सद्यः प्राणहर
३३—कालान्तर प्राणहर
४४—वैकल्यकर
८—रुजाकर
३—विशल्यघ्न

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शल्यतन्त्रस्य शुद्धिपत्रम्

त्याज्यम्	पृ०	पं०	ग्राह्यम्
विद्वज्जन	अभ्यर्थनायां	,,	विद्वज्जन
परीक्षाम्	,,	,,	परीक्षायां
साथ्यं	,,	,,	साहाय्यं
मम	मर्मकोष्ठे	२	मर्म
जत्तु	,	३	जत्रु
मिधाय	३	२३	भिधाय
थितम्	३	२७	स्थितम्
बर्तते	४	३६	वर्तते
ते	५	४१	श्रुते
यत्त	७	५	यत्तत्
क्लोरो	७	६	क्लोरो
मूर्धिन	१२	१३	मूर्ध्नि
छितो	१२	१६	च्छि तो
स्रोतः	१४	३४	स्रोतः
नामका	१५	३५	नामिका
वहि	१५	३५	वर्हि
वैषभ्य	१५	३६	वैषम्य
भण्डला	१७	१	मण्डला
वृन्नं	१८	१५	वृन्त
समि	१६	२१	सम्मि
अध	२०	३२	अधे
त्रिकर्च	२२	५३	त्रिकूर्च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्याज्यम्	पृ०	पं०	ग्राह्यम्
ांसे	२३	६१	मांसे
विद्ध	२३	६१	विद्धम्
चतुथा	१७	०	चतुर्था
शाल्मला	२४	६६	शाल्मली
ौषधि	२५	३	औषधि
यष्टि	२७	२६	यष्टि
छोत्रो	२७	२८	च्छ्रोत्रो
विष	२७	२६	विण्
िरिव	२८	३७	ग्निरि
द्वे	२८	४४	द्वे
द्र	२८	४४	द्र्
थि	२६	१	धि
म	२६	१	मः
ह्वाश्व	२६	२	हाश्व
नायु	२६	८	स्नायु
च्छित	२६	८	च्छ्रित
दर्व	३०	११	दुर्व
द्यां	३०	१५	द्यं
व्या	३०	१५	व्यां
त्त्पतेः	३०	१५	त्पत्तः
णा	३०	१८	णी
न्तथौ	३१	२३	तथौ
म	३२	१	मः
भारु	३२	३	भीरु
ात्	३२	५	णात्
सान्तर्दी	३२	५	सान्तर्दी

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्याज्यं	पृ०	पं०	ग्राह्यं
सि	३२	६	सित
मिं	३२	१०	मिति
भेदः	३२	१०	मदः
निर्विपा	३३	१४	निर्विषा
दृष्टान्त	३४	२६	दृष्टान्तं
क्षारानि	३५	१४	क्षाराग्नि
वद्य	३७	१४	वैद्य
स्याष्ट	३७	१	स्याद्व
रक्ष	४१	४४	रक्ते
वर्षसु	४३	१३	वर्षासु
विनिंदिशे	४३	१४	विनिर्दिशेत्
द्व्यंगुले	४४	२	द्व्यंगुले
दृष्ठवा	४७	१३	दृष्ट्वा
तावितः	४८	१६	तान्वितः
भद्वैद्यः	४८	२२	भवेद्वैद्यः
छ्रेदे	४८	२४	छेदे
श्चेष्टं	५०	६	श्रेष्टं
च्छ्रया	५०	६	च्छ्राया
द्युयष्मा	५०	११	ह्यूष्मा
क्रापा	५१	१६	कार्पा
नाममि	५१	१७	नामभि
रंघ	५१	२१	रंघ्
ध्यातू	५२	२८	ध्यात्
वद्धे	५३	३६	वद्धे
शेषे	५३	४१	शैषै
मनि	५३	४५	मग्नि
पर्व	५४	३	पूर्व

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्या०	पृ०	पं०	आ०
णोत्	५७	२६	णीत्
रुणः	६०	२५	अरुणः
कपे	६०	३५	कपि
येाद्	६०	२६	येद
मणं	६१	२	माणं
शेक	६५	२४	शेत् ।
ध्रव	६६	४	ध्रुव
हिर्ता	६६	१०	हिंता
कुष्ट	६७	१२	कुष्ठ
द्धयति	६७	२०	द्धयन्ति
तद्धि	६७	२	तद्द्धि
चेाग्रा	६८	१०	श्चेाग्रा
शेफ.श्च	६८	११	शोफश्च
यित्रा	६६	१३	यत्रा
दिविध	६६	२२	द्विविधं
मत्य	७२	३०	मत्या
गानि	७३	२	गाग्नि
ल्वेानि	७३	६	ल्वेाऽग्नि
चाङ्गषु	७४	१५	चाङ्क्षेषु
श्रव	७४	२७	श्रव
ध्यध	७७	२७	व्यध
शि	७८	३५	शिष्ट
कुर्या	७८	१८	कुर्यात्
शोघ	८२	६	शोध
दोप	८२	१२	द्रोप
प्रियं	८५	३८	प्रिय'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्याज्यम्	पृ०	पंक्ति	ग्राह्यम्
रोथि	८५	४०	रोत्थि
येत	८५	४३	येत्
येत	८५	४५	येत्
येत्	८५	४३.	येत्
वते	८५	४८	वेत्
दर्जन	८६	५१	दर्जुन
क्लन	८६	५७	क्लेन
यथतु	८७	६४	यथर्त
मीम्	८७	७१	मीन्
मुटि	८८	७४	मुष्टि
मधु	८८	८२	मधु
भिषल्भिः	९०	७	भिषग्भिः
किञ्चि	,,	१०	किञ्चि ।
छर्द्द येत्	९१	१५	छर्दयेत् ।
यदंग	,,	१८	यदंगं
तत्पि	,	१९	तत्पि
अथातो	९२	१	अथातः
शीतोछ्व	९४	२४	शीतेाच्छ्वा
य	,,	३३	यत्
पने	,,	३५	पट्टेन
भृग	९७	२	मृग
स्फुटति	९९	२६	स्फुटन्ति
वचारये	१००	१९	वचारयेत्
घृत	,,	२०	घृ
पिपृ	,,	२२	पिष्टे
ये	,,	२३	येत्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्याज्यम्	पृ०	पं०	ग्राह्यम्
येत	१०१	३७	येत्
सिद्ध	,,	३६	सिद्धं
भग्न	१०२	५०	भग्नं
ता	१०४	६	स्रोतो
थिताः	१०५	१८	स्थिताः
वति	,,	,,	वस्ति
किसी	१०६	१	किंस्वि
कम	,,	३	कर्म
कर्त्तें	,,	,,	कर्त्तृ
न्तु	१०७	१५	न्तू
रक्ष	१०८	१६	रक्ष
वर्ष	१०८	२१	वर्षं
ष्या	१०६	५	ष्या
उत्पद्यते	११०	१५	उत्पद्यन्ते
येत	,,	१६	येत्
साध्याः	१११	२	साध्यः
मतर्पणा	,,	३	मपतर्पणा
तत्रधि	,,	६	तत्राधि
वैंकरे	११२	१७	वैंष्किरे
ये	११२	१८	येत्
ये	,,	२४	येत्
देतत	११४	४५	देतत्
हरि	,,	४६	हरिद्रे
एतै	,,	५०	एतद्वै
तत	,,	६	ततः
तियक्	११७	८	तिर्यक्
मेनं	,,	,,	मेन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्या०	पृ०	पं०	ग्रा०
मुक्त	,,	१०	मुक्तं
पतिं	११७	८	पतितुं
सितं	११८	१	त्सितं
ड्यर्ध्व	११९	७	डयोर्ध्व
दारये	,,	८	दारयेत्
दङ्ग	,,	१०	दङ्गं
विद्रधी	,,	१	विद्रधि
वत	१२०	१७	वत्
वनीय	१२२	१०	जीवनीय
द्वद्रधि	१२४	२७	द्विद्रधि
स्रते	,,	३३	स्रुते
र्थात	,,	३८	र्थात्
वृतः	१२६	८	वृत्तः
पिष्ठाः	१२८	९	पिशाः
सर्वाश्च	१२९	१५	सर्वांश्च
सुसिद्ध	,,	२१	सुसिद्धं
येत	,,	२५	येत्
मुक्त	१३०	३७	मुक्तं
निहति	,,	३८	निहंति
सिद्ध	१३०	४०	सिद्धं
दष्ण	१३१	५	दुष्ण
रक्तन	१३२	१३	रक्तेन
चितच	,,	२२	चितश्च
क्षेद्	१३३	२	रक्षेद्
लं	,,	३	तैलं
शुद्ध	,,	६	शुद्धं
ग्रंथि	१३४	०	ग्रंथिं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्या०	पृ०	पं०	आ०
मिश्रः	"	१८	मिश्रः
युक्त	"	२०	युक्तं
रक्त	१३५	३०	रक्तं
रक्त	"	३४	रक्ते
मूल	"	३७	मूलं
सिद्ध	१३६	४६	सिद्धं
प्रर्छनं	"	४८	प्रछर्द्दनं
ग्वेरे	१३७	२	ग्वरै
न्नारित	१३६	२७	न्नास्ति
त्रिविधो	१४०	३५	स्त्रिविधो
सर्पषा	१४१	१२	सर्पिषा
मूत्रेण	१४१	१३	मूत्रेण
कुवन्ति	१४२	२६	कुर्वन्ति
कर्णान	१४२	६	कर्णान्ते,
निग्धै	१४३	६	स्निग्धै
राग्न	१४६	४४	राग्नि
युकानि	१४७	६	युक्तानि
वदारिका	१५१	१७	विदारिका
द्वदाहि	१५२	३४	द्वगुदाहि
भ्यक्त	१५५	३६	भ्यक्तं
कुच्छ्र	१५६	३८	कृच्छ्र
थातो	१५७	१	अथातो
मियते	१५७	६	मिथ्यते
कुर्चा	१५८	१८	कूर्चा
क्रान्ते	१६२	३२	क्रान्तो
मस्थिना	१६३	३३	मस्थिनी
तमंसि	१६५	४२	तमांसि
णात	१६५	४५	णात्
कच्छ	१५३	३८	कच्छ्र

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.